यथावत्त्रिकालज्ञानलब्धकलिकालसर्वज्ञबिरुदश्रीमद्धेमचन्द्राचार्यप्रणीतम्

# श्रीछन्दोऽनुशासनम्

प्रकाशितं देवकरणेन श्रेष्ठिना मूलचन्द्रात्मजेन

मोहमय्यां

निर्णयसागराख्यमुद्रणालये वा. रा. घाणेकरद्वारा संमुद्र्य प्रकाशितम्

वीरसंवत् २४३८ विक्रमसंवत् १९६८ इस्वीसन १९१२

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ श्रीगणधरेन्द्राय नमः ॥

ननु भोः सहृदयहृदयालवालोद्गतानवद्यविद्याव्रततिफलयुगलास्वादसतृष्णान्तःकरणाः सहृदया निर्णीतचरमेतद्विद्वद्वृन्दारकैः सर्वतत्रानुकूल्येन निबिडतरजडिमावष्टब्धमानसवृत्तिप्रातिकूल्येन यदुत न तावद्दते शब्दानुशासनाद्प्रतिमसुधारसायमानानघशब्दसृष्टिशर्वरीशायमानात्स्वःशिवश्रीप्रदानपटुराविर्भवति अपेतपङ्को बोधो, यथार्थवादिता तु न भवत्येव कथङ्कारमपि तमन्तरेण, आगमोऽप्येतदेव निवेदयति निर्णीतमोक्षगमनानामसुमतां 'वयणविहत्तीइ कुसलो' इत्यादिना गतपापेनालापेन । जातेऽपि च विभक्तिवचनाख्यातकृदादिबोधे यावन्न वेविदितः शब्दानां यथावल्लिङ्गविभागो न तावद्भवत्युत्तरणं मृषावादाटव्याः पापव्याध्यावसथायाः आबालमनुभवसिद्धमिदं यदुत लिङ्गपरावर्त्तमात्रेणोद्भूतिः साक्षात्क्रोधकृशानोः श्रूयमाणेषु स्वाश्रितवचनेष्वप्रतिक्रिया । अवगतेऽप्येतस्मिन्द्वितये पापपङ्कापहारशोधिविततये न भवति यावन्नात्मायत्तीकृतमविकलविभावानुभावव्यभिचार्यादिसंकलितस्वभावरसभावाद्यभिधानरत्ननिधानं काव्यानुशासनं तावद्यथावद्वक्त्राद्यभिप्रेतार्थबोधोऽपरबोधनं च यथार्थतया नायकप्रतिनायकादीनामभिप्रायक्रियादेः । तद्युक्तमेव अतीतानागतवर्तमानकालीनातीन्द्रियार्थज्ञानसम्पन्नतादिप्रभावलब्धकलिकालसर्वज्ञत्वबिरुदानां भगवतां क्रमेण श्रीसिद्धहेमाख्यं पाणिनीयाद्यखिलशब्दानुशासनयशस्तारागणप्रभापटलविकर्तनप्रभमनूनं त्रिमुन्यसमापितं समासं शब्दानुशासनं बालसुबोध्ययथावत्पृथग्ज्ञानकरणोपयोगिकरणमक्षरानुक्रमाक्रान्तमनतिक्रान्तयशःशरीरं लिङ्गानुशासनं काव्यतद्धेतुस्वरूपगुणदोषरसादिस्वरूपविभावनापूर्वादर्शायमानमनुपमं काव्यानुशासनं चेति त्रयस्याप्रतिमस्य श्रीमद्धेमचन्द्रप्रभूणां जगति रचनं। परं यावन्नाधिजग्मे विदुषा शकलितशङ्कादोषं छन्दोऽनुशासनमनेकच्छन्दोविज्ञानपोषं न तावद्यथावदुच्चारः काव्यानां निर्दोषत्वाधानं च सम्पनीपद्यते कौतस्कुती च छन्दोभङ्गविरतिप्रभृतिविवेकवाग्मिता तु । तदवश्यमादरणीयमखण्डपण्डानुगतविचाराणां धीसाराणामेतदपि प्रागुदीरितानीरितानुशासनत्रयीवेति न तत्र काचन विचारकणिका वेविद्यते विद्याव्रतातिततिभूरुहां उज्झितमुहां स्वीकुर्वतामूहाम् । आविर्भावयितारश्चानवद्यानुशासनविद्याचतुष्कानुशासनालंभविष्णवनुशासनचतुष्कस्य प्रसिद्धतमाः । जीवनवृत्तमपि च तत्रभवतां भगवतां न केनाप्यविदितमाबालगोपालाङ्गनं ख्याततरं समासेनेतरथाकरणे तु नैव तस्य तथा समीहा शक्तिश्च । प्रस्तुतापश्चिमानुशास-

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

नमानातिरेकतरस्य तस्य मध्यमतयाऽपि भावान्न तत्रापि यत्तो न च योग्योपि मादृशोऽयं जनस्तादृगितिहाससाधनहीनसाधनतया यथावत्तया। परं सत्सु भरतजयदेवपिङ्गलादिप्रणीतेष्वनेकेष्वनघेषु छन्दोऽनुशासनेषु किमिति सुधामधुरीकारकरणमिव किमिव न वोभवीति हास्यास्पदमेतद्वचनमिति चतुरचक्रचेतसि चकास्यान्नच तच्चतुरं विचक्षणचक्रवालशोभा ( चङ्गता ) वहं, यतो नेदृग्गुम्फं सुगमं वा तेष्वेकतरमपि। अन्यच्च तत्र तत्र केवलवेदोपयोगिच्छन्दोऽनुशासनेनापादितं तत्तद्विशेषोपयोगि,प्रस्तुतं केवललोकोपयोगिच्छन्दोऽनुशासनसमर्थमाविर्भावयाञ्चक्रुराराध्यतममनुशासनम्। एतच्च निःशेषस्यास्यानुशासनस्याभ्यासाद्यथावत्स्यादवधारितं परमाद्यश्लोकेऽपि तावद्भगवद्भिः 'लोकोपयोगिनां वक्ष्ये, छन्दसामनुशासनम्' इत्युत्तरार्धेन निदर्शितम्। शब्दानुशासनादिभिः समानकर्तृकत्वं तूदाजह्रुः 'सिद्धशब्दकाव्यानुशासनः' इत्यनेन स्वयमेव भगवन्तः। दृब्धं चेदं श्रीमद्भिश्चौलुक्येश्वरे श्रीपरमार्हतकुमारपालेऽमारिघोषडिण्डिमवादके शासति राज्यम् , यत उपलभ्यते तत्र तत्र श्रीसिद्धराजस्यास्य च राजर्षेः स्तुतिरुदाह्रियमाणेति। अत्र चाध्यायाष्टकं प्रणीतं प्रज्ञावदातत्त्वावज्ञातपुरन्दरगुरुभिस्तत्रादौ सञ्ज्ञाद्याध्याये, द्वितीये च जातिशेषजातिदण्डकानां छन्दांसि चत्वारि शतानि अधिकान्येकादशभिरत्र च क्षन्तव्यमागो दृष्टिदोषजं यत्सप्तनवत्यधिकशतद्वय्यतिक्रमेऽपि च्छन्दसां पुनश्चतुर्नवत्यधिकाच्छतमानादङ्कारम्भो जातोऽस्ति तृतीये चाध्यायेऽर्धसमवृत्तानि हरिणप्लुताद्यानि अतिरुचिरावसानानि वक्त्रप्रकरणं चानुष्टुब्भिरत्र च येऽनवधार्य निस्सीमप्रतिभाप्राग्भारपराकृतपुरन्दरगुरुसरस्वतीयुगलस्य सर्वतन्त्रस्वतन्त्राधिषणान्वितत्वमुदाजह्रुः परिशिष्टपर्वणि दुरुध्धरं विरोधं छन्दसां केषाञ्चित् तैर्नावबुद्धं द्वाविंशतितमपत्रीयं प्रायेणेतिपदम्, अवबुद्धं वा ईर्ष्यालुतया जैनधर्मधुरन्धरेभ्यो न स्मृतं, तथैव षष्ठपत्रगतं 'सर्वजातीनामपीति वृद्धाः' इत्यपि। यदिचावधारितमभविष्यत्तत्तदा नालीकमुदपादयिष्यत्कलङ्कम्, मन्ये प्रमार्जयिष्यन्ति स्वयं ते इति न विशेषेण समीक्ष्यतेऽत्र। अत्रैव पदचतुरूर्ध्वममृतधारान्तमुद्गताप्रकरणं सप्तभिरुपस्थितप्रचुपितप्रकरणं च त्रिभिः सौम्यज्योतिषी च निरूपितवन्तो विषमवृत्तप्रकरणे मात्राछन्दसि च वैतालीयं त्रिंशता मात्रासमकादि नवभिर्निर्वर्ण्य निगमितवन्तोऽध्यायं तृतीयम्। तुर्ये चाध्याये आर्यागलितकखञ्जकशीर्षकाख्यानि वृत्तानि ख्यातान्यनेकधा। अत्र च आतृतीयाध्यायात्संस्कृत एवोदाहरणानि अलब्धमध्यस्वमतिहृदनिर्व्यूढप्रवाहकल्पानि चाखिलान्येतानि,परतश्च आर्याप्रकरणे च प्रायेण संस्कृतभाषाभाषितान्येव। परं क्वचित्क्वचिदस्त्येवाप्राकृत-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

जनरुचिविषयीभूतं जीवस्वभावगुणतया मूलभाषातया प्राकृतगीर्ष्वप्युदाहरणवर्णनम्। गलितकादौ तु तानि तत्रैवोपनिबद्धानि। पञ्चमे त्वध्यायेऽत्रोत्साहादीनि छन्दांसि मुख्यतया व्यावर्णितापभ्रंशभाषोदाहरणानि ख्यापितानि। षष्ठे षट्पदीचतुष्पदीनां शासनम्। सप्तमे चानेकधा व्यावर्ण्य द्विपद्यभिधानमतिरुचिरतरं प्रकरणं प्रान्ते प्रस्तारनष्टोद्दिष्टसर्वैकादिगलक्रियासङ्ख्याध्वयोगाख्याः षट् प्रतिपादिताः प्रत्ययाःप्रत्येयाः प्रतीतप्रतिभानामष्टमेऽध्याये सूरिभिः। तदेवमतीवोपयोगिनोऽस्यारब्धं मुद्रणं मोहमयीनगरीवास्तव्यगुणगरीयस्त्वलब्धगुरुगरिम्णा श्रीसङ्घेन परयास्माकमखिलश्रमणसङ्घपादपङ्कजचञ्चरीकायमानानां प्रेरणया। क्षन्तव्यं च क्षान्त्यादिनिखिलाक्षतगुणांगारतया रत्नाकरायमाणैर्निर्मानैरमेयगुणरत्नरत्नाकरायमानश्रीमज्जिनवरोदितोदितोदितशासनशासनप्रभावकैर्वितीर्य दयां मन्तुक्षमामूलभूतामस्मास्विति प्रार्थयामहे आत्मगुणलीनमानसचरणपङ्कजषट्पदा आनन्दोदन्वदभिधानाः॥

नवसार्यां रमासारपूर्णायामार्यराजनि।
श्रीपार्श्वपादपूतायामपूर्यानन्दसाधुभिः॥ १॥

एतन्मुद्रणाधारभूता प्रतिः श्रीराजनगरीयश्रीउमाभ्रातृश्रेष्ठिभाण्डागाराल्लब्धपूर्वा दुर्लभैव च प्रतिरस्येति भविष्यन्त्यशुद्धयः प्रचुरा अत्र। ज्ञापनीया वयं परं ता यतो द्वितीयसंस्करणे भविष्यन्ति सह भव्यजनैरस्माकमुपकारकारिण्यो द्रुततरमिति प्रार्थनावधारणीया धीमद्भिर्भवद्भिः।

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

कचित्किञ्चिदनुसृत्य भवेन्मतान्तरमुपन्यस्तं नामान्तरमिति छन्दोरचनाकर्तृणामपरेषामभिप्रेतानि आख्यानान्तराणि दिदर्शयिषया वाहुल्यं केवलं भरतस्यैकस्यापि मतेनेति तन्नाम्नाऽन्यनाम्ना चान्यानि समुदितानि संगृहीतान्यत्राभिधानान्तराणि । अन्यनामनि यत्रोपलब्धो विशेषो लिखितः सोऽपि (              ) इति चिह्ने कृत्वान्तरे । भविष्यति च विदुषामेतदवलोकनेनापि सकलप्रमाणपथावतीर्णच्छन्दोऽनुशासनप्रवणापरग्रन्थनवनीतास्पदत्वमस्य च्छन्दोऽनुशासनाभिधानस्य शास्त्रस्य ॥

## भरतमते.

३ केशा–धूः
मृगी–तडित्
मदनः–रजनी

४ सुमुखी–ललिता
विलासिनी–जया
समृद्धिः–पुण्यम्
सुमतिः–भ्रमरी

५ विदग्धकः–वागुरा
पङ्क्तिः–कुन्तलतन्वी
सती–शिखा
अधिमुखी–कमलमुखी

६ रमणी–नलिनी
शशिवदना–मकरशीर्षा
मुकुलं–वीथी
शफरिका–गिरा

७ उष्णिक्–शिखा
कलिका–भोगवती
हरिविलसितं–गतिः

८ प्रमाणी–मत्तवेष्टितम्

९ भुजगशिशुसृता–मधुकरिका

१० पणवः–कुवलयमाला (मन्सगाः इत्यपि)
रुक्मवती–पुष्पसमृद्धिः

११ श्रीः–रुचिरा (यत्यनियमे प्रत्यवबोधः)
स्वागता–अपरवक्त्रम्
सुमुखी–द्रुतपादगतिः
कमलदलाक्षी–रुचिरमुखी

१२ द्रुतविलम्बितं–हरिणप्लुतम्
भुजङ्गप्रयातम्–अप्रमेया
स्रग्विणी–पद्मिनी

१३ नन्दिनी–मनोवती

१५ मालिनी–नान्दीमुखी

१६ ऋषभगजविलसितं–मत्तगजविलसितम्

१७ पृथ्वी–विलम्बितगतिः
मन्दाक्रान्ता–श्रीधरा

---

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

## अन्यमते.

२ स्त्री-पद्मम्
पदम्-पुष्पम्
६ पङ्क्तिः-अक्षरोपपदा
अधिमुखी-मृगचपला
शशिवदना-मुकुलिता
७ कलिका-सोपानम्
हारविलसितम्-चपला
मधुकरिका-वज्रम्
९ कामिनी-तरङ्गवती
१० रुक्मवती-चम्पकमाला
,, -सुभावा
कुमुदिनी-कुसुमसमु-
दिता
माला-प्रमिता
११ श्रीः-सान्द्रपदम्
श्येनी-निःश्रेणिका
१२ वंशस्थं-वसन्तमञ्जरी
,, -अभ्रवंशा
कलहंसः-द्रुतपदा

,, -मुखरम्
उज्ज्वलं-चपलनेत्रा
कुसुमविचित्रा-मदनवि-
कारा
,, -गजलुलितम्
कल्याणं-काञ्चनम्
प्रियंवदा-मत्तकोकिलम्
वैश्वदेवी-चन्द्रकान्ता
मालती-वरतनुः
प्रमुदितवदना-गौरी
,, -चञ्चलाक्षी
तामरसं-कमलविला-
सिनी
विभावरी-वसन्तचत्व-
रम्
मेघावली-वसन्ता
१३ सुवक्त्रा-अचला
कुटिलगतिः-नर्त्तकी
नन्दिनी-कनकप्रभा;

जया; सुमंगली
कुटजं-भ्रमरः
त्वरितगतिः-लघुग-
तिः-चपला
१४ वसन्तः-नान्दीमुखी
वसन्ततिलका-उद्धर्-
षिणी ( सैतवः )
सिंहोन्नता-काश्यपः
वलना-लता
धृतिः-मणिकटकम्
स्खलितं-महिता,
कान्ता, वनमयूरः
कुटिलं-हंसश्येनी
१५ शशिकला-चन्द्रावर्ता
( पिङ्गलः )
स्रक्-माला ( ,, )
चित्रा-मण्डूकी-चञ्चला
कलभाषिणी-अरविन्द-
कम्

सुन्दरं-मणिभूषणं,
रमणीयम्
१६ संगतं-पद्ममुखी, सुरता,
समुद्धरणसोपानकम्
कामुकी ( सुगौ )-सो-
मड़कम्
जयानन्दं-प्रवरललि-
तम्
१७ वंशपत्रपतितं-वंशदलम्
अतिशायिनी-यादवी
हरिणी-वृषभललितम्
अवितथं-नर्कुटकं (जय-
देवः )
१८ काञ्ची-वाचालकाञ्ची
उज्ज्वलं-मालिका-उत्त-
रमालिका
निशा-तारका
भङ्गी-विच्छित्तिः
१९ मेघविस्फूर्जिता-रम्भा



P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

## अन्यमते.

| | | | |
|---|---|---|---|
| (स्वयम्भूः) | कामलता-उपमालिका | २३ हंसगतिः-महातरुणीद-यितम् | (अर्धसमे) मालभारिणी-नितम्बिनी |
| वञ्चितं-विचितम् | २१ सिद्धिः-चित्रलता, रुचिरा, शशिवदना | | |
| २० मुद्रा-उज्ज्वलम् | | २४ मेघमाला-भङ्गाब्जनीलालका | (विषमे) कलिका-मंजरी |
| चित्रमाला-सुप्रभा | २२ मदिरा-लताकुसुमम् | | (पिङ्गलः) |

उपक्रान्तिश्छन्दसामकाराद्यनुक्रमेण नात्राचीर्णा यतो मूलमत्र पार्थक्येन मुद्रितमेव, उदाहरणसूची तु नैवैतादृशे प्रकरणे उपयोगिनीति न तत्राद्रियामहे यदि च भविष्यति द्वितीयावृत्तौ सोपयोगितास्याः तामपि प्रकाशयिष्यामः ॥

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

॥ श्रीगणधरेन्द्राय नमः ॥

# । कलिकालसर्वज्ञश्रीमद्धेमचन्द्राचार्यप्रणीतं छन्दोऽनुशासनम् ।

**वाचं ध्यात्वाऽऽर्हतीं सिद्ध-शब्दकाव्यानुशासनः ।**
**काव्योपयोगिनां वक्ष्ये, छन्दसामनुशासनम् ॥ १ ॥**

सर्वादिमध्यान्तग्लौ त्रिकौ म्नौ भ्यौ ज्रौ स्तौ वर्णगणाः । १ । द्वित्रिचतुष्पञ्चषट्कला दतचपषा द्वित्रिपञ्चाष्टत्रयोदशभेदा मात्रागणाः । २ । समानेनैकादिग्लौ । ३ । ह्रस्वो लऋजु । ४ । वान्ते ग्वक्रः । ५ । ≍ क ≍ पविसर्गानुस्वारव्यञ्जनाह्लादिसंयोगे । ६ । दीर्घप्लुतौ । ७ । स द्विमात्रः । ८ । एदोतौ पदान्ते प्राकृते ह्रस्वौ वा । ९ । तुर्योऽंशः पादोऽविशेषे । १० । वृत्तम् । ११ । समैः पादैः समम् । १२ । समार्धमर्धसमम् । १३ । अत्यद्विषमम् । १४ । श्रव्यो विरामो यतिः[३] । १५ । त्र्यादिर्गादिः । १६ । इति संज्ञाध्यायः प्रथमः ।

॥ छन्दः । १ । पादः । २ । एकाक्षरोक्ता जातिः । ३ । अत्युक्तामध्याप्रतिष्ठासुप्रतिष्ठागायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्ज-

---

१ SSS म, ।।। न, S।। भ, ।SS य, ।S। ज, S।S र, ।।S स, SS। त २ S, ।। द ।S, S।, ।।। त SS, ।।S, ।S।, S।।, ।।।। च ।SS, S।S ।।।S, SS।, ।।S।, ।S।।, S।।।, ।।।।। प । SSS, ।।SS, ।S।S, S।।S, ।।।।S, ।SS।, S।S।, ।।।S।, SS।।, ।।S।।, ।S।।।, S।।।।, ।।।।।। ष । ३ यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः । गादिच्छिन्नपदान्ते च लुप्तालुप्तविभक्तिके । १ । क्वचित्तु पदमध्येऽपि गकारादौ यतिर्भवेत् । यदि पूर्वापरौ भागौ न स्यातामेकमात्रकौ । २ । पूर्वान्तवत्स्वरः सन्धौ क्वचिदेव परादिवत् । नित्यं प्राक्पदसम्बद्धाश्चादयः प्राक्पदान्तवत् । ३ । परेण नित्यसम्बद्धाः प्रादयश्च परादिवत् ।

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

गत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतय एकैकवृद्धाः ।४ । कृतिः प्राङ्‌विसमभ्युदश्च कृतिः । ५ । उक्तायां गः श्रीः । ६ । अत्युक्तायां गौ स्त्री ।७। लौ मदः । ८ । ग्लौ दुःखम् । ९ । ल्गौ सुखम् । १० । २/४ मध्यायां मो नारी । ११ । यः केशा । १२ । रो मृगी । १३ । सो मदनः । १४ । ३/४ प्रतिष्ठायां म्गौ कन्या । १५ । भ्गौ सुमुखी । १६ । ज्गौ विलासिनी । १७ । गौ समृद्धिः । १८ न्गौ मृगवधूः । १९ । य्गौ व्रीडा । २० । स्गौ सुमतिः । २१ । त्गौ सोमप्रिया । २२ । ४/८ सुप्रतिष्ठायां रो गौ प्रीतिः । २३ । ल्गौ विदग्धकः । २४ । भो गौ पङ्क्तिः । २५ । भ्लगा रतिः । २६ । जो गौ सती । २७ । त्लगा नन्दा । २८ । य्लगा जया । २९ । म्लगाः सावित्री । ३० । सो गौ घनपङ्क्तिः । ३१ । न्लगा अभिमुखी । ३२ । ५/१० गायत्र्यां मौ सावित्री । ३३ । म्रौ तटी । ३४ । सौ रमणी । ३५ । त्यौ तनुमध्या । ३६ । स्भौ गुरुमध्या । ३७ । यौ सोमराजी । ३८ । न्यौ शशिवदना । ३९ । मौ मालिनी । ४० । भ्यौ कामलतिका । ४१ । म्सौ मुकुलम् । ४२ । त्रौ शफरिका । ४३ । नौ कच्छपी । ४४ । भ्रौ लघुमालिनी । ४५ । स्यौ विमला । ४६ । त्रौ जला । ४७ । म्यौ सुनन्दा । ४८ । भ्मौ विक्रान्ता । ४९ । स्मौ सूचीमुखी । ५० । य्मौ शिखण्डिनी । ५१ । ६/१२ उष्णिहि मौ गो गान्धर्वी । ५२ । जौ ग उष्णिग् । ५३ । ज्सौ गः कुमारललिता । ५४ । म्सौ गो मदलेखा । ५५ । सौ ग उद्धता । ५६ । त्सौ गो भ्रमरमाला । ५७ । रौ गो हंसमाला । ५८ । भौ गः कलिका । ५९ । भ्सौ गो विधुवक्त्रा । ६० । म्भौ गः सरलम् । ६१ । भ्नौ गश्चित्रम् । ६२ । नौ गो हरिविलसितम् । ६३ । भ्जौ गः शारदी । ६४ । लगा मधुकरिका । ६५ । स्जौ गो विमला । ६६ । ज्रौ गः सुभद्रा । ६७ । न्यौ गः कुमुद्वती । ६८ । य्सौ गो मुदिता । ६९ । त्रौ गो मनोज्ञा । ७० । स्त्रौ गो दीप्ता । ७१ । ७/२० अनुष्टुभि त्रौ गौ विभा । ७२ । यौ ल्गावनुष्टुब् । ७३ । गीर्गीर्विद्युन्माला । ७४ । भौ गौ चित्रपदा । ७५ । त्रौ ल्गौ सुमालती । ७६ । भ्तौ ल्गौ माणवकं घैः । ७७ । त्रौ ल्गौ नाराचम् । ७८ । म्नौ गौ हंसरुतम् । ७९ । न्जौ ल्गौ ललितगतिः । ८० । जौ गौ सिंहलेखा । ८१ । ज्रौ ल्गौ प्रमाणी । ८२ । जौ ग्लौ समानी । ८३ । न्सौ गौ गुणलयनी । ८४ । सौ ल्गौ मही । ८५ । नौ गौ रतिमाला ।८६। अन्यद्वितानम् । ८७ । ९/१६ बृहत्यां भो मौ वक्त्रं ङैः । ८८ । नो रौ बृहतिका । ८९ । नेसा हलमुखी । ९० । नौ मो भुजग-

१ ग्नभ्यज्रस्ता अब्धिशङ्खशुभ्रदुग्धाख्यानि ।



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

शिशुसृता । ९१ । भजसा उदयम् । ९२ । भौ र उत्सुकम् । ९३ । नंरा भद्रिका । ९४ । नौ र उपच्युतम् । ९५ । स्जसा अक्षि । ९६ । मः सौ कनकम् । ९७ । सौ मस्तारम् । ९८ । सिः सौम्या । ९९ । तभ्या रुचिरा । १०० । नस्या विशाला । १०१ । तन्मा मकरलता । १०२ । नज्या शशिलेखा । १०३ । नौ सो लघुमणिगुणनिकरः । १०४ । मभसाः सिंहाक्रान्ता । १०५ । रत्राः कामिनी । १०६ । १० पङ्क्तौ मभस्गा मत्ता घैः । १०७ । यंज्गाः पङ्क्तिका । १०८ । मस्जगाः शुद्धविराट् । १०९ । मन्यगाः पणवो ङैः । ११० । रज्रगा मयूरसारिणी । १११ । नज्नगास्त्वरितगतिः । ११२ । भ्मस्गा रुक्मवती ।११३। भिगौ चित्रगतिः । ११४ । निगौ निलया । ११५ । जिगावुषिता । ११६ । रः सौ गो मणिरङ्गः । ११७ । भ्नौ म्गौ वन्धूकम् । ११८ । त्रज्गा मनोरमा । ११९ । तो जौ ग उपस्थिता । १२० । मैस्गाः कलिका । १२१ । भलगा मृगचपला । १२२ । मो नौ गः कुमुदिनी । ११३ । मः सौ ग उद्धतम् ।१२४। नज्यगा विपुलभुजा । १२५ । स्जस्गा माला । १२६ । ११/२० त्रिष्टुभि भौ रो गौ रोचकम् । १२७ । रः सौ ल्गौ अच्युतम् । १२८ । तिगौं लयग्राहि । १२९ । भिगौं दोधकम् । १३० । सिल्गा विदुषी । १३१ । भत्ला गौ श्रीर्ङैः । १३२ । तो जौ गावुपस्थिता । १३३ । जस्ता गावुपस्थितम् । १३४ । मस्तौ गौ शालिनी घैः । १३५ । मभता गौ वातोर्मी । १३६ । मो भौ गौ वा । १३७ । मभ्नलगा भ्रमरविलसितम् । १३८ । नौ सो गौ वृन्ता । १३९ । न्यभा गौ पतिता चैः । १४० । नंरल्गा रथोद्धता । १४१ । नंभा गौ स्वागता । १४२ । नौ रल्गा भद्रिका । १४३ । रत्रलगाः श्येनी । १४४ । नो जौ ल्गौ सुमुखी । १४५ । मस्जा गावेकरूपम् । १४६ । तो जौ ल्गौ मोटनकम् । १४७ । तभजलगा उत्थापनी । १४८ । तो नौ ल्गौ मुखचपला । १४९ । न्यनल्गाः कमलदलाक्षी । १५० । स्सनल्गा विमला । १५१ । नस्ला गावशोका । १५२ । सज्या ल्गौ सारणी । १५३ । तौ जो गाविन्द्रवज्रा । १५४ । जतजा गावुपेन्द्रवज्रा । १५५ । एतयोः परयोश्च सङ्कर उपजातिश्चतुर्दशधा । १५६ । सर्वजातीनामपीति वृद्धाः । १५७ । १२/११ जगत्यां तौ ज्राविन्द्रवंशा । १५८ । जतज्रा वंशस्थम् । १५९ । नभज्या कलहंसा । १६० । नंभसाश्चन्द्रवर्त्म । १६१ । सीस्तोटकम् । १६२ । नभभ्रा द्रुतविलम्बितम् । १६३ । नौ म्यौ पुटो जैः । १६४ । नौ म्रौ ततम् । १६५ । नौ भ्रावुज्ज्वला । १६६ । तीः

---

१ ऽ।।।, ।ऽ।।, ऽऽ।।, ।।ऽ।, ऽ।ऽ।, ।ऽऽ।, ऽऽऽ।, ।।।ऽ, ऽ।।ऽ, ।ऽ।ऽ, ऽऽ।ऽ, ऽ।ऽऽ, ।।ऽऽ, ।ऽऽऽ,



P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

कामावतारः । १६७ । न्यौ न्यौ कुसुमविचित्रा । १६८ । ज्सज्ला जलोद्धतगतिश्चैः । १६९ । यीर्भुजङ्गप्रयातम् । १७० । रीः स्रग्विणी । १७१ । जीर्मौक्तिकदाम । १७२ । मीः कल्याणम् । १७३ । नाद्भज्राः प्रियंवदा । १७४ । ताल्ललिता । १७५ । स्जौ सौ प्रमिताक्षरा । १७६ । मौ यौ वैश्वदेवी ङैः । १७७ । म्भौ स्मौ जलधरमाला घैः । १७८ । न्जौ भ्यौ नवमालिनी जैः । १७९ । न्जौ ज्रौ मालती । १८० । नौ रौ प्रमुदितवदना । १८१ । सा प्रभा छैः । १८२ । न्जज्यास्तामरसम् । १८३ । ज्रज्रा विभावरी । १८४ । र्यन्याः कुमुदिनी । १८५ । भ्तौ न्सौ ललना ङैः । १८६ । नौ यौं कामदत्ता । १८७ । नो रिमेघावली । १८८ त्यौ त्यौ पुष्पविचित्रा । १८९ । सा मणिमाला चैः । १९० । स्यौ स्यौ केकिरवम् । १९१ । निसौ ह्रीः । १९२ । ज्सौ स्यौ कोलः । १९३ । १२/२६ अतिजगत्यां नतिगा उर्वशी । १९४ । न्जौ ज्रौ गः सुवक्त्रा । १९५ । भीगावङ्करुचिः । १९६ । म्नौ ज्रौ गः प्रहर्षिणी गैः । १९७ । ज्भौ स्जौ गो रुचिरा घैः । १९८ । म्तौ य्सौ गो मत्तमयूरम् । १९९ । नौ त्रौ गः क्षमा । २०० । मौ जौ गः श्रेयोमाला । २०१ । नौ तौ गः कुटिलगतिश्छैः । २०२ । नौ म्रौ गः क्षमा । २०३ । यमौ रौ गश्चन्द्रिणी चैः । २०४ । नौ यौं गश्चन्द्रिका । १०५ । ज्तौ स्जौ गो मञ्जुभाषिणी । २०६ । न्सौ रौ गश्चन्द्रलेखा । २०७ । न्सौ जौ गो लयः । २०८ । न्सौ तौ गो विद्युन्मालिका । २०९ । स्जौ स्जौ गो नन्दिनी । २१० । न्जौ न्सौ गो मदललिता । २११ । स्जौ सौ गः कुटजम् । २१२ । नौ त्सौ गो गौरी । २१३ । त्भौ स्जौ गो लक्ष्मीः । २१४ । त्भौ जौ गोऽभ्रकम् । २१५ । म्तौ स्नौ गः कोडुम्भो ङैः । २१६ । स्यौ सजौ गः सुदन्तम् । २१७ । नौ सौ गः कमलाक्षी । २१८ । नीगौ त्वरितगतिः । २१९ । १३/२६ शक्वर्यां नौ सौं लगावपराजिता छैः । २२० । म्सौ म्भौ गावलोला । २२१ । नौ भ्नौ लगौ प्रहरणकलिता । २२२ । नौ म्यौ लगौ करिमकरभुजा । २२३ । नौ तौ गौ वसन्तः । २२४ । म्रौ तौ गौ लक्ष्मीः । २२५ । मो रौ सो लगौ जया । २२६ । म्रम्यलगा ज्योत्स्ना । २२७ । नम्रसलगाः सिंहः । २२८ । ज्सौ नौं गौ राजरमणीयम् । २२९ । म्तौ न्सौ गावसम्बाधा ङैः । २३० त्भौ जौ गौ वसन्ततिलका । २३१ । नौं भौ गौ वलना । २३२ । म्रम्रलगाः सुकेसरम् । २३३ । नीर्गावुपचित्रम् । २३४ । न्जभ्जलगा धृतिः । २३५ । भौ रसलगा दर्दुरकः । २३६ । भ्जस्ना(द्गौ) स्खलितम् । २३७ । लगौ चेदिन्दुवदना ।२३८।

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

न्भन्ता गौ शरभललितम् । २३९ । तच्छरभा घचैः । २४० । म्भन्या गौ कुटिलम् । २४१ । १४/२२ अतिशक्कर्यां स्जस्या ऋषभः । २४२ । नीसौ शशिकला । २४३ । सा स्त्रकैः । २४४ । मणिगुणनिकरो जैः । २४५ । नौ म्यौ यो मालिनी । २४६ । नौ मो रौ चन्द्रोद्योतः । २४७ । नौ तम्रा उपमालिनी । २४८ । मियौं चित्रा । २४९ । माद्रम्ययाश्चन्द्रलेखा छैः । २५० । राद्वा । २५१ । स्जनन्या एला डैः । २५२ । न्जभज्राः प्रभद्रकम् । २५३ । र्जर्जरास्तूणकम् । २५४ । नो जौ भ्रौ कलभाषिणी । २५५ । रान्नभभ्राः सुन्दरम् । २५६ । नाद्वौः । २५७ । नौ रो यौ भोगिनी । २५८ । त्जसस्याः शिशुः । २५९ । भ्यसस्याः केतनम् । २६० । त्भौ जौ रो मृदङ्गः । २६१ । मुः कामक्रीडा । २६२ । १५/२१ अष्टौ नज्रा भौ गो मणिकल्पलता । २६३ । भीः स्गौ शरमाला । २६४ । भुगौ संगतम् । २६५ । मुगौ कामुकी । २६६ । सुगौ वा । २६७ । नुगौ चलधृतिः । २६८ । नुला-वचलधृतिः । २६९ । न्भौ जिगौ मङ्गलमङ्गना वैः । २७० । भ्रनिगा ऋषभगजविलसितं छैः । २७१ । निजस्गा ललितपदं ङैः । २७२ । यमन्सर्गा जयानन्दं चैः । २७३ । भ्रौ त्रौ न्गौ महिषी ञैः । २७४ । म्भौ न्मौ न्गौ मदनललिता घचैः । २७५ । न्जभ्जर्गा वाणिनी । २७६ । नजिर्गा वा । २७७ । ज्रज्रज्गाः पञ्चचामरम् ।२७८ । र्जर्जर्गाश्चित्रम् । २७८ । स्नस्तर्गाः सुरत-ललिता । २८० । भ्रौ न्भौ भगौ शैलशिखा । २८१ । भ्रौ य्नौ न्गौ वरयुवतिः । २८२ । नींगा ललना । २८३ । सौ नौ मो गो वेल्लिता । २८४ । म्तौ स्तौ तगौ कोमललता घङैः । २८५ । १६/२३ अत्यष्टौ यम्नस्भल्गाः शिखरिणी चैः । २८६ । ज्सज-स्यल्गाः पृथ्वी जैः । २८७ । भ्रौ न्भौ न्लौ गो वंशपत्रपतितं ञैः । २८८ । सौ ज्भौ जो गावतिशायिनी । २८९ । मो भ्नौ तौ गौ मन्दाक्रान्ता घचैः । २९० मभ्नरसल्गा भाराक्रान्ता । २९१ । मभ्नम्यल्गा हारिणी । २९२ । न्सौ म्रौ स्लौ गो हरिणी चधैः । २९३ । नः सौ तौ गौ पद्मम् ।२९४ । नसम्यल्गा रोहिणी । २९५ । नुगौं वसुधारा ङैः । २९६ । न्जभ्जजा ल्गाववितथम् । २९७ । तत्कोकिलकं छचैः । २९८ । गौ चेद्वाणिनी । २९९ । १७/१४ धृत्यां म्रभ्या रौ काञ्ची टैः । ३०० । भिम्भसा मणिमाला । ३०१ । मला यिः कुसुमलतावेल्लिता ङचैः । ३०२ । घछैश्चित्रलेखा । ३०३ । मभ्ना यिश्चन्द्रलेखा । ३०४ । म्भन्जभ्राश्चलम् । ३०५ । म्भौ न्यौ रौ केसरम् । ३०६ । नौ मौ यौ चन्द्रमाला छधैः । ३०७ । नौ म्तौ भ्रौ

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

ललितम् । ३०८ । भ्रनिसा भ्रमरपदं झैः । ३०९ । म्सौ ज्सौ त्सौ शार्दूलललितं ठैः । ३१० । म्तन्जभ्राः कुरङ्गिका ङछैः । ३११ । न्सौ मौ यावनङ्गलेखा चङैः । ३१२ । सौं जौ भ्राबुज्ज्वलं जैः । ३१३ । नौ रीर्निशा ङैः । ३१४ । नौ सौ त्यौ पङ्कजवक्त्रा घझैः । ३१५ । स्रज्नभ्साः सुरभिस्त्रिङैः । ३१६ । य्मौ न्सौ त्सौ क्रीडा चचैः । ३१७ । न्सौ म्तौ भ्रौ हरिणीपदं चघैः । ३१८ । भीन्या भङ्गिः । ३१९ । स्जौ स्जौ त्रौ बुद्बुदम् । ३२० । १८/२१ अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं छैः । ३२१ । म्सौ ज्सौ न्जौ गो वायुवेगा । ३२२ । य्मौ न्सौ रौ गो मेघविस्फूर्जिता चचैः । ३२३ । य्मौ न्सौ जौ गो मकरन्दिका । ३२४ । य्मौ न्सौ तौ गश्छाया । ३२५ । त्रिर्जसौ गो रतिलीला । ३२६ । म्तौ न्सौ रौ गः पुष्पदाम ङछैः । ३२७ । म्तौ न्सौ तौ गो वञ्चितम् । ३२८ । य्मौ नौ रौ गो मुग्धकं चछैः । ३२९ । रः सौ तो जौ ग ऊर्जितं जैः । ३३० । नभ्रसा जौ गस्तरलम् । ३३१ । म्रौ भः सौ ज्गौ माधवीलता छैः । ३३२ । सूगौ तरुणीवदनेन्दुः । ३३३ । १९/१३ कृतौ म्रौ भ्नौ य्मौ ल्गौ सुवदना छछैः । ३३४ । दशाग्ला वृत्तम् । ३३५ । स्भौ नौं म्यौ ल्गौ मत्तेभविक्रीडितं ङैः । ३३६ । नो भौ मः सौ ल्गौ मुद्रा टैः । ३३७ । य्मौ नौ तौ गौ शो।श चछैः । ३३८ म्रौ भ्नौ तौ गौ चित्रमाला छचैः । ३३९ । म्नौ स्लौ म्यौ ल्गौ सद्रत्नमाला ङजैः । ३४० । भीरसल्गा नन्दकम् । ३४१ । भ्रौ न्भौ भ्रौ ल्गौ कामलता । ३४२ । भ्नौ य्नौ त्रौ ल्गौ दीपिकाशिखा गचैः । ३४३ । त्भौ ज्भौ ज्भौ ल्गौ शशाङ्करचितम् । ३४४ । २०/११ प्रकृतौ म्रौ भ्नौ यिः स्रग्धरा छछैः । ३४५ । त्रौ भ्नौ ज्भौ रः कथागतिः । ३४६ । भ्रौ त्रौ त्रौ रो ललितविक्रमो ञैः । ४४७ । मौ तनिसा मत्तक्रीडा जङैः । ३४८ । जंतनिसाश्चन्दनप्रकृतिः । ३४९ । न्जभजिराः सिद्धिः । ३५० । नजीभ्रा वनमञ्जरी । ३५१ । त्रिर्नौ रस्तरंगः । ३५२ । २१/८ आकृतौ भ्रौ त्रौ त्रौ न्गौ मद्रकं ञैः । ३५३ । स्तौ त्नौ स्नौ गौं महास्रग्धरा जछैः । ३५४ । भृगौ मदिरा । ३५५ । मत्यनीगा वरतनुः । ३५६ । म्सौ ज्सौ ज्सौ जगौ दीपार्चिः ठैः । ३५७ । २२/५ विकृतौ न्जौ भ्जौ भ्जौ भ्लौ गश्च ललितं टैः । ३५८ । मौ तौ नील्गा मत्ताक्रीडा जङैः । ६५९ । ताज्जूल्गाः शङ्खः । ३६० । नाद् हंसगतिः । ३६१ । त्रिर्नौ र्ल्गाश्चित्रकम् । ३६२ । भ्मौ स्भौ निग्लाश्चपलगतिः । ३६३ । ज्सौ ज्सौ यिल्गा वृन्दारकम् । ३६४ । २३/७ संकृतौ भ्तौ न्सौ भौ न्यौ तन्वी

॥ ८ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

ठैः । ३६५ । नौ भ्नौ ज्नौ न्यौ ललितलता छछैः । ३६६ । नौ रूर्मेघमाला । ३६७ । भृः सुभद्रम् । ३६८ । भितनिसा द्रुतलघुपदगतिः । ३६९ । न्यौ भ्तौ निसौ संभ्रान्ता । ३७० । म्सौ ज्सौ तौ भ्रौ विभ्रमगतिः । ३७१ । २४/७ अभिकृतौ भ्मस्भनीगाः क्रौञ्चपदा ङ्ङ्जैः । ३७२ । नीसभिगा हंसलयो जछैः । ३७३ । त्यौ भौ नीगौ हंसपदा ञैः । ३७४ । न्जज्या नीगौ चपलम् । ३७५ । २५/४ उत्कृतौ मौ तो निरसल्गा भुजङ्गविजृम्भितं जटैः । ३७६ । मनूसगगा अपवाहो झचचैः । ३७७ । भो नौ स्सौ निल्गा आपीडो ढैः । ३७८ । न्जौ न्सौ भनिल्गा वेगवती । ३७९ । नजभजिभ्जल्गाः सुधाकलशो ढैः । ३८० । २६/५ उत्कादिजातिप्रकरणम् । शेषजातौ मतिनायि मालाचित्रं टैः । ३८१ । २७/९ म्तौ य्तौ निर्सल्गाः प्रमोदमहोदयो घछटैः । ३८२ । २९/१ द्विर्भजसना भ्यौ नृत्तललितम् । ३८३ । ३०/१ द्वादशना ल्गौ ललितलता त्रिञैः । ३८४ । ३८/१ मातनीजभ्राः पिपीलिका जणैः । ३८५ । ३०/१ एषैव नीपरतः पञ्चदशपञ्चदशलवृद्धा क्रमेण करभपणवमालाः । ८६/३५ ८७/४० ८८/४५ । शेषजातिप्रकरणम् । अथ दण्डकाः । नार्क्रै चण्डवृष्टिः । ३८९ । यथोत्तरमेकैकरवृद्धा अर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः । ३९० । ३९१ । ३९२ । ३९३ । ३९४ । ३९५ । ३९६ । नाभ्यां रवद्यादयः प्रचितः । ३९७ । नग्भ्यामष्टादिराः पन्नगदम्भोलिहेलावलीमालतीकेलिकङ्केल्लिलीलाविलासादयः । ३९८ । ३९९ । ४०० । ४०१ । ४०२ । ४०३ । ४०४ । लोर्यथेष्टं राश्चण्डकालः । ४०५ । याः सिंहविक्रान्तः । ४०६ । लूगिभ्यां मेघमाला । ४०७ । यथेष्टं रा मत्तमातङ्गः । ४०८ । साः कुसुमास्तरणः । ४०९ । याः सिंहविक्रीडः । ४१० । ल्गावनङ्गशेखरः । ४११ । ग्लावशोकपुष्पमञ्जरी । ४१२ । तागौ कामवाणः । ४१३ । भागौ भुजङ्गविलासः । ४१४ । नाभ्यां पञ्चमात्रैरुत्कलिका । ४१५ । इति दण्डकप्रकरणम् । इति समवृत्तव्यावर्णनो द्वितीयोऽध्यायः । सू ४०१ छं ४१० ।

। ओजयुजोः । १ । सिल्गा नभभ्रा हरिणप्लुता । २ । सिल्गा भिगगा उपचित्रम् । ३ । लोनं वेगवती । ४ । भिगगा नजज्या द्रुतमध्या । ५ । तज्रगा मस्जगगा भद्रविराट् । ६ । सजस्गा भर्नगगाः केतुमती । ७ । ताजगगा जतजगगा आख्यानकी । ८ । व्यत्यये विपरीतादिः । ९ । जैर्जो ज्रज्रगा यववती । १० । व्यत्यये षट्पदावली । ११ । नभभ्रा नभिरा म-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

करावली । १२ । मसागाः सभासाः करिणी । १३ । साञ्गाः सभल्गाः प्रबोधिता । १४ । नारल्गा नजज्रा अपरवक्रम् । १५ । गान्तं पुष्पिताग्रा । १६ । साञ्गगा स्भर्या मालभारिणी । १७ । भातल्गा न्जन्सगा विलसितलीला । १८ । भ्रन्जनल्गा अैर्न्जभजनसाष्टैर्मानिनी । १९ । रो ज्रल्गाः कामिनी । २० । रो ज्रज्राः शिखी । २१ । रो ज्रज्रा ज्गौ नितम्बिनी । २२ । रस्त्रिज्जौं ल्गौ वारुणी । २३ । रश्चतुर्ज्रौ वतंसिनी । २४ । कामिन्याद्या व्यत्यये वानरीशिखण्डिसारस्यपराहंस्यः । २५ । स्लगा सिल्गा इला । २६ । स्लगाः सृर्मृगाङ्कमुखी । २७ । न्लृलगा न्लृगौ शिखा । २८ । व्यत्यये खञ्जा । २९ । अर्धेयोर्वा । ३० । न्लृगावतिरुचिरा द्वयोः । ३१ । न्लृलगाश्च । ३२ । इत्यर्धसमप्रकरणम् छं ३५ । अथ विषमवृत्तान्युच्यन्ते । अनुष्टुभि नाद्यात्स्नौ तुर्याद्यो वक्रम् । ३३ । तद्युजोर्जः पथ्या । ३४ । ओजे विपरीतादिः । ३५ । नश्चपला । ३६ । युजोः षङ्गथो लो विपुला । ३७ । सैतवस्य चतुर्षु । ३८ । तुर्यान्नतभ्रम्सास्तद्विपुला । ३९ । इति वक्त्रप्रकरणम् छं २४ । एकोऽष्टाक्षरः पादश्चतुर्वृद्धाः क्रमात्परे पदचतुरूर्ध्वं चतुर्विंशतिधा । ४० । तदादौ द्विगं सर्वलं प्रत्यापीडः । ४१ । अन्ते च । ४२ । द्विगमापीडः । ४३ । स आद्यस्य द्वितीयादिना व्यत्यये कलिकालवल्यमृतधाराः । ४४ । इति पदचतुरूर्ध्वप्रकरणम् सप्तभिः स्जस्ला न्सज्गा भ्नजल्गा स्जसज्गाः पादेषूद्गता । ४५ । नैभगास्तृतीये सौरभकम् । ४६ । नौ सौ ललितम् । ४७ । उद्गताप्रकरणं त्रिभिः । म्सज्भगगाः स्नजरगाः नासौ निज्याः पादेषूपस्थितप्रचुपितम् । ४८ । नौ स्नौ न्सौ तृतीये वर्धमानम् । ४९ । तज्राः शुद्धविराडृषभम् । ५० । उपस्थितप्रचुपितप्रकरणम् त्रिभिः । पूर्वे अर्धे मुगौ परे न्लृलला: सौम्या । ५१ । व्यत्यये ज्योतिः । ५२ । इति विषमवृत्तप्रकरणम् छं ३९ । अथ मात्राछन्दांसि । ओजे षण्मात्रा र्लगन्ता युज्यष्टौ न युजि षट् सन्ततं ला न समः परेण गो वैतालीयम् । ५३ । र्यान्ता औपच्छन्दसकम् । ५४ । भगगान्ता आपातलिका । ५५ । युजि तिसृभ्यो गः प्राच्यवृत्तिः । ५६ । अयुज्याद्यलाद्ग उदीच्यवृत्तिः । ५७ । ते मिश्रे प्रवृत्तकम् । ५८ । वैतालीयादेर्युक्पादजापरान्तिका । ५९ । ओजजा चारुहासिनी । ६० । सर्वेष्वाद्यलाद्गो दक्षिणान्तिका । ६१ । ओजे चौ युजि षचौ लदलदान्तौ मागधी । ६२ । ओजजापश्चिमान्तिका । ६३ । युग्जोपहासिनी । ६४ । अजमुखश्चीर्गन्तो नवमे ले मात्रासमकम् । ६५ । ग्युपचित्रा



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

। ६६ । लौ पञ्चमाष्टौ (ष्टमौ) विश्लोकः । ६७ । नवमश्च चित्रा । ६८ । द्वादशश्च वानवासिका । ६९ । एभिः पादाकुलकम् । ७० । चो गीर्नटचरणं जैः । ७१ । चौ गौ चौ गौ नृत्तगतिष्ठैः । ७२ । चीनौंजे जो जो लीर्वान्तेऽनुप्रासे पद्धतिः । ७३ । मात्रासमकादिप्रकरणं नवभिः । इत्यर्धसमविषमवैतालीयमात्रासमकादिव्यावर्णनस्तृतीयोऽध्यायः

चृगौ षष्ठो जो न्लौ वा पूर्वेऽर्धे परे षष्ठो ल आर्या गाथा । १ । षष्ठे न्ले लाद्वितीयात्सप्तमे चाद्यात्पदमन्यार्धे च पञ्चमे । २ । आद्यच्चियतिः पथ्या । ३ । विपुलान्याद्यन्तसर्वभेदात्त्रिधा । ४ । ग्मध्ये द्वितीयतुर्यौ जौ चपला । ५ । द्विः पूर्वार्धे गीतिः । ६ । परार्धमुपगीतिः । ७ । द्वयोर्व्यत्यये उद्गीतिः । ८ । गीतिः सप्तमे पे रिपुच्छन्दा । ९ । तृतीये ललिता । १० । द्वाभ्यां भद्रिका । ११ । षष्ठं विनेष्टपैर्विचित्रा । १२ । चेऽष्टमे स्कन्धकम् । १३ । तत्षष्टे ल्युपात् । १४ । आद्येऽर्धे उदः । १५ । अन्त्येऽवात् । १६ । गीतिस्कन्धके संकीर्णम् । १७ । गाथाद्यर्धेऽन्त्यगात् प्राक् चो वृद्धौ जाती(ति)फलम् । १८ । चयोर्गाथः । १९ । क्रमवृद्ध्योद्यवसमुपात् । २० । गाथिनी । २१ । यथेष्टं मालागाथः । २२ । जाती(ति)फलाद्यर्धे गाथवद्दामादयः । २३ । मात्रा वर्णोना गा वर्णा गूना लः । २४ । इत्यार्याप्रकरणम् । पौ चौ तौ गलितकं यमितेऽङ्घ्रौ । २५ । तृतीये षष्ठे ल्युपात् । २६ । समेऽन्तरात् । २७ । पौ चौ पो वेः । २८ । चौ पः समः । २९ । षतीगाः शुभात् । ३० । चः पौ चौ त्रिः समात् । ३१ । तदोजे चतौ मुखात् । ३२ । षाचूनौंजे जः समे जो लीर्वा मालायाः । ३३ । चृर्गन्तो मुग्धात् । ३४ । चूरुग्रात् । ३५ । पौ तः सुन्दरात् । ३६ । पौ तौ भूषणा । ३७ । चपचापचालगा मालागलिता । ३८ । षश्चीः समे जो लीर्वा विलम्बिता । ३९ । गन्तचःपचुपाः खण्डोद्गतम् । ४० । चपाचीपाः प्रसृता । ४१ । चुर्दो नौजे जो लम्बिता । ४२ । सौजे पैर्विच्छित्तिः । ४३ । चापचपदा ललिता । ४४ । उभे विषमा । ४५ । तीचौ मुक्तावली । ४६ । पिचौ रतिवल्लभः । ४७ । पौ चषौ हीरावली । ४८ । इति गलितकप्रकरणम् । गलितकमेवायमकं सानुप्रासं समाङ्घ्रि खञ्जकम् । ४९ । तौ चितगाः खञ्जकम् । ५० । पचपचपा महातोणकः । ५१ । चीगौ सुमङ्गला । ५२ । चौ पः खण्डम् । ५३ । षचता उपात् । ५४ । षश्चौ खण्डिता । ५५ । त्रयोऽप्यवलम्बकः । ५६ । षश्चीर्युग्जो लीर्वा हेला । ५७ । सान्ते दोनावली । ५८ । चूपगा विनता । ५९ । तौ चस्तौ विलासिनी । ६० । तौ चितौ

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

मञ्जरी । ६१ । सा तान्ता सालभञ्जिका । ६२ । चादिः कुसुमिता । ६३ । षश्चुगौ द्वितीयषष्ठौ जो लीर्वा द्विपदी । ६४ । साद्ये न्ले छै रचिता । ६५ । गन्तारनालम् । ६६ । उपान्त्यलोना कामलेखा । ६७ । षचीदाश्चन्द्रलेखा । ६८ । चिपताः क्रीडनकं जैः । ६९ । षपचतदा अरविन्दकम् । ७० षलदलचदगाद्रौ मागधनर्कुटी ।७१ । सश्चेन्नर्कुटकम् । ७२ । षजौ सिः समात् । ७३ । त्रिष्वप्यन्त्यचस्य ते तरङ्गकम् । ७४ । गान्तं पवनोद्धूतम् । ७५ । चाभ्यां पाभ्यां पाद्वा तिर्निध्यायिका । ७६ । चुपौ युग्म जोऽधिकाक्षरा । ७७ । सा तुर्यपा मुग्धिका । ७८ । आदौ पश्चित्रलेखा । ७९ । पौ मल्लिका । ८० । सा तुर्यपा दीपिका । ८१ । ताभिर्लक्ष्मिका । ८२ । चतुष्पञ्चषट्सप्ताष्टनवपा मदनावतार-मधुकरी-नवकोकिला-कामलीला-सुतारा-वसन्तोत्सवाः । ८३ । इति खञ्जकप्रकरणम् । खञ्जकं दीर्घीकृतं शीर्षकम् । ८४ । गीत्यन्तावलम्बकौ द्विपदीखण्डम् । ८५ । द्विपद्यन्ते गीतिर्द्विभङ्गिका । ८६ । अन्यथापि । ८७ । द्विपद्यवलम्बकान्ते गीतिस्त्रिभङ्गिका । ८८ । त्रिभिरन्यैरपि । ८९ । गाथस्याद्यार्धं समैश्चैर्गात् प्राग्वृद्धमन्त्यस्य ते पादः समशीर्षकम् । ९० । मालागलितकपादान्ते विषमचावृद्धौ वेः ९१ । इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ आर्यागलितक-खञ्जक-शीर्षकव्यावर्णनो नाम चतुर्थोऽध्यायः

। अजश्चूस्तृतीयपञ्चमौ जो लीर्वोत्साहः । १ । दामात्रानो रासको ढैः । २ । चुलगा वा । ३ । चपजाया अवतंसकः । ४ । चः पौ जो गौ कुन्दः । ५ । पाचाजगाः करभकः । ६ । चपाचागा इन्द्रगोपः । ७ । चपाचालगाः कोकिलः । ८ । चपाचलगा दर्दुरः । ९ । चरजमगा आमोदः । १० । म्रलगाः पासौ विद्रुमः । ११ । रो मीर्मेघः । १२ । त्रयलगा विभ्रमः । १३ । चपजगगाः कुसुमः । १४ । ओजयुजोश्छडा रासः । १५ । पाचदाश्चिस्तृतीये पञ्चमे चो जो लीर्वा पश्चाङ्घ्रिस्त्रिपात्पूर्वार्धो मात्रा । १६ । द्वितीये तुर्ये तयोर्वाद्यस्य चः स्थाने पो मत्तवालिका । १७ । तृतीयस्य तो मत्तमधुकरी । १८ । तृतीये पञ्चमे तयोर्वा पोश्चौ मत्तविलासिनी । १९ । चस्य पो मत्तकरिणी । २० । आभिर्बहुरूपा । २१ । आसां तृतीयस्य पञ्चमेनानुप्रासेऽन्ते दोहकादि चेद्वस्तु रड्डा वा । ३० । मात्राप्रकरणम् । चौ लान्ततौ चौ तो वस्तुकम् । ३१ । षचिषा युज्यजच



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

ओजे जो लीर्वा वस्तुवदनकम् । ३२ । षोऽजचः षपौ रासावलयम् । ३३ । द्वयोरर्धसङ्करे सङ्कीर्णम् । ३४ । षचचाद्दो वदनकम् । ३५ । त उपवदनकम् । ३६ । ते यमितेऽन्तेऽडिला । ३७ । पिदावुत्थक्कः । ३८ । धवलमष्टपात्षट्पाच्चतुष्पात् । ३९ । तत्राष्टांह्रावोजे चिदौ समे चौ श्रीधवलम् । ४० । आद्ये तृतीये चिदौ द्वितीये तुर्ये चिः शेषे त्वोजे चातौ समे चादौ चिर्वा यशोधवलम् । ४१ । षडंह्रावाद्ये तुर्ये षादौ द्वितीये पञ्चमे चौ शेषे षाभ्यां चः पो वा कीर्त्तिधवलम् । ४२ । चतुरंह्रावोजे षश्चौ समे षचचाद्दस्तो वा गुणधवलम् । ४३ । षचताः षचौ भ्रमरः । ४४ । षचताः षचचा अमरम् । ४५ । आद्ययोः षची अन्त्ययोश्चुः सर्वत्रान्ते तो दो वा मङ्गलम् । ४६ । उत्साहादिना येनैव धवलमङ्गलभाषागाने तन्नामाद्ये धवलमङ्गले । ४७ । देवगानं फुल्लडकम् । ४८ । गाने चिदौ झम्बटकम् । ४९ । इति उत्साहादिप्रकरणम् ॥ इत्याचार्य-श्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ उत्साहादिप्रतिपादनः पञ्चमोऽध्यायः

सन्ध्यादौ कडवकान्ते च ध्रुवं स्यादिति ध्रुवा ध्रुवकं घत्ता वा । १ । सा त्रेधा षट्पदी चतुष्पदी द्विपदी च । २ । कडवकान्ते प्रारब्धार्थोपसंहारे आद्ये छड्डणिका च । ३ ध्रुवायां छैः कलाभिः पादे चतौ पदौ वा । ३ । जैः पतौ षदौ चौ वा । ४ । झैः षतौ तिः पचौ वा । ५ । ञैश्चादौ षचौ पौ वा । ६ । टैश्चपदं पचदं षदतं चातौ वा । ७ । ठैश्चपतं षचदं पादौ चिर्वा । ८ । डैः पातौ चापौ षचतं वा । ९ । ढैश्चिदौ षचचं वा । १० । णैश्चितौ पिर्वा । ११ । तैः षचादं चीर्वा । १२ । थैः षचातं चिपौ वा । १३ । तृतीयषष्ठयोर्दशादिसप्तदशान्ताः कलाः शेषेषु सप्त षट्पदी षट्पदजातिरष्टधा । १४ । अन्यावुपजातिः । १५ । नवावजातिः । १६ । चतुष्पदी वस्तुकं वान्तरसमार्धसमासङ्कीर्णा सर्वसमा च । १७ । चतुष्पदी कला ओजे सप्ताद्याः षोडशान्ताः समे प्रत्येकं सैकाः सप्तदशान्ताः । चम्पककुसुम-सामुद्रक-मल्हणक-सुभगविलास-केसर-रावणहस्तक-सिंहविजृम्भित-मकरन्दिका-मधुकरविलसित-चम्पककुसुमावर्त्ताः १० मणिरत्नप्रभा-कुङ्कुमतिलक-चम्पक-शेखर-क्रीडनक-वकुलामोद-मन्मथतिलक-मालाविलसित-पुण्यामलक-नवकुसुमितपल्लवाः ९ मलयमारुत-मदनावासमाङ्गलिका-ऽभिसारिका-कुसुमनिरन्तर-मदनोदक-चन्द्रोद्योत-रत्नावल्यः ८ भ्रूचक्रणक-मुक्ताफलमाला-कोकिलावली-मधुक-

P. P. Ac. Gunratnasuriji M.S. Jinshasan Aradhak Trust

रवृन्द-केतकीकुसुम-नवविद्युन्माला-त्रिवलीतरङ्गकाणि ७ अरविन्दक-विभ्रमविलसितवदन-नवपुष्पन्धय-किन्नरमि-
थुनविलास-विद्याधरलीला-सारङ्गाः ६ कामिनीहासा-ऽपदोहक-प्रेमविलास-काञ्चनमाला-जलधरविलसिताः ५ अभिनव-
मृगाङ्कलेखा-सहकारकुसुममञ्जरी-कामिनीक्रीडनक-कामिनीकङ्कणहस्तकाः ४ मुखपालनतिलक-वसन्तलेखा-मधुरालापि-
नीहस्ताः ३ मुखपङ्क्ति-कुसुमलतागृहे २ रत्नमालेति पञ्चपञ्चाशद्भेदाः । १८ । व्यत्यये सुमनोरमा-पङ्कज-कुञ्जर-मदनातुर-
भ्रमरावली-पङ्कजश्री-किङ्किणी-कुङ्कुमलता-शशिशेखर-लीलालयाः १० चन्द्रहास-गोरोचना-कुसुमबाण-मालतीकुसुम-
नागकेसर-नवचम्पकमाला-विद्याधर-कुब्जककुसुम-कुसुमास्तरणाः ९ मधुकरीसंलाप-सुखावास-कुङ्कमलेखा कुवलयदाम-
कलहंस-सन्ध्यावली-कुञ्जरललिता-कुसुमावल्यः ८ विद्युल्लता-पञ्चाननललिता-मरकतमाला-ऽभिनववसन्तश्री-मनोहरा-क्षि-
प्तिका-किन्नरलीलाः ७ मकरध्वजहास-कुसुमाकुलमधुकर-भ्रमरविलास-मदनविलास-विद्याधरहास-कुसुमायुधशेखराः ६
उपदोहक-दोहक-चन्द्रलेखिका-सुतालिङ्गन-कङ्केल्लिलताभवनानि ५कुसुमितकेतकीहस्त-कुञ्जरविलसित-राजहंसा-ऽशोकप-
ल्लवच्छायाः ४ अनङ्गललिता-मन्मथविलसितौहुल्लणकानि ३ कज्जललेखा किलिकिञ्चिते २ शशिबिम्बितं चेति तावद्वा
। १९ । द्वित्रिचतुर्भिर्लक्षणैर्मिश्रा सङ्कीर्णा । २० । समैः पादैः सर्वसमा । २१ । पचौ ध्रुवकम् । २२ । चौ दः शशाङ्कवदना
। २३ । चपदाश्चातौ वा मारकृतिः । २४ । षचदाः चिर्वा महानुभावा । २५ । षचताश्चापौ पातौ वाप्सरोविलसितम् । २६ ।
षचाश्चिदौ वा गन्धोदकधारा । २७ । चितौ षचपा वा पारणकम् । २८ । चीः पद्धडिका । २९ । चिपौ षचाता वा
रगडाध्रुवकम् । ३० । इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ षट्पदी-चतुष्पदीशासनः षष्ठोऽध्यायः

॥ द्विपदी । १ । दाचदालदाचदालि कर्पूरो णैः । २ । सोऽन्त्यलोनः कुङ्कमः । ३ । चृ लयः । ४ । स भ्रमरपदं ञजैः । ५ ।
षचुदा उपात् । ६ । चूपौ गरुडपदम् । ७ । षचुता उपात् । ८ । चृदौ हरिणीकुलं ठजैः । ९ । तद्गीतिसमं ञजैः । १० ।
षुर्भ्रमररुतम् । ११ । षश्रूर्हरिणीपदम् । १२ । षीचताः कमलाकरम् । १३ । चृतौ कुङ्कमतिलकावली । १४ । ते रत्नक-
ण्ठिके ठजैः । १५ । षचुपाः शिखा । १६ । चृतौ छड्डणिका । १७ । चृः स्कन्धकसमम् । १८ । तत् मौक्तिकदाम ठजैः ॥ ११ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aradhak Trust

। १९ । नवकदलीपत्रं ढजैः । २० । षचूदैः कृतेष्वेषु स्त्रीत्वम् । २१ । चूपावायामकम् । २२ । तत्काञ्चीदाम ञजैः । २३ । रसनादाम ठजैः । २४ । चूडामणिर्ढजैः । २५ । षचूतैः कृतान्यायामकादीन्युपात् । २६ । चूदौ स्वप्नकम् । २७ । तद्भुजङ्ग-विक्रान्तं ठजैः । २८ । ताराध्रुवकं ढजैः । २९ । नवरङ्गकं तजैः । ३० । षिश्चीः स्थविरासनकम् । ३१ । चूषौ सुभगम् । ३२ । षचीषचदाः पवनध्रुवकं ढजैः । ३३ । षचाषचिदाः कुमुदं ञजैः । ३४ । तद्धाराक्रान्तं ठजैः । ३५ । चूतौ कन्दो-ट्टम् । ३६ । षाचुता भ्रमरद्रुतं ञजैः । ३७ । तत्सुरक्रीडितं ठजैः ।३८। सिंहविक्रान्तं ढजैः । ३९ । कुङ्कुमकेसरं तजैः । ४० । च्लृ बालभुजङ्गमललितम् । ४१ । षिचीदा उपगन्धर्वं ठजैः । ४२ । तत्संगीतं ढजैः । ४३ । उपगीतं तजैः । ४४ । चूपौ गोन्दलम् । ४५ । षचूता रथ्यावर्णकं ठजैः । ४६ । तच्चच्चरी ढजैः । ४७ । अभिनवं तजैः । ४८ । चूषचताश्चपलम् । ४९ । चूषौ चावमृतम् । ५० । च्लदौ सिंहपदम् । ५१ । तद्दीर्घकं ढजैः । ५२ । षश्चूः कलकण्ठीरुतम् । ५३ । षाचूदाः शतपत्रम् । ५६ । च्लतावतिदीर्घं ढजैः । ५५ । षाचूता मत्तमातङ्गविजृम्भितम् । ५६ । चत्वारिंशत्कला एकद्व्यधिका वा मालाध्रुवकम् । ५७ । चो विजया । ५८। पो रेवका । ५९ । षो गणद्विपदी । ६० । चतौ स्वरद्विपदी । ६१ । पदावप्सराः । ६२ । अष्टौ कला वसुद्विपदी । ६३ । चौ करिमकरभुजा । ६४ । चलदलाश्चन्द्रलेखा । ६५ । पतौ मदनविलसिता ।६६। चपौ जम्भेटिका । ६७ । पचौ लवली । ६८ । सप्त कला दलौ चामरपुरसुन्दरी । ६९ । षचौ काञ्चनलेखा । ७० । पौ चारुः । ७१ । तषताः पुष्पमाला । ७२ । द्विपदीप्रकरणम् । गाथात्रानुक्तम् । ७३ । इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ द्विपदीव्यावर्णनो नाम सप्तमोऽध्यायः ।

॥ अथ प्रस्तारादयः षट् प्रत्ययाः । १ । प्राक्लपाद्यगोऽधो लः परमुपरिसमं प्राक् पूर्वविधिरिति समयभेदकृद्वर्ज्जं प्रस्तारः । २ । ग्लावधोऽधो द्विर्द्विरतः । ३ । नष्टाङ्कस्य दले लः सैकस्य गः । ४ । नष्टाङ्के गणैर्हृतशेषसंख्यो गणो देयो राशिशेषे लब्धं सैकम् । ५ । उद्दिष्टेऽन्त्यल्लाद्द्विर्गैकं त्यजेत् । ६ । आद्यमन्त्येन हतं व्यधस्तनम् । ७ । वर्णसमानेककान् सैकानुपर्युपरि क्षिपेत् मुक्त्वान्त्यं सर्वैकादिगलक्रिया । ८ । आद्यभेदानधोऽधो न्यस्य परैर्हृत्वाग्रे क्षिपेत् । ९ । ते पिण्डिताः । १० ।

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

वर्णसमद्विकहतिः समस्य । ११ । ते द्विगुणा द्विहीनाः सर्वे । १२ । समकृती राश्यूना अर्धसमस्य । १३ । तत्कृतिर्विषमस्य । १४ । विकल्पहतिर्मात्रा वृत्तानाम् । १५ । अङ्कान्त्योपान्त्ययोगः परे परे मात्राणाम्। १६ । द्विघ्नानेकाश्वयोगः । १७ ।
इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ प्रस्तारादिव्यावर्णनो नामाष्टमोऽध्यायः ।

इति कलिकालसर्वज्ञानवद्यचतुःशासनशासनविधात्रतिगमहिमनिलयश्रीमद्धेमचन्द्राचार्यविरचितं छन्दोऽनुशासनं नाम चतुर्थमनुशासनं संपूर्णतामगादिदम् ॥





P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

॥ अर्हं ॥ शब्दानुशासनविरचनानंतरं तत्फलभूतं काव्यमनुशिष्य तदंगभूतं छंदोनुशासनमारिप्समानः शास्त्रकार इष्टाधिकृतदेवता-नमस्कारपूर्वकमुपक्रमते । ॐ **वाचं ध्यात्वार्हतीं सिद्धशब्दकाव्यानुशासनः ॥ काव्योपयोगिनां वक्ष्ये छंदसामनुशासनं १** अर्हद्भिः कृता । कृत ( सि ६-३-१९२ ) इत्यण्यार्हती वाक् द्वादशांगं गणिपिटकं । यद्यपि द्वादशांगी सूत्रतो गणधरैर्निर्ममे, तथापि तदर्थस्यार्हदुपदिष्टत्वादार्हतीत्युच्यते । यदाह "अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणमिति' । सूत्रमपि वाचित्यार्हत्प्रभावादेव गणधरैर्ग्रथ्यते इत्यार्हत्येव वागिति न विरोधः । सिद्धं प्रतिष्ठां प्राप्तं शब्दानां नामाख्यातादिभेदानां प्रकृतिप्रत्ययादिविभागेन, काव्यस्य च गुणालंकारादिविवेचनेन, पूर्वाचार्यशासनस्यानु पश्चात् शासनं संदर्भो यस्य स सिद्धशब्दकाव्यानुशासनः । ध्यानं प्रणिधानं तच्चेह मानसो नमस्कारः । काव्योपयोगिनामिति गद्यकाव्ये न छंदसामुपयोग इत्यर्थात्पद्यं काव्यमिह गृह्यते, उपयोगः साहायकं वृत्तसंशयच्छेदादिना, यदाह "छंदोविचितेर्वृत्तसंशयच्छेदः" । इदमभिधेयप्रयोजनं । काव्योपयोगाभावाच्च न वैदिकानि छंदांसीह लक्षयिष्यन्ते । छंदसामिति कर्मणि षष्ठी । चंदनादाह्लादनात् छंदांसि वर्णमात्रानियमितानि वृत्तानि तेषां अनुशिष्यतेऽनेनेति अनुशासनं शास्त्रं । वक्ष्य इति तृतीयत्रिकप्रयोगात् अहमिति लभ्यते । ननु भवतु वाचं ध्यात्वार्हतीमितीष्टदेवतास्तुतिः, अधिकृतदेवतास्तुतिः तु कथमियं, न ह्यधिकृतानि छंदांस्यर्हत्प्रणीतानि । मैवं वोचः । नहि सूक्तं किंचिदार्हतमुपदेशमंतरेण जगत्यस्ति । यत् श्रीसिद्धसेनः । "सुनिश्चितं नः परतंत्रयुक्तिषु स्फुरंति याः काश्चन सूक्तसंपदः । तवैव ताः पूर्वमहार्णवोद्धृता, जगत्प्रमाणं जिनवाक्यविप्रुष" इति सर्वमवदातं । अनेन च श्लोकेन शब्दकाव्यच्छंदोऽनुशासनानां एककर्तृकत्वमुक्तं । ॐ **सर्वादिमध्यांतग्लौ त्रिकौ म्नौ भ्यौ ज्रौ स्तौ वर्णगणाः ॥** सर्वादिमध्यांतौ गुरुलघू ययोस्तौ यथाक्रमं म्नौ भ्यौ ज्रौ स्तौ इत्येवंसंज्ञौ ज्ञेयौ । चतुर्ग्लादीनामपि मादिसंज्ञा माभूदिति नियमार्थमाह–त्रिकौ त्रयः प्रमाणमनयोस्तौ मानमिति ( सि ६।४।१६९ ) के त्रिकौ । तत्र सर्वग्लौ म्नौ आदिग्लौ भ्यौ मध्यग्लौ ज्रौ अंतग्लौ स्तौ। सर्वेषां न्यासः | ऽ ऽ ऽ म | । । । न | ऽ । । भ | । ऽ ऽ य | । ऽ । ज | ऽ । ऽ र | । । ऽ स | ऽ ऽ । तं | पठंतिच "मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुश्च तथादिलघुर्यः । जो गुरुमध्यो मध्यलघू रः सोऽतगुरुः कथितोऽतलघुस्तः" । इति वर्णगणाः ॐ **द्वित्रिचतुष्पंचषट्कला दतचपषा द्वित्रिपंचाष्टत्रयोदशभेदा मात्रागणाः ॥** कला मात्रा द्विकलो दसंज्ञः त्रिकलः तसंज्ञः चतुष्कलश्चसंज्ञः पंचकलः पसंज्ञः षट्कलः षसंज्ञ इति द्वित्रिचतुष्पंचषण्णामादिप्रतीकेन कृतृरासदिवादरेत्यादिवत् दादिसंज्ञा मात्रागणाः । ते च यथासंख्यं द्वित्रिपंचाष्टत्रयोदशभेदाः । तत्र दगणो द्विभेदः | ऽ | । । | तगणस्त्रिभेदः | । ऽ | ऽ । | । । । | चगणः पंचभेदः | ऽ ऽ | । ऽ | । ऽ । |

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

ऽ।। | ।।।। | पगणोऽष्टभेदः | ।ऽऽ | ऽ।ऽ | ।।।ऽ | ऽऽ। | ।।ऽ। | ।ऽ।। | ऽ।।। | ।।।।। | पगणस्त्रयोदशभेदः | ऽऽऽ | ।।ऽऽ | ।ऽ।ऽ | ऽ।।ऽ | ।।।।ऽ | ।ऽऽ। | ऽ।ऽ। | ।।।ऽ। | ऽऽ।। | ।।ऽ।। | ।ऽ।।। | ऽ।।।। | ।।।।।। |

"सर्वगः सर्वलो दस्त, आदिमांतिमसर्वलः । सर्वांतमध्यमाद्यग्च समस्तलो मतश्च सः २ प आद्यंतर्लघुर्ग्लांतः स्यादुपान्त्यगुरुः सच । आद्युत्तरगुरुः सोपि गुर्वादिः सर्वलोपिच २ पः सर्वगो द्व्याद्यलः स्यादाद्योपान्त्यलघुस्तथा । आद्यांतिमगुरुश्चैव पर्यंतगुरुरेवच ३ आद्यंतल उपांत्याद्यग उपांत्यगुरुस्तथा । द्व्याद्यगो मध्यगश्चाद्युत्तरगादिश्च सर्वलः ४ इति संग्रहश्लोकः ॥ ❀ **समानेनैकादिः ग्लौ** ॥ मादयो दादयश्च समानेन लक्षिता एकादिसंख्या भवंति। यावतिथः समानस्तावतिथा गादयोऽपि गृह्यंते गे गा गि गी गु गू गृ गॄ गॢ गॣ एवं लादयोपि। ❀ **ह्रस्वो ऌजु** ॥ ह्रस्वो मात्रिको वर्णो ल्संज्ञो भवति । सच प्रस्तारे ऋजुः स्थाप्यः । ❀ **वांते ग्वक्रः** ॥ पादांते वर्त्तमानो ह्रस्वो ग्संज्ञो भवति । सच प्रस्तारे वक्रः स्थाप्यते। वेति व्यवस्थितविभाषा, तेन यत्रजौं ग्लौ समानीत्यादावपवादस्तत्र ग्संज्ञो न भवति। वंशस्थादौ च पादांते लघोर्गुरुत्वं न भवति ॥ यदाह "वंशस्थकादिचरणांतनिवेशितस्य, गत्वं लघोर्नहि तथा श्रुतिशर्मदायि । श्रोतुर्वसंततिलकादिपदान्तवर्त्तिलो गत्वमत्र विहितं विबुधैर्यथा तत्" ध्रुवासु विवक्षावशाद्गुरुत्वं लघुत्वं च । यदाह "ओजसंख्या यदाभीष्टा ध्रुवासु विरतौ तदा । गो लता युग्मसंख्ये तु विरतौ गुरुता लघोः" तथा "गुरुअच्चिअ एक्कलहू विरामविसयम्मि विसमसंखाए । जमललहू लहुअच्चिअ, समसंखासंठिओ होइ"। ❀ **ᳵ क ᳶ पविसर्गानुस्वारव्यंजनाह्रादिसंयोगे** ॥ जिह्वामूलीये उपध्मानीये विसर्जनीयेऽनुस्वारे व्यंजने ह्रादिवर्जिते संयोगे च परे ह्रस्वोऽपि गो भवति वक्रश्च । अह्रादीति समस्तव्यस्तसंग्रहात् ह्रसंयोगे हसंयोगे रसंयोगे च न गुरुः । आदिशब्दात् यथादर्शनं । ह्रादिसंयोगे च यथा "स्पृष्टं त्वयेत्यपह्रियः खलु कीर्तयंति" तथा "तव ह्रियापह्रियो मम ह्रीरभूच्छशिग्रहेपि द्रुतं न धृता ततः । बहलभ्रामरमेचकतामसं मम प्रिये क्व समेष्यति तत्पुनः"। "धनं प्रदानेन श्रुतेन कर्णावित्यादि" । "लीलासिताब्जमुत दर्पणमातपत्रं किं दंतपत्रमथ किंशुकमौलिरत्नं । किं चामरं तिलकबिंदुरथेंदुबिंबमेतद्दिवो निह्नुतदीप्ति मुदे न कस्य" प्राकृतेपि यथा "जह ण्हाउं ओइण्णे अब्भुत्तमुल्हसिअमंसुअद्धं तं । जहयं ण ण्हाओसि तुमं सच्छे गोलानईतूहे" अब्भुतमभिषिक्तं। तूहं तीर्थं । तथा । वोद्रहद्रहम्मि पडिआ कुवलयखित्तद्दहि" इत्यादि । एष्वतीव्रप्रयत्नत्वं संयोगस्य गुरुत्वाभावे हेतुः । तीव्रप्रयत्ने तु भवत्येव गुरुः । यथा "वर्हभारेपु केशा"नित्यादि । ॥ १ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

केचित्तु ≍क≍पयोरपि परत्र स्थितयोः पूर्वस्य लघोर्गुरुत्वं नेच्छंति यथा "प्रणतसुरवरधरणनृप≍परमविजितमदमदनजननमरण सकलुपजन-सलिलकतक≍कनकमयसुतनु जिनवर वृषभ जय । ❀ **दीर्घप्लुतौ** ॥ द्विमात्रत्रिमात्रौ वर्णौ ग्संज्ञौ भवतः वक्रौ च । ❀ **स द्विमात्रः** ॥ स ग्संज्ञो द्विमात्रो भवति, एकमात्रेऽसती मात्रारोप्यते, त्रिमात्रे सती निराक्रियते । ❀ **एदोतौ पदान्ते प्राकृते ह्रस्वौ वा** ॥ पदांते वर्तमानावेकारौकारौ प्राकृतभाषायां ह्रस्वौ वा भवतः । यथा "पच्चूसगयवरुम्मूलिआए उड्डीणससिविहंगाए । धवलाइं गलंति निसालयाए नक्खत्तकुसुमाइं ॥ उअ ओमरायमरगयसंवलिआ णहयलाउ ओयरइ । णहसिरिकंठब्भट्ठ व्व कंठिआ कीर रिंछोला" । इँ हिं इत्येतयोर्ह्रस्वत्वं शब्दानुशासने निर्णीतमिति नेहोच्यते । ❀ **तुर्यांशः पादोऽविशेषे** ॥ छंदसश्चतुर्थो भागः पादसंज्ञः अविशेषे सामान्याभिधाने । यत्र तु द्विपदी पंचपदी षट्पदष्टपदी चेति विशेषाभिधानं तत्र द्वितीयाद्यंशोपि पादः । ❀ **वृत्तं** ॥ प्राग्मात्राछंदोभ्यो यदभिधास्यते तद्वृत्तसंज्ञं ज्ञेयं । तच्च स्थिरगुरुलघ्वक्षरविन्यासमिष्यते पाटनसंयोगयोरभावात् । मात्राछंदांसि तु जातिरिति प्रसिद्धानि । यदाहुः "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" वृत्तंच समार्द्धसमविषमभेदात्त्रेधा । तत्क्रमेण लक्षयति । ❀ **समैः पादैः समं** ॥ पादैश्चतुर्भिः तुल्यलक्षणैः समं वृत्तं । ❀ **समार्धमर्धसमं** ॥ यस्य तुल्ये अर्धेऽर्धसमं वृत्तं । ❀ **अन्यद्विषमं** ॥ आभ्यामन्यद्विषमं वृत्तं । ❀ **श्रव्यो विरामो यतिः** ॥ विरमणं विरामो विश्रामः स श्रुतिसुखो यतिसंज्ञः । साच तृतीयांतेपु गद्यादिनिर्देशेपूपतिष्ठते । गादयश्च साकांक्षत्वात् यतिरित्यनेन संबध्यंते, गाद्यवच्छिन्नैरक्षरैर्यतिः क्रियत इत्ययमर्थः सिध्यति । तत्रैषा यत्युपदेशोपनिषत्पठ्यते "यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः । गादिच्छिन्नपदान्ते च लुप्तालुप्तविभक्तिके" तत्र यतिः सर्वत्र पादान्ते, यथा "नमोस्तु वर्द्धमानाय स्पर्धमानाय कर्मणा । तज्जयावाप्तमोक्षाय परोक्षाय कुतीर्थिनामिति" न पुनरेवं यथा "नमस्तस्मै महादेवाय शशांकार्द्धधारिणे" इति श्लोकार्द्धे तु विशेषत इत्यत्र संधिकार्याभावः स्पष्टविभक्तिकत्वं च विशेषः । यथा "नमस्यामि सदोद्भूतमिंधनीकृतमन्मथं । ईश्वराख्यं परंज्योतिरज्ञानतिमिरापहं" । अत्रेश्वरमित्यस्य पूर्वमकारेण संधिर्न कर्तव्यः । स्पष्टविभक्तिकत्वं चात्रैव, नत्वेवं यथा "सुरासुरशिरोरत्नस्फुरत्किरणमंजरी । पिंजरीकृतपादाब्जद्वंद्वं वंदामहे शिवं" । गादिच्छिन्नपदांते च लुप्तालुप्तविभक्तिके । यथा "उत्तुंगस्तनकलशद्वया नतांगी लोलाक्षी विपुलनितंबशालिनी च" । "यक्षश्चक्रे जनकतनयास्नानपुण्योदकेपु" इति। लुप्तालुप्तविभक्तिक इति यतिः सर्वत्र पादांते इत्यनेनापि संबध्यते । यथा "नमस्तुंगशिरश्चुंबिचंद्रचामरचारवे । त्रैलोक्यनगरारंभमूलस्तंभाय शंभवे" इति । तथा "वशीकृतजगत्कालं कंठेकालं नमाम्यहं" इति । क्वचित्तु पदमध्येऽपि गकारादौ यतिर्भवेत् । यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥ १ ॥—

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

यथा "पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशाविति" तथा "कूजत्कोयष्टिकोलाहलमुखरभुवः प्रांतकांतारदेशा इति" तथा "हासो हस्ताग्रसंवाहनमपि तुलिताद्रींद्रसारद्विपोस्येति" "वैरिञ्चानां तथोच्चारितचतुरऋचां वाननानां चतुर्णामिति" "पङ्के पानीयमाह्लादयति हि महिषं पक्षपाती पृषत्कः" इति। गकारादाविति किं पदमध्ययतिः पादांते मा भूत्। यथा "प्रणमत भवबंधक्लेशनाशाय नारायणचरणसरोजद्वंद्वमानंदहेतुमिति"। पूर्वोत्तरभागयोरेकाक्षरत्वे तु पदमध्ये यतिर्दुष्यति। यथा "एतस्या गंडतलममलं गाहते चंद्रकक्षामिति" "एतासां राजति सुमनसां दाम कंठावलंबीति" "सुरासुरशिरोनिघृष्टचरणारविंदः शिवः" इति॥ पूर्वान्तवत्स्वरः संधौ क्वचिदेव परादिवत्॥ योयं पूर्वपरयोरेकादेशः स्वरः संधौ विधीयते स क्वचित्पूर्वस्यांतवद्भवति क्वचित्परस्यादिवदुभयादेशत्वात्। यथा पित्रोः पुत्रः पितुश्च मातुश्च भवति। तत्र पूर्वांतवद्भावो यथा। "स्यादस्थानोपगतयमुनासंगमेवाभिरामा" "जंभारातीभकुंभोद्भवमिव दधत" इति। तथा "दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्त्तये" इति। परादिवद्भावो यथा "स्कंधे विंध्याद्रिबुद्ध्या निकषति महिपस्याहितोसूनहार्षीत्" इति। "शूलं तूलं तु गाढं प्रहर हर हृषीकेशकेशोपि वक्रश्चक्रेणाकारि किं ते" इति। अत्र हि स्वरस्य परादिवद्भावे व्यंजनमपि तद्भक्तत्वात्तदादिवद्भवति। यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ॥ इत्यंतादिवद्भावविधावपि संबध्यते। तेन "अस्या वक्त्राब्जमवजितपूर्णेंदुशोभं विभाती"त्येवंविधा यतिर्न भवति। द्रष्टव्यो यतिचिंतायां याद्यादेशः परादिवत्॥ यथा "अच्छिन्नप्रसराणि नाथ भवतः पातालकुक्षौ यशांस्यद्यापि क्षपयंति कोकिलकुलच्छायासपत्नं तमः" "विततघनतुषारक्षोदशुभ्रासु दूर्वास्वविरलपदमालां श्यामलामुल्लिखंत" इति। नित्यं प्राक्पदसंबद्धाश्चादयः प्राक्पदांतवत्। चादिभ्यः पूर्वं यतिर्न कर्तव्येत्यर्थः। यथा "स्वादु स्वच्छं च सलिलमिदं प्रीतये कस्य न स्यात्" इति। नित्यं प्राक्पदसंबद्धा इति किं, अन्येषां पूर्वांतवद्भावो माभूत् यथा "मंदायंते न खलु सुहृदामभ्युपेतार्थकृत्या" इति "इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे" इति॥ परेण नित्यसंबद्धाः प्रादयश्च परादिवत्। प्रादिभ्यः परा यतिर्न भवतीत्यर्थः। "दुःखं मे प्रक्षिपति हृदये दुःसहस्त्वद्वियोग" इति। परेण नित्यसंबद्धा इति किं। अन्येभ्यः परापि यतिर्यथा स्यात् "श्रेयांसि बहुविघ्नानि भवंति महतामपि। अयंच चादीनां प्रादीनां चैकाक्षरत्वेनैकाक्षराणामेव पदान्तयतावंतादिवद्भाव इष्यते, नत्वनेकाक्षराणां पदमध्ययतौ, तत्र हि पदमध्येऽपि चामीकरादिष्विव यतेरभ्यनुज्ञातत्वात्। तत्र चादीनां यथा "प्रत्यादेशादपिच मधुनो विस्मृतभ्रूविलासं" इति। प्रादीनां यथा "दूरारूढप्रमोदं हसितमिव परिस्पष्टमासां सखीभि" रिति। तदेतत्सर्वं श्रव्यपदेनैव गतार्थमिति न सूत्रितं। अनिर्दिष्टयतिकेपि च छंदसि श्रव्यैव यतिः करणीया, न पुनरेवं, यथा "तेन शशिमुखि गतेन सखि किं प्रियेण कुरु मानमपि तस्मिन्,



P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

स तव वरतनु समदनः स्वयमेव समेति चरणयुगं" इति । तथाहि "अवह्नर्थापि मधुरा मनो हरति भारती । तमोनिचयसंकाशा मत्तनादेव कोकिलेति" । ॐ त्र्यादिर्गोदिः ॥ त्रिचतुरादिः संख्या क्रमेण गघङादिसंज्ञा ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां स्वोपज्ञ-च्छंदोनुशासनवृत्तौ संज्ञाध्यायः प्रथमः समाप्तः ॥

ग्रंथाग्रं १२५ अक्षराणि १८ ॐ छंदः॥ आशास्त्रपरिसमाप्तेः छंद इत्यधिकृतं वेदितव्यं। ॐ पादः॥ पाद इत्यधिकार आशास्त्रपरिसमाप्तेः। इदानीमेकाक्षराद्याः षड्विंशत्यक्षरावसानाश्छंदोजातीराह। ॐ एकाक्षरोक्ता जातिः॥ एकाक्षरपादोक्तानामभेदसंग्रहात्मिका जातिः। ॐ अत्युक्ता-मध्याप्रतिष्ठासुप्रतिष्ठागायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतय एकैकवृद्धाः। उक्तात एकैकाक्षरवृद्धपादा अत्युक्तादयस्तत्र द्व्यक्षरा अत्युक्ता जातिः। त्र्यक्षरा मध्या, चतुरक्षरा प्रतिष्ठा; एवं यावदेकोनाविंशत्यक्षरा अतिधृतिः। ॐ कृतिः प्राङ्विसमभ्युदश्च कृतिः॥ प्र आङ् वि सम् अभि उद् इत्येतेभ्यश्च परा कृतिरेकैकवृद्धाक्षरा। विंशत्यक्षरा कृतिः। एकविंशत्यक्षरा प्रकृतिः। द्वाविंशत्यक्षरा आकृतिः। त्रयोविंशत्यक्षरा विकृतिः। चतुर्विंशत्यक्षरा संकृतिः। पंचविंशत्यक्षराऽभिकृतिः। षड्विंशत्यक्षरा उत्कृतिः इति। अथासामेव जातीनामुपयोगिनो भेदानाह। ॐ उक्तायां गः श्रीः॥ उक्तायां जातौ गुरुरेकाक्षरः पादः सच श्रीनामा यथा "गीर्धीःश्रीस्तात्" ॐ १ अत्युक्तायां गौ स्त्री॥ यथा "भ्रातर्दृष्टा इष्टा सा स्त्री" २ पद्ममित्येके। ॐ लौ मदः "जय जिन जितमदः" ३ पुष्पमिति कश्चित् ॐ ग्लौ दुःखं॥ यथा "कस्य नात्र दुःखमस्ति" ४ ल्गौ सुखं यथा "जिनः स वः क्रियात्सुखं" ५ ३/४ ॐ मध्यायां मो नारी। यथा "निःसारे संसारे सारं किं स्यान्नारी" ६ ॐ यः केशा यथा "पुरंध्री सुवेशा इयं सा सुकेशा" ७ धूरिति भरतः। ॐ रो मृगी॥ यथा "वल्लभा गेहिनी या मृगीलोचना" ८ तडिदितिभरतः। ॐ सो मदनः॥ यथा "विरहेभ्यधिकं मदनो दहति" ९ रजनीतिभरतः ॐ ३/४ केचित्तु त्र्यभ्यत्रस्तामेकैकोप्यविधः १ शंखः २ शुभ्रं ३ दुग्ध ४ मित्याहुः। ॐ प्रतिष्ठायां म्गौ कन्या। मगणो गुरुश्च यथा "सर्वैर्देवैर्येहांचक्रे। सेयं मन्ये धन्या कन्या" १० ॐ भगौ सुमुखी॥ भगणो गुरुश्च यथा "क्षीणतनुर्मद्विरहे। याश्रुमुखी सा सुमुखी" ११ ललितेतिभरतः। ॐ ज्गौ विलासिनी॥ जगणो गुरुश्च यथा "न लभ्यते वनस्तनी। धनं विना विलासिनी" १२ जयेति भरतः। ॐ गौ समृद्धिः॥ रगणो गुरुश्च यथा "पुण्यपात्रे शुद्धचित्तैः। या प्रदत्ता सा समृद्धिः" १३ पुण्यमितिभरतः। ॐ न्गौ मृगवधूः॥ नगणो गुरुश्च यथा "तव पुरो नयनयोः। किमिव सा मृगवधूः" १४ ॐ य्गौ व्रीडा॥ यगणो गुरुश्च यथा "तथा तेन कृतं भर्त्रा। यथा चित्ते

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

भवक्रीडा १५ ॐ स्गौ सुमतिः ॥ सगणो गुरुश्च यथा "भज धर्मं वद सत्यं । त्यज पापं सुमतिः सन्" १६ भ्रमरीति भरतः । ॐ त्गौ सोमप्रिया ॥ तगणो गुरुश्च यथा "विभ्राजते खे रोहिणी। चारुद्युतिः सोमप्रिया" १७ ४/८ ॐ सुप्रतिष्ठायां रो गौ प्रीतिः ॥ यथा "यस्य नैवार्थो नैव कामिन्यः । नापि वैराग्यं तस्य का प्रीतिः" १८ ॐ र्लगौ विदग्धकः ॥ रगणो लघुगुरू च । यथा "यौवनेन वा कार्मणेन वा । यो न दग्धकोऽसौ विदग्धकः" १९ वागुरेतिभरतः ॐ भो गौ पंक्तिः ॥ यथा "फाल्गुनमासे फुल्लवनांते । पावकतुल्या किंशुकपंक्तिः" २० अक्षरोपपदेत्यन्ये । कुंतलतन्वीतिभरतः ॐ भ्लगा रतिः । भगणो लघुगुरू च यथा "साधुचरणांभोजयुगले ॥ हंत विदुषो राजति रतिः २१ ॐ जो गौ सती ॥ यथा "स्वभर्तृभक्ता विशुद्धशीला । निरीहचित्ता सती सतीयं २२ शिखेतिभरतः ॐ त्लगा नंदा ॥ तगणो लघुगुरू च यथा "चित्ते सरला वेपे तरला । दाने पृथुला नंदा महिला" २३ ॐ य्लगा जया ॥ यगणो लघुगुरू च "ममानीयत मनः कांतया । मुखेनोल्लसज्जितांभोजया" २४ ॐ म्लगाः सावित्री ॥ मगणो लघुगुरू च यथा "जैनेंद्रं मुखं दिश्याद्वः सुखं । जिग्ये येन सा सावित्री प्रभा" २५ ॐ सो गौ घनपंक्तिः ॥ यथा "क्रियया हीनं यदिह ज्ञानं । रहितांभोभिर्घनपंक्तिः सा" २६ ॐ न्लगा अभिमुखी ॥ नगणो लघुगुरू च यथा "शशिवदना मृगनयना । अभिसरति त्वदभिमुखी" २७ मृगचपलेत्यन्यः । कमलमुखीतिभरतः । ॐ १ ५/० गायत्र्यां मौ सावित्री ॥ यथा "देवानां यः स्त्रैणैः साक्षात् क्षोभं निन्ये । देवैः किं स ब्रह्मा यत्कांता सावित्री" २८ ॐ म्रौ तटी ॥ मगणरगणौ यथा "कामेभ्यो निस्पृहं यस्योच्चैः स्यान्मनः । किं कुर्यात्तस्य सा मंदाकिन्यास्तटी" २९ ॐ सौ रमणी ॥ यथा "रजनीरमणप्रतिमे वदने । तिलकं शशकं कुरुते रमणी" नलिनीतिभरतः ३० ॐ त्यौ तनुमध्या ॥ तगणयगणौ यथा "लावण्यपयोधिः सौभाग्यनिधानं । सा कस्य न हृद्या बाला तनुमध्या" ३१ ॐ स्भौ गुरुमध्या ॥ सगणभगणौ यथा "चपला केकरनयना सा किल । रमणी कोविद गुरुमध्या तव" ३२ ॐ यौ सोमराजी ॥ यथा "स वः पातु कुंदत्विषा देहभासा । समुद्योतितांतो जिनः सोमराजी" ३३ ॐ न्यौ शशिवदना ॥ नगणयगणौ यथा "मनसिजलीलाकुलगृहभूमिः । कुवलयनेत्रा शशिवदनेयं" ३४ मुकुलितेत्यन्यः । मकरशीर्षेतिभरतः ॐ र्मौ मालिनी ॥ रगणमगणौ यथा "केतकीसंसृष्टैर्मालतीसंपृक्तैः । पंकजैरर्हंतं मालिनी सोपास्ते" ३५ ॐ भ्यौ कामलतिका ॥ भगणयगणौ यथा "भाति मृदुपाणिपल्लवमनोज्ञा । हासकुसुमश्रीः कामलतिकेयं" ॥ ३६ ॐ म्सौ मुकुलं ॥ मगणसगणौ यथा "यातोस्तं शशभृन्मार्त्तंडोभ्युदयं । व्याकोशं कमलं नीलाब्जं मुकुलं" ३७ वीथीतिभरतः । ॐ न्रौ शफरिका । नगणरगणौ यथा "कुवलयेक्षणे रमयतो मनः। तव विलोचने शफरिकाचले" ३८ गिरेतिभरतः। ॐ र्नौ कच्छपी ॥ रगणनगणौ

१ स ब्रह्मा ब्रह्मा किं-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

यथा "लक्ष्यते सरसि चंद्रमसस्तदृशि । लक्ष्मकांतिरिह कच्छपी पयसि" ३९ ❀ भ्रौ लघुमालिनी ॥ भगणरगणौ यथा "त्वद्वदनाग्रतो मंडलमैंदवं । संप्रति लक्ष्यते श्रीलंघुमालिनी" ४० ❀ स्यौ विमला ॥ सगणयगणौ यथा "निपतंति यस्मिन् सरला दृशस्ते । तमुपैति लक्ष्मीर्विमला च कीर्तिः" ४१ ❀ त्रौ जला ॥ तगणरगणौ यथा "जातास्तव द्विपत्स्त्रीणां दृशो नृप । अश्रान्तमश्रुभिः पर्यस्तकज्जलाः" ४२ ❀ म्यौ सुनंदा ॥ मगणयगणौ यथा "श्रीमत्पार्श्वनाथ त्वत्पादाब्जयुग्मे । भूयान्निर्विकल्पा भक्तिर्मे सुनंदा" ४३ ❀ भ्मौ विक्रांता ॥ भगणमगणौ यथा "नो भटसिंहास्ते त्वद्रिपुपुर्यंतः । वासरतिं सिंहा बिभ्रति विक्रान्ता" ४४ ❀ स्मौ सूचीमुखी ॥ सगणमगणौ यथा "अधुना पंचेपोर्नवतीक्ष्णास्त्रत्वं । इह जज्ञे सूचीमुखया केतक्या" ४५ ❀ य्मौ शिखंडिनी ॥ यगणमगणौ यथा "हहा पांथस्त्रीभिः पिधीयंते कर्णाः । मुहुर्व्यातन्वाने शिखंडिन्या रावं" ४६ ❀ १६ उष्णिहि मौ गो गांधर्वी । यथा "स श्रेयांसि श्रेयांसः श्रीमान् देवः पुष्णातु । क्षोभायाभूद्यच्चित्ते गांधर्वी न क्रीडापि" ४७ ❀ जौं ग उष्णिक् ॥ रगणजगणौ गुरुश्च यथा "उष्णिहीव संसृतौ स्याद्ध्रुवं रजो गुरुः । नो भवेद्यदि क्षितौ श्रीजिनेन्द्रशासनं" ४८ शिखेतिभरतः ❀ ज्सौ गः कुमारललिता ॥ जगणसगणौ गुरुश्च यथा "नरेंद्रगणसेना–वृतः प्रथितशक्तिः । दधासि नृपते त्वं कुमारललितानि" ४९ अत्र केचित् द्वाभ्यां विरतिमिच्छंति । यथा "इदं वदनपद्मं प्रिये तव विभाति । इह व्रजति मुग्धे मनो भ्रमरतां मे" ५० ❀ म्सौ गो मदलेखा ॥ मगणसगणौ गुरुश्च यथा "यावत्केसरिनादो नायाति श्रुतिमार्गं । तावद्गंधगजानां गंडे स्यान्मदलेखा" ५१ ❀ सौं ग उद्धता ॥ रगणसगणौ गुरुश्च यथा "या बभूव सुदर्प्पा वैरिणां नृप सेना । त्वत्प्रताप-विलासे सोद्धतापि गतश्रीः" ५२ ❀ त्सौ गो भ्रमरमाला ॥ तगणसगणौ गुरुश्च यथा "कुंदे विचकिले वा मंदारकुसुमे वा । प्रीत्या मधुरसाढ्ये भ्रान्ता भ्रमरमाला" ५३ ❀ रौ गो हंसमाला ॥ यथा "शैवलाली निराशा पंकजे बद्धवासा । किं बकोटावलीयं हंत सा हंस-माला" ५४ ❀ भौ गः कलिका । यथा "स्पर्शनमात्रवशाद्या मकरंदमुचा । किं भ्रमर भ्रमता सा कलिता कलिका" सोपानमित्यन्यः । भोगवतीतिभरतः ५५ ❀ भ्सौ गो विधुवक्रा ॥ भगणसगणौ गुरुश्च यथा "अह्नि विरहतप्ता रात्रिमभिलपन्ती । उद्यति विधुबिंबे म्लायति विधुवक्रा ५६ ❀ म्भौ गः सरलं ॥ मगणभगणौ गुरुश्च यथा "पापाभ्यासात्कुटिलं चेतो रौद्रं भजते । शास्त्राभ्यासव्यसनाद्धर्म्यं ध्यानं सरलं" ५७ ❀ भ्नौ गश्चित्रं ॥ भगणनगणौ गुरुश्च यथा "कीर्तिरिह भवतः कुंदकुसुमसमा । रंजयति हृदयं चित्रमिदमधिकं" ५८ ❀ नौ गो हरिविलसितं ॥ यथा "सपदि बलिनृपान्समिति नियमयन् । प्रथयसि न विभो न हरिविलसितं" चपलेत्यन्ये । द्रुत-गतिरितिभरतः ५९ ❀ भ्जौ गः शारदी ॥ भगणजगणौ गुरुश्च यथा "उज्ज्वलनिशाकरा चारुकमलाकरा । कस्य न मनोरमा

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

श्रीर्भवति शारदी" ६० ॐ त्नगा मधुकरिका ॥ तगणनगणौ गुरुश्च यथा "पांथ श्रय दयितां प्राप्तो मधुसमयः । गायंत्यनुविटपं प्रीता मधुकरिकाः " ६१ वज्रमित्यन्यः ॐ स्जौ गो विमला ॥ सगणजगणौ गुरुश्च यथा "समशत्रुमित्रता–मवलंब्य निर्मम । भज वीतरागतां विमलात्मको भव" ६२ ॐ ज्रौ गः सुभद्रा ॥ जगणरगणौ गुरुश्च यथा "कुमारपाल देव त्वदीयविक्रमेण । महौजसः सुभद्रा–पतेः स्मृतं न केन" ६३ ॐ न्यौ गः कुमुदवती ॥ नगणयगणौ गुरुश्च यथा "पतिविरहे याऽन्यमुखमपि नाऽपश्यत् । कलयति सा श्लाघामिह कुमुदिन्येका" ६४ ॐ य्सौ गो मुदिता ॥ यगणसगणौ गुरुश्च यथा "लतानां कलिकाभिः प्ररोहत्पुलकेव । वसंतागमनेऽस्मिन् वनश्रीर्मुदितेयं ६५ ॐ न्रौ गो मनोज्ञा ॥ नगणरगणौ गुरुश्च यथा "भुवनजैत्रमंत्रं रतिपतेरधीते । पिकगिरा मधुश्रीरतिमनोज्ञयाऽसौ" ६६ ॐ स्रौ गो दीप्ता ॥ सगणरगणौ गुरुश्च यथा "नवसिंदूरभासो मुकुलाः किंशुकेऽमी । ध्रुवमाग्नेयवाणा रतिनाथस्य दीप्ताः" ६७ ॐ २९ अनुष्टुभि त्रौ गौ विभा ॥ तरगगाः यथा "देव त्वयि क्षमानाथे क्षीणान्यभूभुजां कीर्तिः । पूर्वादिभाजि मार्त्तण्डे का वा विभास्तु ताराणां" ६८ ॐ यौं लगावनुष्टुप् ॥ रयलगाः यथा "कुर्वतेऽविवेकारतिं ये विरागहेतुष्वपि । ते पठंति चित्रं मुहुर्बालिशा अनुष्टुब्धिया" ६९ ॐ गीर्गीर्विद्युन्माला ॥ समानेनैकादिरितिवचनाद्गीरिति गचतुष्टयं गृह्यते । मौ गावितितु न कृतं चतुर्भिश्चतुर्भिर्यथा विरतिर्ज्ञायेतेति यथा "सत्यं रम्या भोगा भोगाः कांताः कांताः प्राज्यं राज्यं । किं कुर्वंतु प्राज्ञा यस्मादायुर्विद्युन्मालालोलं" ७० ॐ भौ गौ चित्रपदा ॥ यथा "व्योमनि सागरतीरे पर्वतशृंगनिकुंजे । भ्राम्यति भीमकुलेन्दो चित्रपदा तव कीर्त्तिः" ७१ ॐ न्रौ लगौ सुमालती ॥ नरलगाः यथा "परिहृतोत्पलावली कनककेतकी तथा । भ्रमरमालतीकृते तदिति सा सुमालती" ७२ ॐ भ्तौ लगौ माणवकं घैः ॥ भतलगाः घैरिति व्यादिर्गादिरितिवचनाच्चतुर्भिरिति लभ्यते । यतिरिति चोपतिष्ठते तेन चतुर्भिर्यतिरिति सिद्धं । यथा "शीतरुजान्योन्यरणद्दंतरवैर्विस्वरकं । साम पठन्माणवकोऽशासि मुहुर्यत्र शुकैः ७३ॐ त्रौ लगौ नाराचं ॥ तरलगाः यथा "दुर्वारवैरिदंतिनां कुंभस्थलेषु निश्चलः। त्वत्कीर्त्तिकेतुवंशवन्नाराच एष शोभते ७४ ॐ म्नौ गौ हंसरुतं ॥ मनगगाः यथा "मंजीरक्कणितयोग्यां कुर्वाणं श्रवणभोग्यां ।आदत्ते बत मनांसि यूनां हंसरुतमेतत्" ७५ॐ न्जौ लगौ ललितगतिः ॥ नजलगाः यथा "मणिरसनास्वनिता-दनुसृतहंसकुलैः । श्रितमिव शिष्यपदं ललितगतौ सुतनोः" ७६ ॐ जौं गौ सिंहलेखा ॥ रजगगाः यथा "पर्णपातमात्रभीत-कृष्णसारपोततास । किं विलंबसे महात्मंस्त्वं जहीहि सिंहलेखां" ॥ ७७ ॐ ज्रौ लगौ प्रमाणी ॥ जरलगाः यथा "तव प्रमातुमिच्छता यशश्चुलुक्य भूपते । समग्रमानजित्वरी जगत्त्रयी प्रमाण्यभूत्" ॥ ७८ मत्तवेष्टितमिति

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

भरतः ॐ जौं ग्लौ समानी ॥ रजगलाः यथा "रागरोपमोहदोपदारुदावपावकस्य । तीर्थिकैः समं जिनस्य नो समानिका कलापि" ७९
ॐ न्सौ गौ गुणलयनी ॥ नसगगाः यथा "गुरुगुणचिता स्फीता परिहृतरजःपुंजा । मुनितनुरियं साध्वी न गुणलयनी साधो" ८०
ॐ सौ ल्गौ मही ॥ससलगाः यथा "भृशमात्मवतः कला ननु यस्य परिस्फुटाः। सहि कांचनपुष्पितां सकलां चिनुते महीं" ८१ ॐ नौ गौ
रतिमाला ॥ ननगगाः यथा "ततिरिह करिणां ते क्षरदुरुमदवारिः । नृपवर जलदानामिव विचरति माला" ८२ ॐ अन्यद्धितानं ॥
उक्ताद्वक्ष्यमाणाच्चान्यत्समवृत्तं छंदो वितानसंज्ञं । यथा "त्वयि तेजोभिरशेपं जगदुद्योतयतीदं । उदयत्येप इदानीं सविता नाथ मुधैव" ८३
तथा "कंकालमालभारिणं कंदर्प्पदर्प्पदारिणं । संसारबंधमोचनं वंदामहे त्रिलोचनं" ८४ तथा "तस्याः स्मरामि सुंदरं चंद्रोपमानमाननं ।
कंदर्पचापभंगुरभ्रूविभ्रमोपशोभितं" ८५ तथा "तृष्णां त्यज धर्मं भज पापे हृदयं मा कुरु । इष्टा यदि लक्ष्मीस्तव शिष्टाननिशं संश्रयेत्यादि"
८/१६ ८६ ॐ वृहत्यां भो मौ वक्रं ङैः ॥ ङैरिति पंचभिर्यतिः यथा "विभ्रमसारभ्रूविक्षेपं मन्मथलीलालीलागारं । कस्य न चित्ते कुर्यात्
क्षोभं बालकुरंगाक्षीणां वक्रं" ८७ ॐ नो रौ वृहतिका ॥ यथा "विशदवृत्तलब्धात्मनः शुचियशो यतेर्भूपते । तव कमंडलुर्वारिधि-
र्वृहतिका च मंदाकिनी" ८८ ॐ र्नसा हलमुखी ॥ रनसाः यथा "दंतुरं कपिशनयनं यन्मुखं विकटचिबुकं । तां स्त्रियं सुखमभिलपन्
दूरतस्त्यज हलमुखीं" ॥ ८९ ॐ नौ मो भुजगशिशुसृता ॥ यथा "नयनविलसितैरस्याः कथमिव बत मूर्छा ते । भुजगशिशुसृता
यद्भावगतमुरगकन्येयं" ९० वक्रगतेरित्यर्थः । शिशुपदस्य साभिप्रायत्वात् । यथाच "अभ्यस्यता तु तरणीगतिवक्रिमाणमुन्मूलिताः
फणिशिशो भवतापराधाः" ९१ इति । मधुकरिकेतिभरतः । ॐ भजसा उदयं ॥ यथा "सुभ्रु भवदीयवदने सत्यपि नितांतरुचिरे ।
निस्त्रप इवैप सहसा वांछति शशांक उदयं" ॥ ९२ ॐ भौ र उत्सुकं ॥ यथा "आपदि दीनमनोरथं संपदि हर्षपरायणं । मा कुरु
मानस चापलं संस्मर त त्वमनुत्सुकं" ९३ ॐ र्नरा भद्रिका ॥ रनराः यथा "पुण्यपापजलवर्द्धिते सौख्यदुःखलतिके स्वयं । तज्जहीहि
परिविप्लवं साधुता हृदय भद्रिका" ९४ ॐ नौ र उपच्युतं ॥ यथा "नृप कुरु करुणां जने परिहर खलसंगमं । विमृश सुरविमानत-
स्त्रिदशपतिमुपच्युतं" ९५ ॐ स्जसा अक्षि ॥ सजसाः यथा "विपमास्त्र एप इति यत्कवयो वदंति तदसत् । प्रहरत्ययं हि मदनः
सुतनो तवाक्षिलल्तिैः" ९६ ॐ मः सौ कनकं ॥ यथा "मिथ्यादर्शनदिग्धमनाः पापं धर्मधिया मनुते । गाढोन्मत्तरसांधदृशां मृत्पिं-
डोऽथवा कनकं" ९७ ॐ सौ मस्तारं ॥ यथा "सकलासुमतां रक्षायै यतितव्यमितीयत्तत्त्वं । रसवादविदां तत्सारं यदि वार्तिक रक्तं
तारं" ९८ ॐ सिः सौम्या ॥ सिरिति सगणत्रयं यथा "निजजीवितमात्ररसात्कृतनिष्कृपकर्मततेः। मृगयामधुमद्यरते कुरु धर्ममसौम्यमते" ९९

P. P. Ac. Gunratnasuri M.S. Jin Gun Aradhak Trust

तभ्या रुचिरा ॥ तभयाः यथा "नाश्रायि वैश्वरणपद्मद्वंद्वं तव क्षणमपीश । तैराश्रितं वनमजस्रदावज्वलत्तरु चिराय" १०० ॥ नस्या विशाला ॥ नसयाः यथा "नृपतिलक मातु कीर्तिस्तव भुवि कथं तु यस्याः । भवति सकला त्रिलोकी यदियमपि नो विशाला" १०१ ॥ तन्मा मकरलता ॥ तनमाः यथा "भैमे भवदरिनारीणामार्द्रांजननयनाम्भौघैः । आसूत्रि कुचतटे श्रेष्ठैर्नव्या मकरलताभंगिः" १०२ ॥ नज्या शशिलेखा ॥ नजयाः यथा "कलयति पांडुरभावं तव विरहे सुतनुः सा । सुभग यथा दिवसादौ गलितरुचिः शशिलेखा" १०३ ॥ ॥ नौ सो लघुमणिगुणनिकरः ॥ यथा "अपरमणिगुणगणः सरिदधिप तव कियान् । हरिहृदि विलसति यल्लघुमणिगुणनिकरः" १०४ ॥ मभ्साः सिंहाक्रांता ॥ मभसाः यथा "त्वद्दृष्टेयं भवति विभो दीना प्रत्यर्थिनृपचमूः । राहुग्रस्तेव शशिकला सिंहाक्रांतेव मृगवधूः" १०५ ॥ रज्राः कामिनी ॥ रजराः यथा "यत्प्रसादतो जयत्ययं पुष्पसायको जगत्त्रयं । उल्लसन्नवीनविभ्रमास्ताः स्तवीमि हंत कामिनीः" १०६ तरंगवतीत्यन्यः ॥ ९।१ पंक्तौ मभस्गा मत्ता घैः॥ मभसगाः घैरिति चतुर्भिर्यतिः यथा "आताम्रत्वं वपुषि दधानो घूर्णन् पृथ्वीतलपतनेच्छुः । द्राग्वारुण्यां निहितकरोऽयं मत्तावस्थां प्रथयति भानुः" । इयं च यद्यपि वानवासिकायामंतर्भवति, तथापि विशेषसंज्ञार्थमुक्ता । एवमन्यत्रापि १०७ ॥ र्यज्गाः पंक्तिका ॥ रयजगाः यथा "भ्रूविलासदूरीकृतोल्लसत्कामकार्मुकां कांतिशालिनीं । मंजुगुंजिमंजीरराजितां पश्य कामिनीपंक्तिकामिमां" १०८ ॥ मस्जगाः शुद्धविराट् ॥ मसजगाः यथा "सम्यग्ज्ञानचरित्रपात्रतां यो दध्रे भुवनैकबांधवः । त्रैलोक्यस्पृहणीयतां गतः सत्यं शुद्धविराडयं मुनिः" १०९ ॥ मन्यगाः पणवो ङैः ॥ मनया गुरुश्च ङैरिति पंचभिर्यतिः । यथा "स्याद्वादामृतमुदिते चित्ते शास्त्रोक्तिः कटुरितरा भाति । एवं संसदि चतुरंगायां, जल्पामो जयपणवं दत्त्वा" ११० कुवलयमालेतिभरतः । केचित्तु यगणस्थाने सगणं मन्यंते । ॥ रज्रगा मयूरसारिणी ॥ रजरा गुरुश्च यथा "या घनांधकारडंबरेषु प्रीतमानसा विसर्पतीह । क्षोभयंत्यपि क्षणाद्भुजंगान् संत्यजेत् मयूरसारिणीं तां" १११ ॥ नज्रगास्त्वरितगतिः ॥ नजना गुरुश्च यथा "दिनकरपीतशुचिरुचिश्वरमगिरेशिखरतटीम् । अनुसरति त्रपित इव त्वरितगतिः सितकिरणः" ११२ ॥ भ्मस्गा रुक्मवती ॥ भमसा गुरुश्च यथा "ये विजितात्मानो नयनिष्ठा जाग्रति लोकं रक्षितुकामाः । स्यान्नियतं तेषां वसुधेयं रुक्मवती मृन्मयपरेषां" चंपकमाला सुभावेति चान्ये । पुष्पसमृद्धिरितिभरतः । ॥ भिगौ चित्रगतिः ॥ भत्रयं गुरुश्च यथा "यस्य न कापि कला न मतिर्न व्यवसायलवोऽपि तथा । सोपि कथंचन जीवति चेद्दैवमिदं खलु चित्रगति" ११३ ॥ निगौ निलया ॥ नत्रयं गुरुश्च यथा "अपि सरिदधिपतिसुता हरिमपि परिहरति यत् । अधमपुरुषकृतरतिं धिगहह कमलनिलयां" ११४ ॥ जिगावुषिता ॥ जत्रयं गुरुश्च यथा "स किं वद नीच-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

समाश्रयो न किं कथय स्थितिरुन्नते । न चापलमुज्झसि लक्ष्मि किं न चेदुषिता जलधामनि" ११५ ❀ रः सौ गो मणिरंगः ॥ यथा "धीमतां हि गुणो विशदश्रीर्जायते गुणिसंगमवाप्य । शोभते नितरां न किमंगे कुंकुमारुणिते मणिरागः" ११६ ❀ भ्नौ म्गौ बंधूकं ॥ भनमा गुरुश्च यथा "एतदभिनवभास्वद्विंबं शोणरुचिरुचिरं प्राग्वध्वाः । शेखरितनवबंधूकश्रीवंधुपदमधुना संधत्ते" ११७ ❀ न्रज्गा मनोरमा ॥ नरजा गुरुश्च यथा "निखिलदीनदुःखदारिणी सकलबंधुसंविभागकृत् । गुणिजनामृतार्णवोपमा भवति सा रमा मनोरमा" ११८ ❀ तो जौ ग उपस्थिता ॥ यथा "एषा भवतः समरांगणे राजन् जयसिद्धिरुपस्थिता ॥ कीर्त्तिः कुपितेव भवत्प्रिया सद्योऽभिससार दिगंतरं" ११९ अत्र द्वाभ्यां यतिरित्येके । ❀ र्मस्गाः कलिका ॥ रमसा गुरुश्च यथा "कुंदयष्टिं हृष्टः परिचुंबन् किं न रे रोलंब त्रपसे त्वं । तत्तथा येन प्रागनुरागात् क्रीडितं मालव्याः कलिकायां" १२० ❀ भत्गा मृगचपला ॥ भतना गुरुश्च यथा "साधुसमाधावविचलतामाश्रय हे मानस सततं । वांछसि यद्यव्ययपदवीं मा कुरु वृत्तिं मृगचपलां" १२१ ❀ मो नौ गः कुमुदिनी ॥ यथा "आसाद्य प्रियमिह शशिनं निर्गच्छद्भ्रमरकुलमिषात् । मूर्त्तं दुःखमिव विरहजं, तत्कालं वमति कुमुदिनी" १२२ कुसुमसमुदितेत्यन्ये १२३ ❀ मः सौ ग उद्धतं ॥ यथा "सर्पद्भिस्तव दिग्जययात्रास्वेभिर्देवतुरंगमसैन्यैः । प्राज्यैरुद्धतमध्वरजस्तां, वृद्धिं प्राप न वृंदमरीणां" १२४ ❀ नज्यगा विपुलभुजा ॥ नजया गुरुश्च यथा "रिपुवनिताजननिःश्वासैरविरतमुष्णतरैः कांता । भजति चुलुक्य जयश्रीस्ते, विपुलभुजा विटपिच्छायां" १२५ ❀ स्जस्गा माला ॥ सजसा गुरुश्च यथा "गगनांगणे कुमुदषंडश्रियमुद्वहंति निपतंत्यः । भवदीक्षणोत्सवसतृष्णा नृप सुभ्रुवां नयनमालाः" १२६ प्रमितेत्यन्ये । ❀ १/२० त्रिष्टुभि भौ रो गौ रोचकं ॥ यथा "कुंभभुवो जयतीह माहात्म्यं तद्वडवामुखतेजसश्चापि । यस्य जगत्प्रलयप्रगल्भोर्मिरंचति रोचकगोचरं सिंधुः" १२७ ❀ रः सौ ल्गौ अच्युतं ॥ यथा "त्वं दधासि विभो परमेष्ठितामीश्वरत्वमपि त्वयि राजति । अच्युतत्वमपि त्वमुपश्रितः, कोऽपरस्त्वद्दते जिन देवता" ॥ १२८ ❀ तिर्गौ लयग्राहि ॥ तगणत्रयं गुरुद्वयं च । यथा "वीणानिनादानुबंधेन हृद्यं, कांचीरणत्कारचित्रीयमाणं । नव्यांगहारप्रकाराभिरामं, दत्ते प्रमोदं लयग्राहि लास्यं" १२९ ❀ भिर्गौ दोधकं ॥ भत्रयं गुरुद्वयं च यथा "पुष्करमंबुदगर्जितधीरैः, श्रव्यमदोधकधोंकृतिनादैः । व्यंजितपाटकृतिध्वनिपादन्यासमसाविह नृत्यति सुभ्रूः" १३० उपचित्रेयं ❀ सिल्गा विदुषी ॥ सत्रयं लघुगुरू च यथा "कुरुते तरसा न हि चापलं, स्वयमेव न चार्थयते परं । प्रकटं कुरुते न वियाततां प्रमदा विदुषी भवतीदृशी" १३१ ❀ भत्ना गौ श्रीङैंः । ङैरिति पंचभिर्यतिः । भतना गुरुद्वयं च यथा "या सुजनानामुपकरणाय, प्रद्विषतां च प्रतिकरणाय । मानधनानां भवति नराणां, श्रीरितरा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्यात्परिकरमात्रं" १३२ सांद्रपदमित्यन्ये । रुचिरेति भरतः । यतिनियमाभावे इदमेव प्रत्यवबोधः ❀ तौ जौ गौ उपस्थिता ॥ यथा "या मानमहाविषघूर्णितांगी, नाभूत् कलयापि वशंवदा ते । लोलन्मलयानिलदोलितात्मा, प्रीत्या सविलासमुपस्थिता सा" १३३ ❀ जस्ता गौ उपस्थितं ॥ जसता गुरुद्वयं च यथा "शिलीमुखततिं सत्पक्षनादां, मुहुर्विदधतं बाणासनांके । पुरः शरदृतु संप्रेक्ष्य राजन्नुपस्थितमरिस्त्वामेव मेने" १३४ ❀ मातौ गौ शालिनी घैः ॥ मतद्वयं गुरुद्वयं च । घैरिति चतुर्भिर्यतिः । यथा "ऊर्मीभंगीर्निर्मिमाणा धुनीनां, व्यातन्वाना वीरुधां लास्यलीलां । उज्जृंभंते शालिनीवारपाकस्फारामोदाः शारदा वायवोऽमी" १३५ ❀ मभता गौ वातोर्मी ॥ घैरिति वर्त्तते । यथा "त्वच्छत्रूणां विपिने प्रस्थितानां, क्षिप्तः पांशुर्दशि वातोर्मिकाभिः । तापः सूर्येण च मूर्ध्नि प्रकीर्णः को वा नास्कंदति संप्राप्तभंगान्" १३६ ❀ मो भौ गौ वा । वातोर्म्या एव लक्षणांतरं घैरिति वर्त्तते । यथा "घोराकारा वनघोपविशेपादूरोत्क्षिप्तक्षितिरेणुविमिश्रा । लोकक्षोभं सहसा विदधाना वातोर्मीयं कुरुते जगदंधं" १३७ मभ्नलगा भ्रमरविलसितं ॥ मभना लघुगुरू च । घैरिति वर्त्तते । यथा "प्रत्याख्याताप्यसि कमलवनं याता तत्किं करतलचलनैः । मुग्धे विद्धि स्फुटकमलधिया वक्त्रापाति भ्रमरविलसितं" १३८ वानवासिकेयं । ❀ नौ सो गौ वृंता ॥ घैरितिवर्त्तते । यथा "जिनपतिगुरुपदपीठे योऽशठमतिरिह लुठति प्रीत्या । विगलति निखिलमघं तस्मात्परिणतफलमिव वृन्तान्तात्" १३९ ❀ न्यभा गौ पतिता चैः ॥ नयभा गुरुद्वयं च । चैरिति षड्भिर्यतिः । यथा "वहति न मंदं दक्षिणवायुर्भ्रमति न तूर्णं चूतपरागः । दधति न पिक्यः पंचमरागं, किमु पतिता त्वं पादतलेऽस्य" १४० ❀ नेरलगा रथोद्धता ॥ रनरा लघुगुरू च । यथा "तावकीनकटके रथोद्धता धूलयो जगति कुर्युरंधतां । चेदिमाः करिघटामदांभसा भूयसा प्रशमयेन्न सर्वतः" १४१ अपरांतिकेयं ❀ नेभा गौ स्वागता ॥ रनभा गुरुद्वयं च । यथा "वल्लभं सुरभिमित्रमनंगं दाक्षिणात्यपवनं सुहृदं च । पृच्छतीह परपुष्टविघुष्टैः, स्वागतानि नियतं वनलक्ष्मीः" १४२ ❀ नौ रलगा भद्रिका ॥ नद्वयं रो लघुगुरू च यथा "परिहर नितरां परापवादं कुरु जिनवचनेऽनुरागितां । इति तव चरतः परे भवे भवतु सपदि भद्रिकागतिः" १४३ अपरवक्त्रमिति भरतः । उत्तरांतिकेयं ❀ रज्रलगाः श्येनी ॥ रजरा लघुगुरू च यथा "भ्रांतगृध्रवृंदकंकमंडलश्येनिका त्वदीयवैरिवाहिनी । आपतत्कृतांतरौद्रकिंकरव्याकुलेव लक्ष्यते क्षमापते" १४४ निःश्रेणिकेत्यन्ये । ❀ नो जौ लगौ सुमुखी ॥ यथा "कनकरुचिर्घनपीनकुचा मनसिजविभ्रमकेलिगृहं । चलनयना नवकुंददती, न हरति कस्य मनः सुमुखी" १४५ द्रुतपादगतिरिति भरतः । ❀ मस्जा गावेकरूपं ॥ मसजा गुरुद्वयं च । यथा "काष्ठे वा कनकेऽथवा मणौ वा लोष्टे वा रमणीपु वा तृणे वा । शापे वा स्तवनेऽपि वा वितृष्णं साधूनां मन एकरूपमेव" १४६ ❀ तो जौ लगौ मोटनकं ॥ यथा "दंतद्युतिधौतदिगंतरया रम्यं नवयौवनया विहितं । साचीकृतलोलविलो-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

चनकं दृष्टं भवता मुखमोटनकं" १४७ ॐ तभजलगा उत्थापनी ॥ यथा "सप्पंद्विपेंद्रभरकंप्रमहीप्रभ्रश्यदद्रिशिखरध्वनिभिः । अंभोधिमध्यशयितस्य हरेरुत्थापनी जयति सा पृतना" १४८ ॐ तो नौ लगौ मुखचपला ॥ यथा "आकांक्षसि यदि सुखमसमं जन्मापि विमलमिह मनुषे । नागीमिव निरवधिकुटिलां, नारीं परिहर मुखचपलां" १४९ ॐ न्यनलगाः कमलदलाक्षी ॥ नयनलगाः यथा "विहर निदाघः सुभगहठादतिशयदीर्घीकृतदिवसः । कृतगुरुतापः कृशयति तां, कमलदलाक्षीं सरितमिव" १५० रुचिरमुखीति भरतः । ॐ स्मनलगा विमला ॥ समनलगाः यथा "शरदायातेयं गगनमणेरिव तेजः प्रौढं तव भजतां । नृपकीर्त्तिर्ज्योत्स्ना तुहिनरुचेरिव दिक्षु भ्राम्यत्यतिविमला" १५१ ॐ नस्ना गावशोका ॥ नसना गुरुद्वयंच । यथा "अलिवलयहुंकृतिभिरुच्चैरियमिह निपेधति भवंतं । वनभुवमितः पथिक मागाः कुसुमितसमुल्लसदशोकां" १५२ ॐ सज्या लगौ सारणी ॥ सजयलगाः यथा "दमनस्त्रिलोचनभालाग्निना ज्वलितः क्षणादिह जीवेत्कथं । त्रिवलीतरंगजुषः स्युर्नचेद्रससारसारणयः सुभ्रुवः" १५३ ॐ तौ जो गाविन्द्रवज्रा ॥ यथा ॥ स्वस्वागमाचारपरायणानां, पुण्यात्मनां यत्कुरुते विरुद्धं । क्षोणीभुजस्तस्य भवत्यवश्यं, रौद्रेंद्रवज्राभिहतस्य पातः" ॐ १५४ जतजा गावुपेंद्रवज्रा ॥ यथा "दधासि धात्रीं विदधासि दुष्टक्षमाभृतां निर्दलनं प्रसह्य । कुमारपालक्षितिपाल कस्त्वमुपेंद्रवज्रायुधयोस्तदत्र" १५५ ॐ एतयोः, परयोश्च संकर उपजातिश्चतुर्दशधा ॥ एतयोरिंद्रवज्रोपेंद्रवज्रयोः संकरोऽन्योन्यपादमीलनमुपजातिः । साच प्रस्तारभेदाच्चतुर्दशधा । एवं परयोरिंद्रवंशावंशस्थयोः संकर उपजातिश्चतुर्दशधैव । स्थापना ऽ । । । | । ऽ । । | ऽ ऽ । । | ऽ । ऽ । | । । ऽ । | । ऽ ऽ । | ऽ ऽ ऽ । | । । । ऽ | ऽ । । ऽ | । ऽ । ऽ | ऽ ऽ । ऽ | । । ऽ ऽ | ऽ । ऽ ऽ | । ऽ ऽ ऽ | आद्यभेदोदाहरणं यथा "प्रायः पुमांसोऽभिनवार्थलाभे, गुणोज्वलेष्वप्यकृतादराः स्युः । अवाप्य कुंदं मधुपो हि जज्ञे, गतोपजातिभ्रमणाभिलाषः" १५६ एवमन्येष्वप्युदाहार्याः । समवृत्तप्रस्तावेप्युपजातीनामुपन्यासो लाघवार्थः । ॐ सर्वजातीनामपीति वृद्धाः । सर्वजातीनामुक्तादीनां, प्रायो गायत्र्यादीनाम्, इतः परासां जगत्यादीनां कृतनामाकृतनामविसदृशप्रस्ताररूपस्वस्वपादानां स्वल्पभेदानां संकर उपजातिरिति बहुश्रुताः प्राहुः । यथा त्रिष्टुभः स्वप्रस्तारेण "कामे कमाहि कमियं खु दुक्खं छिंदाहि दोसं विणएज्ज रागं" तथा "सक्कारए सिरसा पंजलीओ कायग्गिरा भो मणसा य निच्चं" परजातिप्रस्तारेण यथा "युधिष्ठिरो धर्ममयो महाद्रुमः, स्कंधोऽर्जुनो भीमसेनोऽस्य शाखा । माद्रीसुतौ पुष्पफले समृद्धे, मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च" "जे आवि मंदेत्ति गुरुं विइत्ता, डहरे इमे अप्पसुएत्ति नच्चेत्यादि ॥ १५७ ॐ ११/३० जगत्यां तौ ज्राविंद्रवंशा ॥ ततजराः यथा "दारेषु सुग्रीवकपीश्वरस्य यद्रागानुबंधं सहसा व्यपंचयः तत्ते प्लवंगाऽधिपते किमुच्यते, हंतेंद्रवंशानुगुणं त्वया कृतं" १५८

२

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

❀ जतज्रा वंशस्थं ॥ यथा "पुरूरवो नाघुपि पूरवः पुरा दधुर्धरां धारयतेऽधुना भवान् । अपूर्वमेतच्चरितं न तावकं वदंति वंशस्थमिदं महीपते" १५९ वसंतमंजरी, अभ्रवंशा चेत्यन्ये । १६० ❀ नभज्याः कलहंसा ॥ यथा "गुणलवेऽपि सुभग प्रियसख्या, गुणिकथाक्रमवशात्प्रकृते ते । घटयते किमपि नाटितलज्जाकृतकमाशु सुतनुः कलहंसा" १६१ द्रुतपदा, मुखरं चेत्यन्ये । ❀ नभसाश्चंद्रवर्त्म ॥ रनभसाः यथा "सैंहिकेयभयविह्वलमनसः, स्वप्रभाभिरिह दक्षमुनिसुताः । नाममात्रमपि सोढुमपटवश्चंद्रवर्त्म रचयंति हततमः" १६२ ❀ सीस्तोटकं ॥ सीरिति चत्वारः सगणाः यथा "परलोकविरुद्धकुकर्मरतं, बहिरार्जवमादधतं कुटिलं । विपकुंभमिवेद्धसुधापिहितं, त्यज मित्रमतोटकतैकगुणं" १६३ मात्रासमकमिदं ॥ ❀ नभभ्रा द्रुतविलंबितं ॥ यथा "परुपसांद्रवचोरचनांचिता, रुदितहासविलोलविलोचना । अवचनं कथयत्यतिरागतां, द्रुतविलंबितचित्रगतैरियं" १६४ हरिणप्लुतमितिभरतः । ❀ नौ म्यौ पुटो जैः ॥ ननमयाः । जैरित्यष्टभिर्यतिः । यथा "तरललवणिमांभःपूर्णकुंभी, सुचरितफलपाकोल्लासवल्ली । सुतनु तव विराजत्यंगसंगान्नयनपुटनिपेया यौवनश्रीः" १६५ ❀ नौ म्रौ ततं ॥ ननमराः यथा "नववयसि वियुक्तानां योपितां, प्रिय कथय निराशानां का गतिः । त्वमपि सुभग गंता देशांतरं, गगनमपि च मेघव्यूहैस्ततं" १६६ ❀ नौ भ्रावुज्ज्वला ॥ ननभराः यथा "विनयितमनसोऽपि निरंतरं, बत विदधतु किंतु विवेकिनः । नयनगतिरियं हि सुदुःसहा, चकितमृगदृशामहहोज्ज्वला" १६७ चपलनेत्रेत्येके । ❀ तीः कामावतारः ॥ तीरिति चत्वारस्तगणाः । यथा "मध्ये नतांग्या नवा रोमराजीति, यन्मन्यते मुग्धलोको न तत्किंतु । तुंगस्तना स्थानिका कुट्टिमा रूढकामावताराय निःश्रेणिकं विद्धि" १६८ ❀ न्यौ न्यौ कुसुमविचित्रा ॥ नयनयाः यथा "सरसिजवक्त्रा कुवलयनेत्रा, विकचजपोष्ठी विचकिलदंता । इयमनुरूपा ननु कुसुमेपोर्जयति धनुश्रीः कुसुमविचित्रा" १६९ इयं मदनविकारा गजलुलितं वाऽन्येपां । ❀ जसजसा जलोद्धतगतिश्चैः ॥ जसजसाः । चैरिति पड्भिर्यतिः । यथा "विकासिकुसुमं सदा फलयुतं, निसर्गशिशिरं तटविटपिनं । निपातितवती हहा सरिदियं, निकामकलुषा जलोद्धतगतिः" १७० ❀ यीर्भुजंगप्रयातं ॥ यीरिति चत्वारो यगणाः । यथा "न सूरिः सुराणां गुरुर्नासुराणां, पुराणां रिपुर्नापि नापि स्वयंभूः । खला एव विज्ञाश्चरित्रे खलानां, भुजंगप्रयातं भुजंगा विदंति" १७१ अप्रमेयेतिभरतः । ❀ रीः स्रग्विणी ॥ रीरिति रगणाश्चत्वारः । यथा "तारका मल्लिका मालिका मालिनी, चारुचंद्रप्रभा केतकी शालिनी । भोगभाजां भुजंगेश्वराणां प्रिया, सेयमुज्जृंभते शर्वरी स्रग्विणी" १७२ पद्मिनीतिभरतः । ❀ जीर्मौक्तिकदाम ॥ जीरिति जगणाश्चत्वारः । यथा "समाधिपयोधिनिमग्नमदीनमनीहमकाममवाममनाधि । जिनेंद्र मनो मम वांछति नाम न विभ्रमधाम न मौक्तिकदाम" १७३ ❀ मीः कल्याणं ॥ मीरिति मगणाश्चत्वारः ।



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

यथा "आदिस्रष्टा यः सर्वेषां सन्मार्गाणां, प्रत्यादेष्टा यः पापानां त्रैलोक्येऽस्मिन् । तत्त्वज्ञानात्संसाराब्धेः प्राप्तः पारं, दिश्याद्देवः श्रीनाभेयः कल्याणं सः" १७४ कांचनमिदमिति कश्चित्" । ❀ **नाद्भज्राः प्रियंवदा** ॥ नगणात्परे भजराः यथा "प्रणयतत्परमिमं सखिप्रियं, मधुरमालप मयैव शिक्षिता । विधुरिता समदकोकिलारवैर्यदि भविष्यसि मधौ प्रियंवदा" १७५ मत्तकोकिलमित्यन्ये । ❀**ताल्ललिता** ॥ तगणात्परे भजराश्चेत् तदा ललिता यथा "ग्रामेऽत्र पापकलहं सतां दधद्धत्से त्रपां नहि किमंध भाव्यतां । रम्यं वपुर्न मधुरं न ते रुतं, रे काक पाकललिता नवा गतिः" १७६ ❀ **स्जौ सौ प्रमिताक्षरा** ॥ सजौ सद्वयं च यथा "बहुभिः किमालि लपितैः कुधियां, सरसाभिधेयघटनारहितैः । रसभावभावितधियां हि वरं, प्रमिताक्षरापि रचनार्थवती"। चित्रेयं १७७ ❀ **मौ यौ वैश्वदेवी ङैः** ॥ ङैरिति पंचभिर्यतिः यथा "जिष्णुर्वित्तेशो धर्मराजः प्रवेत्ता, ईशः श्रीनाथस्तेजसां धाम वेत्ति । यत्त्वं प्रख्यातः श्रीचुलुक्यक्षितीश, ब्रूमस्तेनेयं वैश्वदेवी तनुस्ते" । चंद्रकांतेत्यन्ये १७८ ❀ **म्भौ स्मौ जलधरमाला घैः** ॥ मभसमाः घैरिति चतुर्भिर्यतिः यथा "त्वत्सेनाभिः कृतरिपुधामप्लोपे, दृष्ट्वा व्योम्नि स्फुरदुरुधूमस्तोमं । ग्रीष्मेऽप्युत्काः सपदि मयूरा राजन्, शब्दायंते जलधरमालाभ्रान्त्या" कांतोत्पीडेत्यन्ये १७९ ❀ **न्जौ भ्यौ नवमालिनी जैः** ॥ नजभयाः जैरित्यष्टभिर्यतिः यथा "कलयति वैरिभूमिपतिलक्ष्मीं परिमलहारी कीर्तिकुसुमौघं । सपदि ददाति तुभ्यमनवद्यं नृप नवमालिनीयमसिलेखा" १८० ❀ **न्जौ ज्रौ मालती** ॥ नजजराः यथा "भ्रमर सखे व्रज यत्र सा प्रिया कथय दशामिति मे तदग्रतः । अभिनवपुष्पितरम्यमालतीपरिमलमुल्लसितं पिबाथवा" वरतनुरित्यन्ये १८१ ❀ **नौ रौ प्रमुदितवदना** ॥ यथा "स्खलितवचसि भर्त्तरि भ्रूकुटिं, प्रियसखि घटयेत्यपि प्रेरिता । अविदितरसविभ्रमा बालिका, प्रमुदितवदना भवत्युन्मुखी" चंचलाक्षीत्यन्ये । गौरीत्यपरे १८२ ❀ **सा प्रभा छैः** ॥ सा प्रमुदितवदना छैः सप्तभिर्यतिश्चेत्प्रभानाम यथा "प्रचुरविभवतानवं यौवनं विमललवणिमा समग्राः कलाः । सकलमपि सखे तदेतन्मुधा, यदि मृगनयना न हेमप्रभा" १८३ ❀ **न्जज्यास्तामरसं** ॥ नजजयाः यथा "सततविकाससमुद्धुरशोभं सकलकलंककलापरिमुक्तं । तव वदनं मदिराक्षि किमेतद्भवति न तामरसं न च चंद्रः" कमलविलासिनीत्यन्ये १८४ ❀ **ज्रज्रा विभावरी** ॥ जरजराः यथा "पयोनिधेरवाप्य तोयसंपदं, मदाद्बलाहकेन पश्य यत्कृतं । य एष तस्य हर्षकारणं सुतः, स एव संवृतो विभावरीपतिः" वसंतचत्वरमित्यन्ये १८५ ❀ **र्यन्याः कुमुदिनी** ॥ रयनयाः यथा "बोधितापि रम्यैः करनिकैरस्ते हासलेशमासादयति न यस्मात् । मुंच मुंच तस्मादिह नलिनीयं, रोहिणीपते हंत कुमुदिनीव" १८६ ❀ **भ्तौ न्सौ ललना ङैः** ॥ भतनसाः ङैरिति पंचभिर्यतिः यथा "रम्यनितंबां नवतनुलतिकां, संभृततृष्णां गजगतिरुचिरां । विंध्यधरित्रीं तव नृप रिपवः, संप्रति

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

भेजुर्नंतु निजललनां" १८७ ॐ नौ यौं कामदत्ता ॥ ननरयाः यथा "निकृतिकलुपया धिया वितीर्णं, बहुतरमपि निष्फलत्वमेति । सुकृतममृतकारणं प्रसूते ध्रुवमिह कणिकापि कामदत्ता" १८८ ॐ नो रिमैंघांवली ॥ रिरिति रगणत्रयं यथा "स्तनितघोरघोपाट्टहासातुला तरलतारविद्युच्छटालोचना । विरहिणीजनप्राणघातोद्यता, नभसि राक्षसीयं न मेघावली" वसंतेति कश्चित्" १८९ॐ त्यौ त्यौ पुष्पविचित्रा ॥ तयतयाः यथा "भ्राम्यद्भ्रमरव्याकीर्णोद्धुरगंधा मंदारवती संतानप्रसवाढ्या । नाभेयजिनस्योद्दामा सुरनाथैर्दिष्ट्या रचिता पूजा पुष्पविचित्रा" १९० ॐ सा मणिमाला चैः ॥ सा पुष्पविचित्रा चैः पङ्क्तियतिश्चेन्मणिमाला यथा "संतोपधनानां का नाम समृद्धिश्चारित्रसुधाशौ धिक्कामपिपासां । निर्बीजसमाधावास्तां सुरसौख्यं जैनी यदि कंठे वाक्किं मणिमाला" १९१ ॐस्यौ स्यौ केकीरवं॥ सयसयाः यथा "पथिक प्रयाहि त्वरयैव नो चेत्पुरतः समुज्जृंभिणि मेघकाले । भवतो द्विजिह्वस्य हरिष्यतेऽसून् समदध्वनत्केकिरवः प्रचंडः" १९२ ॐ निसौ ह्रीः ॥ निरिति नगणत्रयं सश्च यथा "सितमहसि धवलयति धरां, सुभग कुरु यदिह समुचितं । तव विशदगुणहृतहृदया, ह्रियमपि परिहरति सुतनुः" १९३ ॐ ज्सौ स्यौ कोलः ॥ जससयाः यथा "चुलुक्यनृपते त्वयि विभ्रति क्ष्मां, विहाय धरणीधरणप्रयासं । पयोधिपुलिने रमतां यथेच्छं, स संप्रति चिराय पुराणकोलः" १९४ $\frac{1}{3}\frac{2}{6}$ ॐ अतिजगत्यां नतिगा उर्वशी ॥ नगणः तगणत्रयं गुरुश्च यथा "अजननियौंपितामस्तु वंशे सतां, मलिनिमानं स्वशीलेन यास्तन्वते । भगवतो वासुदेवात्प्रसूतापि हि त्रिदशवेश्यात्वमंगीचकारोर्वशी" १९५ॐन्जौ ज्रौ गः सुवक्त्रा ॥ नजजरगाः यथा "हृतहृदयः खलु यद्विलासलक्ष्म्या, रतिमपि पुष्पशरस्तृणाय मेने । लवणिमवारितरंगिणी किलैषा, हरति न सापि मुनेर्मनः सुवक्त्रा" १९६ अचलेत्यन्ये । ॐ भीगावंगरुचिः ॥ भचतुष्टयं गुरुश्च यथा "येन विधिप्रतिपक्षतयेव सदाऽकारि कृतार्थक एव दरिद्रजनः । कस्य मुदं न ददाति नृपो भरतः सोंगरुचिप्रतिपिद्धसहस्रकरः" १९७ ॐ म्नौ ज्रौ गः प्रहर्षिणी गैः॥ मनजरगाः गैरिति त्रिभिर्यतिः यथा "उत्प्रेंखत्त्रिदशधनुश्छलेन वर्पालक्ष्योद्यन्मणिरुचिचित्रतोरणस्रक् । पंचेपोर्भुवनजयोत्सवैकचिह्नमाबद्धा सपदि मनःप्रहर्षिणीयं" १९८ ॐ ज्भौ स्जौ गो रुचिरा घैः ॥ जभसजगाः घैरिति चतुर्भिर्यतिः यथा "समुल्लसद्दशनमयूखचन्द्रिकातरङ्गिते तव वदनेन्दुमण्डले । सुलोचने कलयति लांछनच्छविं, घनाञ्जनद्रवरुचिरालकावली" १९९ ॐ म्तौ य्सौ गो मत्तमयूरम् ॥ मतयसगाः । घैरितिवर्त्तते यथा "प्रावृट्लक्ष्म्या निश्चितमत्रावतरंत्याः, संभूयाग्रे कल्पितकोलाहलमुच्चैः । जल्पंतोऽमी हंत निदाघापसरेति, प्रातीहार्यं मत्तमयूराः कलयंति" २०० ॐ नौ त्रौ गाः क्षमा ॥ नततरगाः घैरिति वर्त्तते यथा "अयि जडयति बंधो किमंग शौचैः क्वचिदपि सुकृतं स्यान्मुधासि मूढः । यदिह च परलोके च साधु तत्त्वं शृणु कुरु हृदयस्थां क्षमामजस्रम्" २०१



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

❀ मौ जौ गः श्रेयोमाला ॥ धैरिति वर्तते यथा "लक्ष्मीलीलागारं विनम्रपुरंदरभ्राम्यद्भृंगश्रेणीकृतस्तवनध्वनि । नेत्रानंदं ताम्रांगुलीदलबंधुरं, श्रेयोमालां दद्याजिनेंद्रपदांबुजं" २०२ ❀ नौ तौ गः कुटिलगतिश्छैः ॥ छैरिति सप्तभिर्यतिः यथा "यदसरलतरभ्रूर्विभ्रमालका, कुटिलगतिरतिप्रौढवाग्वक्रिमा । तदियमघटि भोः कौतुकात् कामिनी नियतमनृजुना केनचिद्वेधसा" नर्त्तकीत्यन्ये २०३ ❀ नौ म्रौ गः क्षमा ॥ ननमरगाः छैरिति वर्तते यथा "त्वदरिमृगदशामावासप्रदानाद्भयमिव परमं राजन् धारयंतः । प्रचलति भवतः सैन्ये दिग्जयार्थं प्रतिदिशमगमत्कंपं क्ष्माभृतोऽमी" २०४ ❀ य्मौ रौ गश्चंद्रिणी चैः ॥ यमररगाः चैरिति पङ्क्तिर्यतिः यथा "धराभारं विभ्रल्लीलया बाहुदंडे, जयत्येष श्रीमानूर्जितः क्षोणिनाथः । भुजंगीभिर्गीतैरुज्वलैर्यद्यशोभिर्बभूव प्रोद्दामैश्चंद्रिणी नागभूमिः" २०५ ❀ नौ यौं गश्चंद्रिका ॥ ननरयगाः यथा "निखिलकुवलयप्रपंचितानंदा, परिणतशरकांडपांडुरच्छाया । इह जगति चुलुक्यचंद्र निस्तंद्रा प्रसरति तव कीर्तिचंद्रिका नित्यं" २०६ ❀ ज्तौ स्जौ गो मंजुभाषिणी ॥ जतसजगाः यथा "नरेंद्र रुष्टे त्वयि महीभुजां मतिर्नवे पृषच्चर्मणि न चित्रवर्मणि । कटु क्वणंती लुठति शृंखलापदद्वयेन कांतानुशयमंजुभाषिणी" २०७ ❀ न्सौ रौ गश्चंद्रलेखा ॥ नसररगाः यथा "सुभगसुखदं मोहजालं जनानां, हृदयहरणं बंधनं लोचनानां । सुललितवपुः सा सखे पीयते ते विरहतमसा चंद्रलेखेव तन्वी" २०८ ❀ न्सौ जौ गो लयः ॥ नसजजगाः यथा "त्वमसि शरणं प्रसीद जगत्पते, वितर सुतरां ममेह समीहितं । चरणकमले जिनेश्वर तावके, भवतु मनसश्चिरं परमो लयः" २०९ ❀ न्सौ तौ गो विद्युन्मालिका ॥ नसततगाः यथा "घनतमसि नष्टान् द्रष्टुमत्रेक्षणे, निखिलपथिकान् संहारबुद्ध्या ध्रुवं । बत परिगृहीताः प्रावृषा दीपिकाः, स्युरिह रुचिविद्युन्मालिकाव्याजतः २१० ❀ स्जौ स्जौ गो नंदिनी ॥ सजसजगाः यथा "वसुधाधिपत्यमिह देव नार्थये, जिननाथ नापि पुरुहूतसंपदं । वरदोऽसि चेन्मम तदा सदा मतिर्भवताद्भवद्गुणगणाभिनंदिनी" कनकप्रभा जया सुमंगलीति च केचिदाहुः । मनोवतीतिभरतः २११ ❀ न्जौ न्सौ गो मदललिता ॥ नजनसगाः यथा "कलितकलंकशितिसिचयसंपत् करदलितेद्धतिमिरयमुनांबुः । प्रथयति गौरवपुरमृतरश्मिर्मुशलधरस्य समदललितानि" २१२ ❀ स्जौ सौ गः कुटजं ॥ सजससगाः यथा "परमं प्रकर्षमधिरुह्य विदध्यात्किमिव प्रवासविषमस्थितिभाजां । कुरुते यतः प्रथमतोऽपि घनर्तुः कुटजप्रसूनरजसा जगदंधं" भ्रमर इत्यन्यः २१३ ❀ नौ त्सौ गो गौरी ॥ ननतसगाः यथा "ननु भव कुसुमेषो निशितशस्त्रस्तृणमयि यतिनोऽस्य प्रशमवृत्तेः । क्वचिदपि खलु तेऽन्ये मनसि येषां निवसति मृगनेत्रा कनकगौरी" २१४ ❀ त्भौ स्जौ गो लक्ष्मीः ॥ तभसजगा यथा "विद्वद्गणैरुचितमुदीर्यते सदा सिद्धे-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

शनंदन पुरुपोत्तमो भवान् । यत्त्वां स्वयंवरविधिनाभ्युपेयुपी, लक्ष्मीरियं रणमकराकरोत्थिता" २१५ ॐ त्भौ जौ गो अभ्रकं ॥ तभजजगाः यथा "अभ्यस्यतीव रसवादकलामयं, सांध्यः क्षणोभिमतचंद्रमहोदयः । तारौघधिप्रकटनाभिरतः सखे प्रोद्दीपयन्विविधवर्णमिहाभ्रकं" २१६ ॐ म्तौ स्रौ गः कोड्डुंभो ङैः ॥ मतसरगाः ङैरिति पंचभिर्यतिः यथा "लक्ष्मीः कांताभिर्विकचनेत्रोत्पलाभिस्तांबूलपत्रैः परिणतैर्वानवासैः । काव्यं कोड्डुंभाभिधनवच्छंदसेदं चेतोहारित्वं भजति वैदग्ध्यभाजां" २१७ ॐ स्यौ सजौ गः सुदंतं ॥ सयसजगाः यथा "त्रिदिवं व्रजद्भिर्दिविपत्पतेः पुरः, सुभटैर्जवान्निर्दलिता इवार्गलाः । करवालघातैस्त्रुटितास्तदा समिद्धसुधासु दंताः करिणां चकाशिरे" २१८ ॐ नौ सौ गः कमलाक्षी ॥ यथा "विरचितनिबिडतरोत्कलिकाभिः, कमिव नवमदजुपं न विदध्युः । सपदि शरदि सरितः कलहंसप्रकटितगतिललिताः कमलाक्ष्यः" २१९ ॐ नीगौ त्वरितगतिः ॥ नगणचतुष्टयं गुरुश्च यथा "नृवर तव धनुरधिगतगुणं, ध्वनति च युधि भयवशतरला । कलयति च पिचुनिचयतुलनां, त्वरितगतिररिनृपतिपृतना" लघुगतिश्चपला वेत्यन्ये २२० $\frac{१३}{२६}$ ॐ शकर्यां नौ सौं लगावपराजिता छैः ॥ ननरसलगाः छैरिति सप्तभिर्यतिः यथा "शशधरवदनं कुशेशयलोचनं, शुचिरुचिरुचिरं ललाटतटस्थितं । विशदकरुणयाधिवासितमृद्धयो जिनमनुसरतां भवंत्यपराजिताः" २२१ ॐ म्सौ म्भौ गावलोला ॥ मसमभगगाः छैरितिवर्त्तते यथा "आत्मारामपैदकव्यापाराभिरतानां संसाराब्धिरगाधस्तेषां गोष्पदमात्रं । अंतस्तत्त्वसमाधेः प्राणायामनिरोधान्नासावंशनिपण्णा येषां दृष्टिरलोला" २२२ ॐ नौ भ्नौ लगौ प्रहरणकलिता ॥ ननभनलगाः छैरितिवर्त्तते यथा "तव गुणनिकरैरपि दृढविपुलैरहितसमुदयः सपदि नियमितः । नरपतितिलक त्वमिह भुजलतां, प्रथयसि किमसि प्रहरणकलिता" २२३ ॐ नौ म्यौ ल्गौ करिमकरभुजा ॥ ननमयलगाः छैरिति वर्त्तते यथा "रणभुवि नृपते निर्स्त्रिशदंडेन ते, रिपुभटकरटिप्रोन्माथिना जृंभितं । जलनिधिजठरे पाठीनकूर्मावली करिमकरभुजौर्वेणेव तेजस्विना" २२४ नौ तौ गौ वसंतः ॥ ननततगगाः । छैरितिवर्त्तते । यथा "सखि भवति भवच्छेपगंडूपपादप्रतिहतिभिरियं यत्प्रसूनप्रसूतिः । कुरुबकबकुलाऽशोकमुख्यद्रुमाणां, तदिह ननु तवायत्तसंपद्वसंतः" नंदीमुखीत्येके २२५ ॐ म्रौ तौ गौ लक्ष्मीः ॥ मरततगगाः छैरितिवर्त्तते यथा "मामद्वैतानुरागां मन्यतेऽसौ तृणायेत्येवं दौर्भाग्यदुःखोन्मूलनं चिंतयंती । मन्ये त्वत्खड्गधारां तद्व्रतं कर्तुकामा, काम सिद्धेंद्रस्त्वं नो सेवते राजलक्ष्मीः" २२६ ॐ मो रौ सो ल्गौ जया ॥ मररसलगाः । छैरितिवर्त्तते । यथा "माद्यद्गंधद्विपानां लसद्दशनाशनिक्रीडाघातैः समंताद्विदारितसानवः । यस्योच्चैः सह्यविंध्योज्जयंतहिमालयाः, शैलाः शंसंति संप्रत्यपीह दिशां जयान्" २२७

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

❀ **म्रभ्यलगा ज्योत्स्ना** ॥ मरमयलगाः छैरितिवर्त्तते । यथा "दृप्यत्पातालकुक्षौ स्फूर्जद्गुहायां, गिरेर्मूर्छत्कांतारमध्ये भूपाल घोरं तमः । नागीनां किन्नरीणां पौलिंदवामभ्रुवां क्रीडागानेषु कीर्त्तिज्योत्स्नाऽधुना हन्ति ते" २२८ ❀ **नम्रसलगाः सिंहः** ॥ नमरसलगाः । छैरिति वर्त्तते । यथा "समदनागेंद्राणां कपोलविपाटने स किल सद्यो जिघ्रत्प्रियावदनांबुजं । तदिति शंक्यं चित्रं चरित्रमहाद्भुतं हरिणपोतैर्द्रष्टुं न सिंहविजृंभितं" २२९ ❀ **ज्सौ नौ गौ राजरमणीयं** ॥ जसरनगगाः । छैरिति वर्त्तते । यथा "समुद्धृतधरित्रीतलः प्रमुदितार्यो विनम्रतरधाराधरानुसृतपादः । चुलुक्यनृपकीर्त्ते दधत्रिपथगां त्वं, विभासि खलु शैलाधिराजरमणीयः २३० ❀ **म्तौ न्सौ गावसंबाधा** डैः ॥ मतनसगगाः डैरिति पंचभिर्यतिः यथा "नैतल्लक्ष्मांके किमुत कटुरसंवाश्राहेतुः सलीनं विषमिह सहजप्रीत्या । तेनायं मूर्छां विरचयति सुधारश्मिः, शंके निःशंकः सपदि विरहिलोकानां" २३१ ❀ **त्भौ जौ गौ वसंततिलका** ॥ तभजजगगाः यथा "सत्कर्णिकारचितविभ्रमभासमानां नव्यस्फुरद्रुचिरपत्रलतावलीकां । दिष्टया **वसंततिलकां**चितचारुशोभां कांतां वनश्रियमिमां त्वमुपागतोऽसि" उद्धर्षिणी सैतवस्य, सिंहोन्नता काश्यपस्य २३२ ❀ **नौ भौ गौ वलना** ॥ रनभभगगाः यथा "नव्ययौवननटस्य तनोति नियोगं, निश्चितं वरतनुर्विकसन्मुखरागा । हस्तकैरभिनयं कुरुते युवती यत्, व्यश्नुतेऽङ्गवलनादि पदे पद एषा" लतेत्यन्यः २३३ ❀ **न्नलगाः सुकेसरं** ॥ नरनरलगाः यथा "घटयेज्ज्यया किमिति काम कार्मुकं, यदभवत्पुरस्तव जगद्वशंवदं । मधुकरीनिनादमयमंत्रमंत्रितैर्जलरुहां **सुकेसर**परागचूर्णकैः २३४ ❀ **नीर्गात्रुपचित्रं** ॥ नीरिति नगणाश्चत्वारो गद्वयं च यथा "अनुसर हिमकरकिरणसमूहं, भज नवकिशलयमृदुशयनीयं । प्रियसखि ननु शरदियमुपतस्थे, यदभिसरति दिनपतिरुपचित्रं" २३५ ❀ **न्जभ्जलगा धृतिः** ॥ नजभजलगाः यथा "विहर नितंबबिंबफलके सुदृशां, गतनिधनानि संचिनु धनानि भृशं। रचय चिरं च सुंदरनराधिपतां, तदपि न किंचनास्ति तव चेन्न धृतिः" मणिकटकमित्यन्ये २३६ ❀ **भौ रसल्गा दर्दुरकः** ॥ भभरसलगाः यथा "मृत्युमुपैति यदा यदा कणशो दलत्यपि तदापि न हंत विश्वसनोचितः । कालमवाप्य पुनर्जनश्रवणज्वरं, दुर्जनदर्दुरकः करोति कटूक्तिभिः" २३७ ❀ **भ्जस्नाद्गौ स्खलितं** ॥ भजसनेभ्यः परौ गौ यथा "पुष्पशर रम्यतनुता सल्लवणत्वं, वाङ्मधुरता चतुरता बहुकलत्वं । सर्वमपि चास्य सुभगस्य रतये मे, केवलमिदं व्यथयति **स्खलितगोत्रं**" महिता कांता वनमयूरश्चेत्यन्ये २३८ ❀ **ल्गौ चेदिंदुवदना** ॥ भजसनेभ्यः परौ लघुगुरू चेदिंदुवदना यथा "सस्पृह इव त्वयि रतेरपि दयितस्त्वद्वदनवीक्षणवशाद्गलितधनुः । ताडयति नैष भवतीं शरनिकरैरिंदुवदनेन रमणे तदसि रता" २३९ ❀ **न्भन्ता गौ शरभललितं** ॥ नभनतगगाः यथा "वहसि गंधकरटिघटां पृष्ठदेशे,कररदैः प्रहरसि च मत्तांबुवाहे । दलयसि क्षितिधरशिरः

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

पादपातैरिदमहो शरभललितं तेन यत्नः" २४० ❀ तच्छरभा घचैः ॥ तच्छरभललितं घचैश्चतुर्भिः षड्भिश्च चेद्यतिः शरभासंज्ञं यथा "मृगरिपुः शशकतुलनां यत्पुरस्तात्कलयति द्विरददलनव्यक्तकेलिः । तव सुतः स इह शरभोऽनन्यवीरः, सुतवती ननु शरभिके त्वं तदेका" २४१ म्भन्या गौ कुटिलं ॥ मभनयगगाः घचैरिति वर्त्तते यथा "श्रीचौलुक्यक्षितिपतिलक दिग्यात्रार्थं त्वत्सैन्येऽस्मिन् प्रसरति किल पातालेंद्रः । न्यंचद्भूमीभरकुटिलितमूर्द्धा मन्ये, साहाय्यार्थं रचयति भुजदंडानुच्चैः" २४२ हंसश्येनीत्येके $\frac{१४}{२२}$ ❀ अतिशक्वर्यां स्जसस्या ऋषभः ॥ सजससयाः यथा "जगतां विभुः पृथुजटापिहितांशदेशः, सततं महर्षिगणसेवितपादपद्मः । मकरध्वज-प्रमथनप्रथितप्रभाव, ऋषभध्वजः स भगवान् भवतोऽस्तु भूत्यै" २४३ ❀ नीसौ शशिकला ॥ नीरिति नगणाश्चत्वारः सश्च यथा "अरतिमति हि मम वपुषि विदधतीं, तिरयसि यदि नवजलद शशिकलां ॥ स्वयमपि किमिति न कलयसि करुणां, यदिह विरचयसि कटु रसितमहो" २४४ अत्र सप्तभिर्यतिरित्येके । चंद्रावर्त्तेति पिंगलः । ❀ सा स्त्रक्चैः ॥ सा शशिकला चैः षड्भिर्यतिश्चेत् स्त्रक्संज्ञा । यथा "प्रसरति तव सुभग विरहदहने, शृणु यदजनि किमपि कुवलयदृशः । सरसिजमपि तपति नवविचकिलस्त्रगपि सपदि जनयति भृश-मरतिं"२४५ मालेतिपिंगलः ❀ मणिगुणनिकरो जैः ॥ शशिकलैव जैरष्टभिश्चेद्यतिर्मणिगुणनिकरः यथा "नृवर यशसि मतिरविकलकलता भुजबलमनुपममतिनयपरता । नतिरनुगुरुजनमुचितम्नतुरता त्वयि जयति नृपतिमणिगुणनिकरः" २४६ ❀ नौ म्यौ यो मालिनी ॥ ननमयया: । जैरिति वर्त्तते । यथा "प्रतिमुहुरिह दोलांदोलनव्यापृतानां, कुवलयनयनानामाननैरुल्लसद्भिः । विमललवणिमांभश्चंद्रि-कांद्रात्किरद्भिर्नवशशधरमालामालिनीवाऽभवद् द्यौः" २४७ नांदीमुखीतिभरतः । ❀ नौ मो रौ चंद्रोद्योतः ॥ ननमरराः । जैरिति वर्तते । यथा "ज्वलति सुभग तस्यास्त्वद्विप्रयोगानले, भवति न खलु किंचित् प्रीत्यै कुरंगीदृशः । सपदि दहति देहं यच्चांदनोपि द्रवः प्रथयति नवचंद्रोद्योतोऽपि नेत्रव्यथाः" २४८ ❀ नौ तभ्रा उपमालिनी ॥ ननतभराः । जैरिति वर्त्तते । यथा "नृपवर रिपवस्ते विहाय पुरस्थितिं, नवनवमुनिमुद्राजुषः खलु संप्रति । विदधति नृप पर्णोटजान्यभिजाह्नवीयमुनमनु च चर्मण्वतीमुपमालिनि" २४९ ❀ मियौं चित्रा ॥ मिरिति मगणत्रयं यगणद्वयं च जैरिति वर्त्तते । यथा "शत्रौ मित्रे हर्म्येऽरण्ये संमदे वा गदे वा, राज्ये भैक्षे रत्ने लोष्टे कांचने वा तृणे वा । स्रोतस्विन्यां कामिन्यां वा निंदने वा स्तुतौ वा, चित्रां चित्तावस्थां हित्वा संश्रयेथाः समाधिं" मंडूकी चंचलावेत्यन्ये २५० ❀ माद्रम्ययाश्चंद्रलेखाः छैः ॥ मगणात्परे रमयया: छैरिति सप्तभिर्यतिः । यथा "राजन् सत्यं तदेतद्भ्रमोद्भुतं वर्णनं ते, दोर्दंडस्थामभिः स स्पर्द्धां करोतु त्वदीयां । आच्छिद्याद्यो मुरारेर्वक्षस्थलात्कौस्तुभं वा, यः कर्षेच्चंद्रलेखां शंभोर्जटामंडलाद्वा" २५१




P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

❀ **राद्धा** ॥ रगणात्परे यदि रम्ययास्तदा वा चंद्रलेखा । ररमयया: छैरिति वर्त्तते । यथा "एक एव क्षणोऽसावानंदनिस्पंदहेतुः, सत्कृतैः प्राक्तनैर्मे कैश्चित्सखेऽद्य प्रवुद्धं । नेत्रनीलोत्पलानां पीयूषवृष्टिं किरंती यत्पुरः कंबुकंठी सा चंद्रलेखेव दृष्टा" २५२ ❀ **स्जनन्या एला-ड्रैः** ॥ सजननया: । ड्रैरिति पंचभिर्यतिः यथा "वलितैर्घटोद्भवमुनिदिशमभि यस्य, प्रबलैर्बलैर्बलमथनसदृशमूर्त्तेः । निपिपेविरे चिर-मुदतटवनांताः परितो लसद्वहलल्वलिबकुलैला:" २५३ ❀ **न्जभज्राः प्रभद्रकं** ॥ नजभजरा: यथा "जयति जगत्रयोपकृतिकारणोदयो जिनपतिभानुमान्परमधाम तेजसां । भविकसरोरुहां गलितमोहनिद्रकं, भवति यदीयपादलुठनात् प्रभद्रकं" २५४ ❀ **र्जर्जरास्तूणकं** ॥ रजरजरा: यथा "स्फीतनव्यगंधलुब्धषट्पदौघसेविताश्चैत्रमासि पश्य भांति चूतमंजरीशिखाः । ऊर्द्ध्वदृश्यमानकंकपत्रकृष्णपक्षकास्तूणक-इवेह वीर मन्मथेन लंबिताः" २५५ ❀ **नो जौ भ्रौ कलभाषिणी** ॥ नजजभरा: यथा "स्फुरति च दक्षिणमारुतो मृदुशीतलः, प्रतिदिशमुल्लसितं च केसररेणुभिः । पिकयुवतेः प्रसृताश्च पंचमगीतयस्तदपि सखे मयि न प्रिया कलभाषिणी" अरविंदमित्येके २५६ ❀ **रान्नभभ्राः सुंदरं** ॥ रगणात्परे नभभरा: यथा "निर्ममे सपदि पत्रलता न कपोलयोर्नापि यावकरसो निहितोऽधरपल्लवे । वल्लभाभिसरणोत्सुकया सुदृशाऽनया, सुंदरीत्वमधिकं तदपि प्रतिपद्यते" २५७ मणिभूषणं रमणीयं चेत्येके । ❀ **नाद्गौः** ॥ नगणात्परे नभभ्राश्चेत्तदा गौर्नाम ननभभरा: । यथा "अनुदिनमपि हंत दुहंति कवीश्वरास्तुटति नच यदीयसदुक्तिपयः शुचि । हृदयमुकुरमध्या-मधिश्रयतां सदा, निरुपमचरितप्रथिता मम सैव गौः" २५८ ❀ **नौ रो यौ भोगिनी** ॥ यथा "दधति तव चुलुक्य चंद्रधात्रीं भुजेऽस्मिन् भजतु जलनिधौ चिराय निद्रामुपेंद्रः । विदधतु दिगिभाः करेणुकाभिर्विलासं, सममभिरमतां च वासुकिर्भोगिनीभिः" २५९ ❀ **त्जसस्याः शिशुः** ॥ तजससया यथा "त्वं नासि दृशोः पथि विमुक्त तथापि नाथ, पापं भुवने तव गिरो जिन नाशयंति । त्रस्यंति हि शैलशिखरांतरितस्य दूराल्लीलाध्वनितेन मृगराजशिशोर्गजेंद्राः" २६० ❀ **भ्यसस्याः केतनं** ॥ भयससया: यथा "कोकिलवधूनां कलपंचमरागगीतिश्रुतविटपानां नवपल्लवसंपदश्च । दक्षिणसमीरो मृगशावदृशां कटाक्षा, बिभ्रति हि जैत्रायुधतां झषकेतनस्य" २६१ ❀ **त्भौ जौ रो मृदंगः** ॥ तभजजरा: । यथा "कृत्वा जगत्रयजयं मकरध्वजप्रभुः, संगीतकं सपदि कारयते रतेः पुरः । आकाशरंगभवने नरिनर्त्ति नर्त्तकी, विद्युद्घनतुंरपि मेघमृदंगवादकः" २६२ ❀ **मुः कामक्रीडा** ॥ मुरिति पंच मगणा: यथा "उक्ता वाचं नो दत्ते तल्पे शेते व्यावृत्तांगी, पर्याक्षिप्तक्षौमप्रांता प्रस्थातुं कांक्षत्याशु । कामक्रीडावार्त्ता गोष्ठीप्रारंभेऽप्युच्चैर्व्रीडां, धत्ते पत्युः प्रीत्यै वामारंभाप्येवं सा बाला" २६३·१६ ❀ **अष्टौ नज्रा भौ गो मणिकल्पलता** ॥ नजरभभगा: । यथा "उपलतृणस्वरूपचिंतामणिकल्पलता-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aradhak Trust

व्यतिकरतो मुधैव मेरुर्मंदमुद्वहति । जयति यदुज्जयंत एकोयमचिंत्यफलं प्रददद्दलं करोति नेमिः स्वयमेप जिनः'' २६४ ❀ भीः स्गौ शरमाला ॥ भीरिति भचतुष्टयं सगौ च । यथा ''ऐक्षवकार्मुक कौसुमसायक भटमानिन्, मुंच चतुर्मुखशंभुचतुर्भुजजयगर्वं । उत्तमसंयमवर्मवृतात्मनि जिननाथे, संप्रति शंबरसूदन संहर शरमालां'' २६५ ❀ भुगौ संगतं ॥ भुरिति पंचभगणा गुरुश्च यथा ''वीर तवासिपथेन गतैररिभिस्त्रिदिवं, तत्र दिवस्पतिमानिभिरातुलितः प्रबलैः । अद्य हरिर्विमृशन्सचिवैः सह तद्विजये, त्वन्नवसंगतकल्पनमौपयिकं मनुते'' पद्ममुखी सुरता च सद्यमुद्धरणसोपानकं चान्येषां'' २६६ ❀ मुगौ कामुकी ॥ मुरिति मगणपंचकं गुरुश्च । यथा ''संवृत्तोऽयं संध्याकालः प्राप्तोऽस्ताद्रेः श्रृंगं भानुर्विस्फूर्जद्भिर्ध्वांतस्तोमैरेकीभूतं काष्ठाचक्रं । चापाकृष्टिं व्यातन्वानः कंदर्पोऽपि क्रीडत्युचैर्गच्छत्येतास्त्यक्ताशंकं क्रीडास्थानं कामुक्योऽपि'' २६७ ❀ सुगौ वा ॥ सुरिति सगणपंचकं गुरुश्चेदियमपि कामुकी । यथा ''अपयाहि पितामहचित्तविलोभिनि धिक्त्वामयि कौशिक कामुकि न त्वमपि त्रपसे किं । असि हास्यपदं नलकूबरकामिनि यद्वः कुलिशातिदृढेऽत्र जिनेंद्रहृदि प्रविविक्षा'' सोमडकमित्यन्ये २६८ ॥ ❀ नुगौ चलधृतिः ॥ नुरिति नगणपंचकं गुरुश्च । यथा ''प्रणमदखिलसुरपतिकनकमुकुटस्फुटरुचिनिचितनखमणिकिरणचये । कुरु जिनचरणजलरुहि नमनरुचिं चलधृतिमपजहि च विपयसुखधियं'' २६९ ❀ नुलाचलधृतिः ॥ नुरिति नगणपंचकं लघुश्च । यथा ''विलुलितचिकुरमधरनिहितदशनमविरलपुलकनिचितकुचयुग मयि । रतिरसरभसमणितमुखरितमिह विलसति तव सखि सुरतमचलधृति'' २७० ❀ न्भौ जिगौ मंगलमंगना घैः ॥ नभौ जिरिति जगणत्रयं गुरुश्च ॥ घैरिति चतुर्भिर्यतिः । यथा ''कुटिलतां धृतवती गुरुभोगमदोद्धता, विदधती प्रलयवेपथुसादपरंपरां । विपधरीव पुरतः स्फुरता यतिनामहो, विचरतां सुगतिमार्गममंगलमंगना'' २७१ ❀ भ्रनिगा ऋषभगजविलसितं छैः । भरौ नगणत्रयं गुरुश्च । छैरिति सप्तभिर्यतिः । यथा ''अद्भुततुंगमूर्त्तिरतिशयललितगतिर्देव समग्रकर्मवनविदलनरसिक । निर्भरमंतरंगरिपुबलविजयपटुर्नाथ दधासि तत्त्वमृषभगजविलसितं'' मत्तगजविलसितमिति भरतः २७२ ❀ निजस्गा ललितपदं डैः ॥ निरिति नगणत्रयं जसगाश्च । डैरिति पंचभिर्यतिः । यथा ''चुलुक्यकुलजलनिधिशशांक तव दीनं, रिपुनिवहमतितरलकातरमुपेक्ष्य । त्वदसिरुचितमसिविततं युधि भवंतं, ललितपदमभिसरति वीर जयलक्ष्मीः'' २७३ ❀ यम्नस्गा जयानंदं चैः ॥ यमनसरगाः । चैरिति षड्भिर्यतिः यथा ''नमच्छक्रश्रेणीमणिमुकुटकोटीविटंकैर्निघृष्टांह्रे देव प्रबलजडताचंडभानो । सुधाधारासारैरिव सदसि वाचां प्रपंचैर्जयानंदस्यंदं सपदि जगतामादधानः'' प्रवरललितमित्येके । २७४ ❀ भ्रौ न्रौ न्गौ महिषी ञैः ॥ भरनरनगाः । ञैरिति दशभिर्यतिः यथा ''सिद्धनरेन्द्रनंदन भवद्धि-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

पक्षनगरे, संप्रति सौधभित्तिलिखितास्तुरंगचमूः । वीक्ष्य नितांतकोपकुटिलेक्षणा प्रति मुहुः, शृंगविघटनैर्विघटयत्यरण्यमहिषी" २७५ ❀ म्भौ न्मौ न्गौ मदनललिता घचैः ॥ मभनमनगाः । घचैरिति चतुर्भिः षड्भिश्च यतिः । यथा "गाढाक्रांता कुचयुगभरेणार्त्ता-च विरहे, नित्योद्विग्नातिघनजघनप्राग्भारधरणे । सध्रीचीभिर्धृतकरतला कांते कृतरतिर्मंदं मंदं मदनललिता याति प्रियगृहं" २७६ ❀ न्जभ्जर्गा वाणिनी ॥ नजभजरगाः यथा "अविरलपुष्पबाणललितानि दर्शयंती, परिमलहारितामरसवक्त्रमुद्वहंती । मदकलराज-हंसगमनानि भावयंती, शरदिह मानसं हरति हंत वाणिनीव" २७७ ❀ नजिर्गा वा ॥ नगणो जत्रयं रगणो गुरुश्च यदा तदापि वाणिनी । यथा "कुरु करुणां वितर प्रतिवाचमत्र कां वा, हृदि दयितां निदधासि निमीलिताक्षियुग्मं । अयमपि ते ननु दासजनोऽनुकंथ एवं, जयति वीरजनो गदितो द्युवाणिनीभिः" २७८ ❀ ज्रज्रज्गाः पंचचामरं ॥ जरजरजगाः यथा "त्वदीयपादपंकजे निधाय भक्तिमुज्ज्वलां, मनुष्यकीटका वयं विदध्महे किमद्भुतं । यदीयजन्मतो महोत्सवं तथा प्रचक्रिरे, जिनेन्द्र सप्तविंशतिश्च पंच चामरा-धिपाः" २७९ ❀ र्जर्जर्गाश्चित्रं ॥ रजरजरगाः । यथा "कांतिरिंदुकौमुदीसहोदरावचोविलासः, सर्वदा सुधोज्ज्वलो यशश्च दुग्धसिंधु-बंधुः । क्षुण्णशंखसोदरा गुणास्तवामलं चरित्रं चित्रमेतदेभिरीश मे मनस्तथापि रक्तं" २८० ❀ म्नस्तर्गाः सुरतललिता ॥ यथा "संप्राप्ते मधुसमयसाम्राज्ये पिकीसमूहाः, शंसंति प्रतिदिशमिदं मन्ये नितंबिनीनां । मानित्वं त्यजत सुभगंमान्यत्वमस्तु दूरे, कंदर्पः सुरतललितौपाध्यायकं प्रपेदे" २८१ ❀ भ्रौ न्भौ भ्गौ शैलशिखा ॥ भरनभभगाः यथा "शीतरुजाविधूतचिबुकैः कृतदंतरवो गाढतरप्रयुक्तगजदंतकराभिनयः । शैलशिखाप्रदेशमधिरुह्य तुषारऋतौ, पश्यति भास्करोदयपथं तव वैरिजनः" २८२ ❀ भ्रौ य्नौ न्गौ वरयुवतिः ॥ भरयननगाः यथा "स्फूर्ज्जति संगरप्रदोषे तुरगखरखुरक्षुण्णरजोंधकारघोरे विलसति नृपते । वैरिमहीभुजां समंतात्सुर-वरयुवतीसंगमहेतुरेकदूतीभवदसितिलका" २८३ ❀ र्नोगा ललना ॥ रगणो नगणचतुष्टयं गुरुश्च यथा "दिक्षु चक्षुरनिलहतकुवल-यतरलं, प्रक्षिपंत्यतनुमृगपतिनिनदचकिता । सिद्धराजसुत भजति मृगयुवतितुलां, सांप्रतं वनभुवि तव रिपुनृपललना" २८४ ❀ सौ नौ मो गो वेल्लिता ॥ यथा "सरितां कमितुः स्तवकितघनफनव्याजाद्वितेपु तटेपु बहललवलीच्छायेपु । श्रममाप्तवती त्रिजगति सततं संचारैर्नियतं नृप वेल्लितसुखमभजत्त्वत्कीर्त्तिः" २८५ ❀ म्तौ स्तौ त्गौ कोमललता घङैः ॥ मतसततगाः घङैरिति चतुर्भिः पंचभि-र्यतिः । यथा "मत्तालीनां स्निग्धमधुरोद्गारैर्मुहुर्गीतकैराक्षिप्तोऽस्यारोहणमृगः स्वच्छंदचारी यतः । मंदं मंदं दक्षिणमरुद्वात्येष तेनाधुना स यः पुष्यत्कोमललतालास्यैकशिक्षागुरुः" २८६ १६/२३ ❀ अत्यष्टौ यम्नस्भल्गाः शिखरिणी चैः ॥ यमनसभलगाः चैरिति षड्भिर्यतिः । यथा

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

हरन्सर्वांभोजश्रियमविरतं सिंधुपतिना, कृतार्थस्तन्वानो निशि तमसि विद्योतमसमं । सुधांशुस्तद्वंशे त्वमिव जयसिंहक्षितिपते कलापूर्णः पश्योदयशिखरिणीहाभ्युदयते" २८७ ❀ ज्सजस्यलगाः पृथ्वी जैः ॥ जसजसयलगाः जैरित्यष्टभिर्यतिः । यथा "त्वदीयरिपुभूभुजां पुरि पुरारिवेश्माग्रतो, निरीक्ष्य चमरी वृषं सपदि मन्मथव्याकुला । परिस्पृशति जिह्वया ककुदकेन कंडूयते, निमीलितविलोचना किल चुलुक्यपृथ्वीपते" विलंबितगतिरितिभरतः २८८ ❀ भ्रौ न्भौ न्लौ गो वंशपत्रपतितं अैः ॥ भरनभनलगाः अैरिति दशभिर्यतिः यथा "जर्जरसारिमध्यलुठिताः क्वचिदपि गतिनो, भंगुरवंशपत्रपतिताः क्वचिदपि रथिनः । क्वापि च सादिनो हततुरंगमबलपिहिताः, शत्रुबले भवंस्त्वयि रणांगणमवतरति" वंशदलमित्यन्ये २८९ ❀ सौ ज्भौ जो गावतिशायिनी ॥ससजभजगगाः । जैरिति वर्त्तते । यथा माघस्य "इति धौतपुरंध्रीमत्सरान्सरसि मज्जनेन श्रियमाप्तवतोऽतिशायिनीमपमलांगभासः । अवलोक्य तदेति यादवानपरवारि-राशेः, शिशिरेतररोचिषाप्यपांततिषु मंक्तुमीषे" यादवीत्यन्ये २९० ❀ मो भ्नौ तौ गौ मंदाक्रांता घचैः ॥ मभनततगगाः घचैरिति चतुर्भिः षड्भिश्च यतिः । यथा "जन्मस्नाने स चरमजिनः स्वर्णकुंभौघधारासारं सोढा कथमिति पुरा वज्रिणा शंकितेन । दृष्टः पश्चाज्जयति चरणांगुष्टपर्यंतलीलामंदाक्रांतामरगिरिशिरःकंपतो विस्मितेन" श्रीधरेतिभरतः २९१ ❀ मभ्नरसलगा भाराक्रांता ॥ मभनरसलगाः घचैरिति वर्त्तते । यथा "चौलुक्येंद्र त्वमिह नहि चेदिमां किल धारयेः, कूर्मक्रोडाधिपफणिपतिद्विपाद्रिषु सत्स्वपि । सप्पैत्या ते करटिघटया दिशां विजये तदा, भाराक्रांता नृप वसुमती क्षणान्निपतेदधः" २९२ ❀ मभ्नम्यलगा हारिणी ॥ मभनमयलगाः घचैरिति वर्त्तते । यथा "प्रासादेषु त्वदरिनगरे शून्यत्वमासेदुषि, श्रीचौलुक्यक्षितिपतिशिरश्चूडामणे संप्रति । प्रेंखोलंतो विषधरशतैर्व्यालंबिताः कंचुका, व्यातन्वंति ध्वजपटतुलामुच्चैर्मनोहारिणी" २९३ ❀ न्सौ म्रौ स्लौ गो हरिणी चघैः ॥ नसमरसलगाः चघैरिति षड्भिश्चतुर्भिर्यतिः । यथा "कथय किमियं लक्ष्मच्छाया शुचेस्तु भवेत्कथं, तव हिमरुचे यद्वोत्संगे कृतः कृपया ध्रुवं । नभसि रभसाद्दद्धाटोपप्रधावितलुब्धक-क्षुभितहरिणीगर्भोत्क्रष्टः कुरंगक एवहि" २९४ वृषभललितमित्येके । ❀ नः स्मौ तौ गौ पद्मं ॥ नसमततगगाः चधैरिति वर्त्तते यथा "त्यजत मनुजा जातेर्गर्वं किं तयैवैकया स्यात्, गुणपरिचयो लोकेऽत्यंतं हंत दत्ते प्रतिष्ठां । अजनि चुलुकाचांतांभोधिः कुंभजन्माप्यगस्त्यः, कुलगृहमभूद्देव्या लक्ष्म्याः पंकजातं च पद्मं" २९५ ❀ नस्मम्यलगा रोहिणी ॥ नसममयलगाः चधैरिति वर्त्तते यथा "कुवलयमुदं व्यातन्वानः पूर्णोल्लसन्मंडलः, शिरसि घटयत्पादन्यासं निःशेषपृथ्वीभृतां । उदयमधुना प्राप्तः श्रीमत्सिद्धेन्द्रसूनो भवानिव कृतबुधानंदः सोऽयं श्रीरोहिणीवल्लभः" २९६ ❀ नुर्गौ वसुधारा ङैः ॥ नुरिति पंच नगणा गुरुद्वयं च ङैरिति पंचभिर्यतिः यथा "प्रणतसुरवि-सरमणिमुकुटतटकोटिपरिघट्टितचरणनखरुचिनिचयरम्ये । इह भवति भगवति विहरति जिननाथे प्रतिभवनमभि जगति वसुधारा" २९७



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

❀ न्जभ्जंजा ल्गाववितथम् ॥ नजभजजेभ्यः परौ लगौ यथा । "शृणु परमोपदेशमिह मुग्धमते सततं, भवजलधेः परेण यदि यातुमनास्त्वमसि । विसृज परिग्रहं भज कृपां त्यज कामकथा–मवितथवाग्भवापहर मा परकीयधनम्" १९४ नर्कुटकमिति जयदेवः । ❀ तत्कोकिलकं छचैः ॥ तदवितथं छचैः सप्तभिः पङ्क्तिश्च यतिश्चेत्कोकिलसंज्ञं । यथा "कलयति कोकिले मधुरपञ्चमगीतिमिमां, मलयसमीरणो भवति पश्यत नाट्यगुरुः । इह हि यदाज्ञया नवनवाद्भुतभङ्गिजुषः किसलयहस्तकान्वितनुते सहकारलता" १९५ इह केचिदष्टभिः पञ्चभिश्च यतिमिच्छन्ति । ❀ गौ चेद्वाणिनी ॥ नजभजजेभ्यः परौ गौ चेद्वाणिनीसंज्ञं । यथा "परभृतकूजितानि जरठेक्षुरसो नवेंदुर्मलयसमीरणो मलयजं मधुसङ्गमश्च । अपि न तथा हरन्ति मिलितानि मनो यथेदं मदभरलल्लभाषितमहो खलु वाणिनीनाम्" १९६ ❀ $\frac{१७}{१४}$ धृत्यां म्रभ्या रौ काञ्ची टैः ॥ मरभयररा । टैरिति एकादशभिर्यतिः यथा "सम्प्राप्तेऽस्मिन् जगच्चक्षुपि रवौ प्रत्यग्गिरेर्गह्वरं, प्रेयः सङ्केतवेश्माभिसरणे धत्से पिधानांशुकम् । मुग्धे ध्वान्तानुरूपं किमु मुधैवौत्सुक्ययोगात्क्कणत्काञ्चीमञ्जीरकोलाहलमिमं शक्ता निषेद्धुं न चेत्" १९७ वाचालकाञ्चीत्यन्ये । ❀ भ्मिभसा मणिमाला ॥ भत्रयं मभसाश्च टैरितिवर्त्तते । यथा "देव तवारिनरेशपुरन्ध्रीवक्राम्बुजशशिनः प्रोल्लसिताधिकविस्मयमुर्वी संवीक्ष्य भुजगताम् । प्राभृतसारकृते निरवद्यामद्याप्यनवरतं मूर्द्धनि धारयते मणिमालां पातालपरिवृढः" १९८ ❀ मत्ता यिः कुसुमितलतावेल्लिता ङ्चैः ॥ मतना यगणत्रयं च ङ्चैरिति पञ्चभिः षड्भिश्च यतिः । यथा "कङ्केल्लिस्कन्धे कुसुमितलतावेल्लिता मन्दमन्दं, क्रीडादोलेयं स्मरविरचिता दाक्षिणात्यानिलेन । अस्यां खेलन्ती रतिरतितरां हन्त गीतिं तनोति, व्याकूजन्मत्तभ्रमररमणीहुंकृतीनां छलेन" १९९ ❀ घछैश्चित्रलेखा ॥ चतुर्भिः सप्तभिश्च यतिश्चेत्सैव चित्रलेखा यथा "पश्योष्णांशोरभ्युदयमधुना सूचयन्ती पुरस्तात्सन्ध्या सेयं चित्रयति गगनाभोगवेश्मान्तराले । शङ्खच्छेदस्वच्छरुचिरुचिरानभ्रभित्तिप्रभागान्वर्णैः पीता ताम्रशितिकपिशैस्तन्वती चित्रलेखाः" २०० ❀ मभ्ना यिश्चंद्रलेखा ॥ मभना यगणत्रयञ्च, घछैरिति वर्तते । यथा "ज्वालं ज्वालं सुभग तव महान् विप्रयोगानलस्तां दाहं दाहं किमिव विरचयेदन्यदस्मात्परेण । लावं लावं विकचकमलिनीश्रूर्णयन्त्यङ्घ्रिघातैर्लेखं लेखं शकलयति तथा सा नखैश्चन्द्रलेखाम्" २०१ ❀ म्भन्जभ्राश्चलम् ॥ मभनजभराः । घछैरिति वर्त्तते यथा "शास्त्राभ्यासे व्यसनमनुपमं परोपकृतौ रतिः सत्पात्रेषु प्रणयपरतया प्रदानमनारतम् । प्रीतिः पादाम्बुरुहि जिनपतेर्भवेदमलात्मनां विद्युल्लेखाजलधरपटलीचलात्मनि जीविते" २०२ ❀ म्भौ न्यौ रौ केसरम् ॥ मभनयररा: घछैरिति वर्त्तते । यथा "सारङ्गाणां न कुलमिह न वा यूथं महादंष्ट्रिणां कर्णातिथ्यं नच भजति कटुर्गन्धद्विपानां ध्वनिः । तत्किं दिक्षु क्षिपसि रभसया नेत्रे त्वमुधत्करो यद्वा ज्ञातं विधुवति पवनस्त्व-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

त्केसरं केसरिन्" २०३ ❀ **नौ मौ यौ चंद्रमाला छघैः** ॥ ननममयया: छघैरिति सप्तभिश्चतुर्भिश्च यतिः यथा "सरसि सरसिजं तद्वाकाशे पार्वणं चन्द्रबिम्बं, कुवलयनयने तावत् साम्यं नाभजत्त्वन्मुखस्य । जनयतु कनकाम्भोजश्रेणीर्लक्षशः स्वर्गसिन्धुर्घटयतु यदि वा सोऽपि स्रष्टा कोटिशश्चन्द्रमालाः" २०४ ❀ **नौ म्तौ भ्रौ ललितम्** ॥ ननमतभराः छघैरितिवर्त्तते यथा "परममुपशमं वर्मीकृत्य स्थितेऽत्र महामुनौ प्रहरणमपरं दध्याः किञ्चिन्निशातमतीव यत् । पशुपतिविजयं स्मारं स्मारं पराक्रमगर्वित कलयसि ललितं पौष्पं शस्त्रं मनोभव किं मुधा" २०५ ❀ **भ्रनिसा भ्रमरपदं झैः** ॥ भरौ नगणत्रयं सश्च झैरिति नवभिर्यतिः यथा "वारिदमुक्तवारिभरपरिशमितघनरजा उद्गतरोहिणीशकरधवलितसकलककुप् । कस्य धृतिं ददाति न हि शरदृतुरजनिरियं चुम्बनलालसभ्रमरपदविदलितकुमुदा" २०६ ❀ **म्सौ ज्सौ त्सौ शार्दूलललितं ठैः** ॥ मसजसतसाः ठैरिति द्वादशभिर्यतिः । यथा "नष्टं त्यक्तमिथःप्रतिक्षणरसैः सारङ्गमिथुनैर्यातं विस्मृतशृङ्गभारविधुरैर्वाध्रीणसकुलैः । लीनं पल्वलपङ्क एव सहसा क्रोडैर्ध्वनिति चेत्, कां चाटु विधित्सयापि हि भवान् शार्दूलललितम्" २०७ ❀ **म्तन्जभ्राः कुरङ्गिका ङछैः** ॥ मतनजभराः ङछैरिति पञ्चभिः सप्तभिश्च यतिः । यथा "अस्या वक्रेन्दौ विजयिनि चिराय लाञ्छनवर्जिते, प्रालेयांशो त्वं स्फुरसि दिवि धृष्टनित्यमचेतनः । साकूतालोका द्रुतनयनकेलिनिर्जितलोचना यारण्ये तस्थावुचितचतुरेह सैव कुरङ्गिका" २०८ ❀ **न्सौ मौ यावनङ्गलेखा चङैः** ॥ नसममयया: चङैरिति पङ्क्तिः पञ्चभिश्च यतिः । यथा "प्रियसखि मधुं मा स्मावज्ञासीर्मानयैनं यथावत् तव हि बकुले क्रीडामित्रेऽस्मिन् पुत्रके चूतवृक्षे । भवनपरिखा पद्मिन्यां सख्यां न्यस्तरोलम्बवर्णावलिकिसलयव्याजादेतेनानिन्यिरेऽनङ्गलेखाः" २०९ ❀ **सौं जौ भ्रावुज्वलं जैः** ॥ रसजजभराः जैरित्यष्टभिर्यतिः । विबुधप्रियेत्यन्ये । यथा "पाणिपादविलोचनाननपद्मकाननशालिनी निम्ननाभिमहाह्रदा त्रिवलीतरङ्गविभूषिता । कुङ्कुमारुणपीवरस्तनचक्रवाकयुगाञ्चिता, केलिसिन्धुरिवोज्ज्वला मदनस्य राजति कामिनी" २१० मालिकोत्तरमालिकावित्यन्ये । ❀ **नौ रीर्निशा डैः** ॥ नद्वयं रचतुष्टयं च डैरिति त्रयोदशभिर्यतिः । यथा "मलयजरसलिप्तरम्याङ्गभाजां सिते वाससी शरदि हृदि च बिभ्रतीनां विशुद्धां नवैकावलीम् । विकचकुमुदकर्णपूराञ्चितानां कुरङ्गीदृशां हिमरुचिकिरणावदाताभिसर्तुं निशा प्रेयसी" २११ तारकेत्यन्ये । ❀ **नौ सौ त्यौ पङ्कजवक्रा घझैः** ॥ ननससतयाः घझैरिति चतुर्भिर्नवभिश्च यतिः । यथा "इह किमु विलसति सर्वऋतुश्रीः किन्तु मृगाक्षी बहुजनजडिमविजृम्भणहेतुः कन्दरदावा । अभिनवमृदुतरपल्लवपाणिः सम्भृततृष्णासमुदितनिबिडपयोधरभारा पङ्कजवक्रा" २१२ ❀ **स्नज्नभ्साः सुरभिस्त्रिङैः** ॥ सनजनभसाः । त्रिङैरिति त्रीन्वारान् पञ्चभिर्यतिः पञ्चभिः पञ्चभिः पञ्चभिश्च यतिरित्यर्थः । यथा "स्फुट-

P. P. Ac. Gunaratnasuriji M.S. Jin Gun Aaradhak Trust

दुज्वलवकुलाकुलमधुपावलिरसितैः पवनाहतलवलीदलपटलैरतिचपलैः । मदने प्रियसुहृदि प्रतिभुवनं कृतविजये सुरभिर्ध्रुवमिह गायति परिनृत्यति मुदितः" २१३ ॐ य्मौ न्सौ त्सौ क्रीडा चचैः ॥ यमनसतसाः चचैरिति पङ्क्तिः पङ्क्तिर्यतिः । यथा "यदि प्राप्तो बन्धं यदि विरहितो विन्ध्याचलभुवा वियुक्तः कान्ताभिर्यदि च तदपि स्तम्बेरमपते । नरेन्द्रस्ते पूजां रचयति सदा किञ्चैष भवता रणक्रीडामैत्रीं घटयति ततो मा गाः शुभमिमाम्" २१४ ॐ न्सौ म्तौ भ्रौ हरिणीपदं चघैः ॥ नसमतभराः चघैरिति पङ्क्तिश्चतुर्भिश्च यतिः यथा "अधिगुणधनुर्दण्डं पश्यन् लुब्धकं गहने वने सरभसमपक्रामत्त्वयंकुश्चिन्तयन्निति ताम्यति । सरसमधुरोद्गारैर्गीतैर्वागुराभिरिव प्रियाऽहह निगडिता दत्ते नैषा साम्प्रतं हरिणीपदम्" २१५ ॐ भीन्या भङ्गिः ॥ भगणचतुष्टयं नयौ च । यथा "मा कुरु सम्पदि सम्मदमापदि विसृज विषादं दीनजनेषु कृपां कुरु संस्मर चिरपुरुषाणाम् । संत्यज पापचरित्रमुदञ्चय सुचरितमालामद्भुतभङ्गिरियं पुरुषोत्तमसरणिरनिन्द्या" २१६ विच्छित्तिरितिकश्चित् । ॐ स्जौ स्जौ त्रौ वुद्बुदम् ॥ सजसजतराः । यथा "असमं दधन्नयपयोगभीरमध्यः सनातनो, विमलो जयत्यविरतं जिनेन्द्रसिद्धान्तवारिधिः । अतिपेशलैर्गमगणैस्तरङ्गिते यत्र सर्वदा, क्षणदृष्टनष्टतनुभिः कुदृष्टिभिर्बुद्बुदायितम्" २१७ ॐ १९/२१ अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं छैः ॥ मसजसततगाः । छैरिति द्वादशभिर्यतिः यथा "क्ष्माभृत्पुङ्गव कोशकन्दरमुखान्निर्गत्य ते सङ्गरक्रीडासून्मदवैरिवारणघटाकुम्भस्थलीः पाटयन् । दंष्ट्रालो नवलग्नमौक्तिकमणिस्तोमैरसृग्लेखया जिह्वालः करवाल एष तनुते शार्दूलविक्रीडितम्" २१८ ॐ म्सौ ज्सौ न्जौ गो वायुवेगा ॥ मसजसनजगाः । छैरितिवर्त्तते । यथा "त्यक्त्वा पुत्रकलत्रबन्धुसुहृदां व्यतिकरमञ्जसा नित्यं संस्मर वीतरागचरणाम्बुरुहयुगं रहः । हंहो चित्त चिरं प्रसीद किमिदं न हि हतजीवितं, जानीषे घनवायुवेगनिहताभ्रपटलगत्वरम्" २१९ ॐ य्मौ न्सौ रौ गो मेघविस्फूर्जिता चचैः ॥ यमनसररगाः चचैरिति पङ्क्तिःपङ्क्तिश्च यतिः । यथा "निरुन्धानस्तापं जगति कलयंश्चण्ड कोदण्डदण्डं पदं व्यातन्वानः सततमखिलक्ष्माभृतां चोपरिष्टात् । निकामं दुर्द्धर्षां दिशि दिशि समुल्लासयन्वाहिनीश्च त्वमुच्चैश्चौलुक्येश्वर घटयसे मेघविस्फूर्जितानि" २२० रम्भेति स्वयम्भूः । ॐ य्मौ न्सौ जौ गो मकरन्दिका ॥ यमनसजजगाः चचैरिति वर्त्तते । यथा "इमां बालां त्रासाकुलमृगवधूविलोलविलोचनां किमु त्वं निःशङ्को व्यथयसि मुहुर्वियातविचेष्टितैः । परिक्षोदं चण्डैर्मुसलपरिघैः सहेत न मालती मृदु भ्राम्यद्भृङ्गीपदपरिचयाद्गलन्मकरन्दिका" २२१ ॐ य्मौ न्सौ तौ गश्छाया ॥ यमनसततगाः चचैरिति वर्त्तते । यथा "फलं कालाक्रान्तं कुसुममरसं पत्रं न भोगास्पदं बहिस्तत्कार्कश्ये किमपि सहजं निःसारमन्तर्वपुः । विवृद्धिं गृध्राणां धिगुपकरणं शाखाप्रपञ्चो न ते किमन्यत्ताल स्याद्विरलविरलाच्छायापि नो शीतला" २२२ ॐ त्रिज्सौ गो रतिलीला ॥

P. P. Ac. Gunratnasuriji M.S.

Jin Gun Aradhak Trust

त्रीन्वारान् जगणसगणौ गुरुश्च जसजसजसगाः घचैरित्यनुवर्त्तते । यथा "दुनोति बत तां कराम्बुजतले निवेशितकपोलां किमप्यहरहस्तथा कथमपि त्वदीयविरहाग्निः । यथा वरतनुर्न पङ्कजदलैर्न मौक्तिककलापैर्न चन्दनरसैर्न चन्द्रकिरणैः करोति रतिलीलाम्" २२३ ॥ म्तौ न्सौ रौ गः पुष्पदाम ङ्छैः ॥ मतनसररगाः । ङ्छैरिति पञ्चभिः सप्तभिश्च यतिः यथा "सेयं साकाङ्क्षा त्वयि मृगनयना सङ्गताङ्गी विलासैर्ली-लालोलभ्रूर्दिवि कमलवनं कुर्वती नेत्रपातैः । हंहो पश्यैतद्विरहविधुरया ते यया सावहित्थं प्रक्षिप्तं कण्ठे विकसितबकुलासूत्रितं पुष्पदाम" २२४ ॥म्तौ न्सौ तौ गो वञ्चितम्॥ मतनसततगाः । ङ्छैरिति वर्त्तते । यथा "कैश्चिच्चार्वाकैरविदितसुकृतैः शूकाविमुक्तात्मभिः कौलीभूया-न्यैर्विहित पशुगणाघातैः पदैर्यज्वभिः । जैने धर्मेऽस्मिन्सति सततकृपापीयूषपात्रेऽप्यहो स्वच्छन्दं धूर्त्तैरहह कुटिलया बुद्ध्या जगद्वञ्चितम्" २२५ विचितमित्यन्यः । ॥ य्मौ नौ रौ गो मुग्धकं चछैः ॥ यमननररगाः चछैरिति पङ्क्तिः सप्तभिश्च यतिः। यथा "परिभ्राम्यद्भृङ्गं श्वसि-तपरिमलैर्जपापाटलौष्ठं गिरा लीलालापप्रणयमधुरया सदानन्ददायि । स्फुरत्यन्तश्चित्ते लिखितमिव सखे ममाद्यापि तस्याः प्ररूढप्रेमायाश्च-कितमृगदृशो मुखं मुग्धकं तत्" २२६ ॥ रः सौ तो जौ ग ऊर्जितं ञैः ॥ रससतजजगाः । ञैरिति दशभिर्यतिः । यथा "नेक्षसे किमहो जलरिक्तां स्वामपि तावदिमां तनूं नो निषेधसि चण्डमरीचेर्दुःसहमातपजृम्भितम् । शारदे समयेऽपि तदस्मिन्पूरितपर्वतकन्द-राण्यूर्जितस्तनितानि दधानस्तोयद किं न हि लज्जसे" २२७ ॥ नभ्रसा जौ गस्तरलम् ॥ नभरसजजगाः । यथा "श्रय विशुद्धधिया जिनेश्वरपादपङ्कजभृङ्गतां प्रकटय प्रशमं भजस्व गुरूनधीष्व सदागमम् । विरचयार्थिजनं कृतार्थमिमं कुरुष्व तपः परं तरलमायुरिदं गृहाण तदीयमेतदहो फलम्" २२८ ॥ म्रौ भः सौ ज्गौ माधवीलता छैः ॥ मरभससजगाः छैरिति सप्तभिर्यतिः । यथा "निःसामान्यं तवैत-त्किमपि विराजति दक्षिणानिल, प्रावीण्यं यत्प्रगल्भामिह सहकारलतामनुव्रजन् । अश्रान्तं साभिलापः स्पृशसि समुन्नयसे विधूनयस्यालि-ङ्गस्याशु चुम्बस्यभिनवकोमलमाधवीलताम्" २२९ ॥ सूगौ तरुणीवदनेन्दुः ॥ सगणाः षट् गुरुश्च । यथा "मृगनाभिविनिर्मितः पत्र-लतावलिलाञ्छनधारी जननेत्रचकोरमहोत्सवकृत्कमलद्युतिहारी । जगतां विजयाय निबद्धमतौ झषलक्ष्मणि साद्या जयति प्रतिपन्नस-हायपदस्तरुणीवदनेन्दुः" २३० १९/१३ ॥ कृतौ म्रौ भ्नौ य्भौ ल्गौ सुवदना छछैः ॥ मरभनयभलगाः छछैरिति सप्तभिः सप्तभिर्यतिः । यथा "आकल्पं कल्पयित्वाभिनवमृगमदैरामुच्य वशिति क्षौमे कृत्वा विभूषां मरकतमणिभिर्गन्तुं प्रियगृहम् । औत्सुक्याद्यावदस्थात् पथि मुखशशिना तावद्धत तमी ज्योत्स्नी जातेति मूर्छामभजत सहसा कष्टं सुवदना" २३१ ॥ दशग्ला वृत्तम् ॥ गुरुलघू दशवारानावृत्तौ वृत्तं नाम वृत्तम् । यथा "प्राणिताखिलार्थिदानमूर्जितारिजिष्णुपौरुषं महर्षिचित्रकृत् जितेन्द्रियत्वमेवमद्भुतान् गुणान्दधन्नरेन्द्र । रामपार्थधुन्धुमार-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

मुख्यपूर्वभूमिपालवृत्तमत्र सत्यतां चिराय नीतवानसि त्वमुच्चकैश्चुलुक्यचन्द्र" २३२॥ स्भा नौं म्यौ लगौ मत्तेभविक्रीडितं डैः॥ सभरनमयलगाः। डैरिति त्रयोदशभिर्यतिः। यथा "उदयाद्रेः प्रसरन्नयं दिनपतिः प्रत्यग्रसन्ध्यातपस्फुटसिन्दूररुचिर्विसूत्रिततमःसन्दोहवल्लीवनः। तनुते वाजिजवोल्लसत्कशपुरःक्रामत्सुपर्णाग्रजप्रतिकारोपरि वलादायतकरो मत्तेभविक्रीडितम्" २३३ ॥ नो भौ मः सौ लगौ मुद्रा टैः॥ नभभमससलगाः। टैरिति एकादशभिर्यतिः। यथा "अयमरण्यमहीष्वपि चूतास्वादकषायितकोकिलाकलकलच्छलतश्श्रिरमाज्ञामस्खलितामिह वर्त्तयन्। कुपितमानवतीकलहानामन्तकरः पुरतः सखे मकरकेतुमहीपतिमुद्र(मुद्रा)यापरं तनुते मधुः" २३४ उज्वलमित्यन्ये। ॥ य्मौ नौ तौ गौ शोभा चछैः॥ यमननततगगाः। चछैरिति पड्भिः सप्तभिश्च यतिः। यथा "गता लाक्षारागद्युतिरधरदलात्पत्रवल्ली विलुप्ता कपोले पर्यस्तं तिलकमलिकतो लम्बितः केशपाशः। च्युतः कर्णोत्तंसः करमणिवलयं स्रस्तमस्यास्तथापि प्रियेण प्रत्यग्रः प्रथयति महतीं संगमो हंत शोभाम्" २३५ ॥ म्रौ भ्नौ तौ गौ चित्रमाला छचैः॥ मरभनततगगाः। छचैरिति सप्तभिः पड्भिश्च यतिः। यथा "सा काङ्क्षत्यन्यमेवायमपि बत तां सारसौन्दर्यलक्ष्मीरेषा चैतं वराकी तरुणनिवहोऽमूं च लावण्यपुण्याम्। एवं प्रत्यग्रकेलीकुशलललितैर्बद्धहासं वसन्ते देवः पुष्पायुधोऽसौ रमयति रतिं दर्शयंश्चित्रमालाम्" २३६ सुप्रभेत्यन्यः ॥ म्नौ स्नौ म्यौ लगौ सद्रत्नमाला ङजैः॥ मनसनमयलगाः। ङजैरिति पञ्चभिरष्टभिश्च यतिः। यथा "सन्ध्यान्ते प्रतिदिशमियं समुदिता tाराततिः शोभते श्यामाया अभिसरणकेलिरभसाकृष्टेव मुक्तावलिः। यद्वा व्योमनि मनसिजेन लिखिता जैत्रप्रशस्तिर्निजा विस्फूर्जद्घनतमतमिश्रफणिनां सद्रत्नमालाथवा" २३७ ॥ भीरसल्गा नन्दकम्॥ भगणचतुष्टयं रसलगाश्च। यथा "अद्भुतसङ्गरसागरमन्थनसम्भवां कलयन् श्रियं, दोष्णि दधद्वसुधावलयं च कुमारपालमहीपते। त्वं बलिराजनियन्त्रणविश्रुतविक्रमः पुरुषोत्तमः केवलमेष जगद्विजयी त्वदसिर्द्विषां ननु नन्दकः" २३८ ॥ भ्रौ न्भौ भ्रौ लगौ कामलता॥ भरनभभरलगाः यथा "कौतुकमात्रमेव भवतो यदि शस्त्रपरिग्रहे तदा चापशिलीमुखान् घटयितुं कुरु चूतदलावमोटनम्। कस्य मनः करोति न हि वश्यमसौ पुरतो यतः स्फुरन् कामलतावलीतरलनो मलयानिल एष ते सखा" २३९ उत्पलमालिकेत्यन्ये। ॥ भ्नौ य्नौ न्रौ लगौ दीपिकाशिखा गचैः॥ भनयननरलगाः। गचैरिति त्रिभिः पड्भिश्च यतिः। यथा "प्राक्तने सुकृतसमूहे बलवदिह समुल्लसत्यपि दुर्नयकरणमनीषा श्रियमपहरति क्षणान्नृणाम्। पश्यत यदनुपभुक्तेऽपि हि विनिहिततैलपूरणे निर्भरवलितसमीरो दलयति खलु दीपिकाशिखाम्" २४० ॥ त्भौ ज्भौ ज्भौ लगौ शशाङ्करचितम्॥ तभजभजभलगाः यथा "त्वं निर्जितोऽसि निरवद्यया वरतनोर्मुखाम्बुजरुचा विस्तीर्णनेत्रललितैः कुरङ्गहतकोऽयमप्यवजितः। युक्तं

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

शशाङ्करचितं त्वया यदमुना सहैक्यमधुना सङ्गः समानगुणयोगिभिर्भवति देहिनां समुचितः" २४१ ❀ २०/२१ ❀ प्रकृतौ म्रौ भ्रौ यिः स्रग्धरा छछैः ॥ मरभना यगणत्रयं च । छछैरिति सप्तभिःसप्तभिर्यतिः यथा ॥"आवासः पर्णशाला वपुषि च वसनं नूतना त्वक्तरूणां पाणावाषाढयष्टिः शिरसि च चिकुरैर्नैव्यगुम्फो जटानाम् । कर्णेऽक्षस्रग्धरायाः परिवृढविपिने त्वद्भयात्सम्प्रतीत्थं वृत्तिर्द्विट्त्रैरहोभिस्त्वदरिनृपजनैः शिक्षिता तापसानाम्" २४२ ❀ त्रौ भ्रौ ज्भौ रः कथागतिः ॥ तरभनजभराः छछैरिति वर्त्तते । यथा "केष्वप्यखर्वगर्वाद्विधुरितभुवनेष्वनगलगार्जितैरम्भोधरेष्विवाशु श्रवणपथगतेष्वभूद्विनिमीलितम् । आखण्डलस्य कामप्यभजत नयनासितोत्पलकाननं प्रीतिं चुलुक्यचन्द्र प्रक्तनृपकथागते त्वयि तु क्षणात्" २४३ ❀ भ्रौ म्रौ म्रौ रो ललितविक्रमो ञैः ॥ भरनरनरराः । ञैरिति दशभिर्यतिः । यथा "सद्गुणरत्नरोहणगिरे यशोधवलिताखिलाशामुखद्वेषिवधूमुखाम्बुजविधो वयं किमिव वर्णयामस्तव । यस्य वशंवदंत्रिभुवनश्रिरं विबुधसुन्दरीमण्डलैर्जम्भरिपोश्रमत्कृतिरसं दधल्ललितविक्रमो गीयते" २४४ मौ तनिसा मत्तक्रीडा जडैः ॥ मद्वयं तगणो नत्रयं सश्च । जडैरिति अष्टभिः पञ्चभिश्च यतिः यथा "नो जानीते कृत्याकृत्यं विलुठति च धरणितलशयने भूयो भूयो मूर्छां धत्ते दृढयति न शिथिलमपि वसनम् । अर्थापेतं निःसम्बन्धं वचनमपि वदति नदतितरां मत्तक्रीडामाप्ता बाला सुभग तव नवविरहविधुरा" २४५ ❀ र्जतनिसाश्चन्दनप्रकृतिः ॥ रजता नत्रयं सश्च । यथा "दर्शनाद्यदीह सन्तापमपहरति तदपि यत तया नार्जितं धनं प्रभूतं जरसि सुखदमतिसरलतया । किन्तु चन्दनप्रकृत्या सखि सततमपि फलरहितया दुर्भुजङ्गघृष्टया यौवनमिदमफलमहह गमितम्" २४६ ❀ न्जभजिराः सिद्धिः ॥ नजभा जगणत्रयं रश्च । यथा "सततनमत्पुरन्दरशिरःशुचिरत्नकिरीटमालिकाविमलमयूखशेखरितपादनखद्युतिजालशालिनम् । विपुलदयानिधिं प्रणयिकल्पतरुं भजत जिनेश्वरं यदि भवकातरस्त्वमिह वाञ्छसि सिद्धिमनुत्तमां सखे" २४७ चित्रलता रुचिरा शशिवदना चेत्यन्ये । ❀ नजीभ्रा वनमञ्जरी ॥ नगणो जगणचतुष्टयं भरौ च । यथा "सह धनुषा समदो मदनः किल शीतदीधितिमौलिना सुहृदिह भस्मकृतस्तव दीप्तहुताशपिङ्गलया दृशा । इति हि मधो कुमते स्मर मा विचरान्तिके तरलभ्रुवां विरहजुषां सकलज्वलिताङ्गभृतां दधद्वनमञ्जरिः" २४८ ❀ त्रीनौ रस्तरङ्गः ॥ रनरनरनराः यथा "निर्ममो भव विधेहि पञ्चपरमेष्ठिसंस्मरणमन्वहं संयमं कुरु भज क्षमां यदि समीहसे सुखमनश्वरम् । यौवनं किल तडिल्लताचपलमभ्रचञ्चलमिदं धनं जीवितव्यमपि मारुताहतसरित्तरङ्गतरलं सखे"२४९ ❀ २१/८ आकृतौ भ्रौ त्रौ त्रौ न्गौ मद्रकं ञैः ॥ भरनरनरनगाः । ञैरिति दशभिर्यतिः । यथा "देव जगत्रयैकतिलक प्रभो प्रणयिलोककल्पविटपिन् पुण्यवतां शिरोमणिपदं व्यभाजि जिननाथ तैरिह जनैः । ये विकचैश्चिराय चरणारविन्दयुगमर्चयन्ति कुसुमैर्मद्रकमन्द्रगीति-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

भिरभिष्टुवन्ति च चरित्रमत्रभवतः २५० ॐ स्तौ स्नौ स्नौ गौं महास्रग्धरा जछैः ॥ सतत नसररगाः । जछैरिति अष्टभिः सप्तभिश्च यतिः । यथा "अभिनागान्याति योऽयं सम मम (मम ममच) पुनर्यच्छिरो हुंकरोति प्रचलोऽयं यत्कबन्धः प्रहरति स तु मे प्राणनाथोऽस्तु सख्यः । दलयन्यो दुष्टभूपानहमहमिकया स्वर्गसीमन्तिनीनां परिशुश्रावेति वाचो वरवरणमहास्रग्धराणां रणेषु" २५१ॐ भृगौ मदिरा ॥ भृगाविति भगणसप्तकं गुरुश्च । यथा "ह्रीविनियन्त्रणविभ्रमपाकुरुतेऽभिनवावतरद्वयसां प्रौढपुरन्ध्रिजनस्य तथा तिरयत्यपराधपदं सहसा। कोपपदेन च गोत्रपरिस्खलितं न च कारयते तदसौ कामसखी मदिरेह सतर्पमभाजि चिरं किल कामिजनैः" २५२ लताकुसुममित्यन्ये । ॐ मत्यनीगा वरतनुः ॥ मतया नगणचतुष्टयं गुरुश्च । यथा "चक्षुःसौन्दर्यं मृगवध्वां परभृतयुवतिषु मधुरगिरं, यातं हसीषु स्मितमुद्धनवविचकिलकुसुमजतिषु । रोलम्बश्रेण्यां कचलक्ष्मीं वदनरुचिमपि विकचकमले न्यासं कृत्वा सा खलु याता क्वचिदपि मम वरतनुरधुना" २५३ म्सौ ज्सौ ज्सौ जगौ दीपार्चिः ठैः ॥ मसजसजसजगाः । ठैरिति द्वादशभिर्यतिः । यथा "प्रायो दुष्कृतकर्मसु स्वयममी प्रयान्ति पिशुनाः सहायतां यद्वत्तद्वद्वद निन्दनीय सुकृतक्रियासु भृशमन्तरायताम् । वह्नौ सन्ततजन्तुसङ्कुलमहावनञ्चुपि सखा समीरणो दीपार्चिष्यखिलोपकारिणि भवत्यकाण्डकुपितान्तकः खलु" २५४ ॐ विकृतौ न्जौ भ्जौ भ्जौ भ्लौ गश्च ललितण्टैः ॥ नजभजभजभलगाः टैरित्येकादशभिर्यतिः । यथा "निरयमहान्धकूपमसमान्धकारभरदुर्विलोकमतुलं, निपतितगाढमोहपटलान्धजन्तुविविधप्रलापतुमुलम् । प्रवचनचक्षुपेक्षत इमं चिराय तनुभृत्तथापि बलवच्चपलतरेन्द्रियाश्च ललितैर्विकृष्ट इह तत्क्षणान्निपतति" २५५ अत्र केचित्सप्तमभगणस्थाने जगणमिच्छन्ति । ॐ मौ तो नीलगा मत्ताक्रीडा जडैः ॥ ममता नगणचतुष्टयं लघुगुरू च । जडैरित्यष्टाभिः पञ्चभिश्च यतिः । यथा "हस्ताक्षेपैर्वारं वारं विदलयति किल निकरमवनिरुहां पादानुच्चैः क्षोणीन्द्राणां विघटयति दशनकुलिशविकपणैः । वेगावेगात्पादन्यासैर्नमयति च फणिपटलमुरगपतेरित्थं मत्ता क्रीडामात्रं विरचयति नृपवर तव करिघटा" २५६ ॐ ता ज्जूल्गाः शङ्खः ॥ तगणात्परं जगणपञ्चकं लघुगुरू च । यथा "चौलुक्यनरेश्वर वैभववासव धीर गभीरिमवारिनिधे सौन्दर्यमनोभवकान्तिनिशाकर सेवककल्पतरो भवतः । को नाम गुणानिह सङ्कलयेत्किल वच्मि तु किञ्चन ते यशसां सम्पर्कमवाप्य स शङ्खधरोऽभवदद्रिसुताकमितुः सदृशः" २५७ ॐ नाद्रू हंसगतिः ॥ नगणात्परं जगणपञ्चकं लघुगुरू च । यथा "मदनगजेन्द्रमदोदयमादधती सहसा विमलप्रसरल्लवणिमसिन्धुरनिद्रितनीलसरोरुहचारुलसन्नयना । विशदतराम्बरसम्पदियं रजनीकरबिम्बमुखं दधती शरदिव संश्रित हंसगतिर्युवतिर्विदधाति न कस्य मुदम्" २५८ महातरुणीदयितमित्यन्ये । ॐ त्रीनौं लर्गाश्चित्रकम् ॥ रनरनरनरलगाः यथा "श्रूयतां

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

नृप कुमारपाल तव दर्शनत्वरितया व्यधायि यत् पादतामरसयोः सुवर्णकटके कराम्बुरुहयोश्च नूपुरे। हारदाम च नितम्बबिम्बफलके भृशं हृदि च रत्नमेखला निर्ममे जतुरसोलिकेऽधरदले च चित्रकमधीरचक्षुषा" २५९ ॐ भ्मौ स्भौ निग्लाश्चपलगतिः ॥ भमसभा नत्रयं लघुगुरू च। यथा "भूमिभृतामङ्केषु विलासं स्वरुचिसदृशमतिहि विदधती सत्त्वरमानीता स्फुटमुच्चैः पटह इव नदति यशसि निजे। दुर्ललिता स्तम्बेरमकान्तेव नृपवर दृढतरगुणैः साधुभुजस्तम्भे भवता श्रीरति चपलगतिरिह निगडिता" २६० ॐ ज्सौ ज्सौ यिल्गा वृन्दारकम् ॥ जसजसा यत्रयं लघुगुरू च यथा "तदङ्घ्रिपरिताडनं सरभसं कचाकर्षणं स्वेच्छया चोर्जितं मुखाम्बुरुहचुम्बनं प्रति मुहुर्नखैर्दारुणं निर्विशङ्कं जवात्। नरेन्द्रतिलक त्वदीयपरिपन्थिनां तुल्यकालं तदेव कृतं शिवाभिरिह सङ्गरे गगनसीम्नि च वृन्दारकप्रेयसीभिस्तथा" २६१ ॐ २३ सङ्कतौ भ्तौ न्सौ भौ न्यौ तन्वी ठैः ॥ भतनसभभनयाः। ठैरिति द्वादशभिर्यतिः। यथा "दन्तमयूखाः शशधररुचयो वागमृतं रतिरमणधनुर्भ्रूलोचनलक्ष्मीस्तुलयति कमलं नूतनविद्रुमसुहृदधरश्च। चम्पकगर्भप्रतिकृति च वपुर्हंसगतेरनुहरति व यातं वच्मि विशेषं कमपरमथवा रम्यमहा किमिव हि न हि तन्व्याः" २६२ ॐ नौ भ्नौ ज्रौ न्यौ ललितलता छछैः ॥ ननभनजननयाः छछैरिति सप्तभिः सप्तभिर्यतिः। यथा "परिमलविलुठन्मधुकरकबरीविरचितनिरवधिशोभामभिनयकुसुमस्मितसुभगरुचिं मृदुतरकिसलयपाणिम्। इह मधुसमये विलसति नियतं मनसिजशरपरिविद्धस्तनुललितलतायुवतिमयमहो कलयति मलयसमीरः" २६३ ॐ नौ रूमेंघमाला ॥ नगणद्वयं रगणषट्कं च। यथा "त्रिभुवनविजयाय बद्धाभिमानस्य शृङ्गारयोनेः प्रयाणक्षणे, कनकघटितदण्डमेतत्किमाभाति नीलातपत्रं लसत्सर्वतः। नवतपविगमश्रियादीप्रदीपेऽथ किं कज्जलार्थं धृतं कर्परं भ्रममिति विदधाति वीक्ष्योन्नतां मेघमालां जनो विद्युतालङ्कृताम्" २६४ भृङ्गाञ्जनीलालकेत्येके। ॐ भृ सुभद्रं ॥ भृरिति भगणाष्टकं। यथा "शौर्यमृगेन्द्र चुलुक्यनरेन्द्र महत्त्व गिरीन्द्र गभीरिमसागर दोष्णि चिरं निखिलाचलसिन्धुयुतं वसुधावलयं तव बिभ्रति। अद्भुतभारपरिश्रममुक्तिसमुच्छ्वसितो भुजगाधिपतिस्त्वयि शंसति सन्ततमेष सुभद्रमखण्डमहोदयमस्त्विति सम्प्रति" २६५ ॐ भितनिसा द्रुतलघुपदगतिः ॥ भत्रयं तगणो नत्रयं सश्च। यथा "मुञ्चत नूपुरकङ्कणकाञ्चीः क्वणितभरविरचितकलकलाः स्वीकुरुताशु गतिं समयोऽयं न खलु समदगजललितगतेः। सम्भ्रमवान् स्ववधूरनुशासद्गिरिसरिदभिमुखमतिकृपणान् सम्प्रति सिद्धपते तव याति द्रुतलघुपदगति रिपुनिवहः" २६६ ॐ न्यौ भ्तौ निसौ सम्भ्रान्ता ॥ नयभता नगणत्रयं सश्च। यथा "रचयतु जन्मस्नानविधौ वस्त्रिजगदधिपचरमजिनपतेः सुरपतितुङ्गोत्सङ्गनिषण्णस्य किमपि बलविलसितमतुलम्। मृदुचरणाङ्गुष्ठाग्रसमाक्रान्तिविधुरचलितकनकशिखरिस्फुटभयसम्भ्रान्तामरयक्षोरगपति निखिलदुरित-

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aradhak Trust

दलनम्'' २६७ ॐ स्सौ ज्सौ तौ भ्रौ विभ्रमगतिः ॥ मसजसततभराः । यथा ''दृष्ट्वा त्वत्पृथनातुरङ्गमखुरोद्धूतं धरित्रीरजो गगनाङ्गणे तत्तद्भूतिमतीं विहाय सपदि स्वां राजधानीमपि प्रियजीविताः । गच्छन्तोऽनु गिरिम्पलायनविधिप्रत्यूहहेतुं मुहुः सहचारिणां दाराणां कलहंसविभ्रमगतिं निन्दन्ति चौलुक्यचन्द्र तवारयः'' २६८ ॐ २४/७ अभिकृतौ भ्मस्भनीगाः क्रौञ्चपदा ङ्ङ्जैः ॥ भमसभा नगणचतुष्टयं गुरुश्च । ङ्ङ्जैरिति पञ्चभिः पञ्चभिरष्टभिश्च यतिः । यथा ''प्रोऽझ्य पुराणि त्वद्भययोगान्नृपवर भवदरिरतिशयविधुरो दूरमरण्यं प्राप्य कलत्रैः सह समजनि गतिरयवशतृपितः । सारसनादात्स स्वयमादौ प्रसरति कियदपि भुवमथ सहसा प्रेक्ष्य चकोरक्रौञ्चपदाङ्कां भुवमिह सरिदिति निगदति दयिताः'' २६९ ॐ नीसभिगा हंसलयो जछैः ॥ नगणचतुष्टयं सगणो भगणत्रयं गुरुश्च । जछैरिति अष्टभिः सप्तभिश्च यतिः । यथा ''भवशतचितनिरवधिसुकृतैस्त्वत्कृतधर्मपयोधिगतः प्रणयिनि मयि कुरु तदसमकरुणां पश्य सुधारसपूर्णदृशा । अभिमततरमिति वितर जिनपते शक्रफणीन्द्रनरेन्द्रनुत प्रतिदिनमपि तव पदकमलयुगे देव भवेयमहं सलयः'' २७०ॐ त्यौ भौ नीगौ हंसपदा ञैः ॥ तयभभा नगणचतुष्टयं गुरुश्च । ञैरिति दशभिर्यतिः । यथा ''अम्भोजवनं व्याकोशमिदं सलिलमतिविमलमिति वनसरसि भ्रान्तोपि हि मा कार्षीर्गमनं यदिह विचरति हरिणशिशुनयना । तस्या अतिरम्यां वीक्ष्य गतिं निरुपमितिमतिशयमधिगतवर्तीं ह्रीतः सपदि त्वं हंसपदात्पदमपि चलसि न खलु नियतमदः'' २७१ ॐ न्जज्या नीगौ चपलम् ॥ नजजया नगणचतुष्टयं गुरुश्च । यथा ''क्वचिदपि चूतलतामुपभुङ्क्ते क्वचिदपि पिबति विचकिललतां क्वचिदपि चुम्बति माधविकां च क्वचिदपि परिसरति च लवलीम् । बहुविधपुष्पसमृद्धिनिधाने विलसति नवतरमधुसमये चपलभुजङ्गविलासमजस्रं कलयति मधुकर इह मुदितः'' २७२ २५/४ उत्कृतौ मौ तो निरसलगा भुजङ्गविजृम्भितं जटैः ॥ ममता नगणत्रयं रसलगाः । जटैरिति अष्टाभिरेकादशभिश्च यतिः । यथा ''क्वापि स्वैरं क्रूरक्रीडन्महिपशश्रमचकितवरकुरङ्गकुलं क्वचित्क्वापि क्रीडाव्यग्रक्रोडं क्वचिदपि मदजडविहरन्मतङ्गजसङ्कुलम् । सिंहक्ष्वेडारौद्रं क्वापि क्वचिदपि विपविषममहाभुजङ्गविजम्भितं श्रीचौलुक्यक्षोणीनाथ स्फुटमजनि भवदरिमहीभुजामधुना पुरम्'' २७३ ॐ मनूसगगा अपवाहो झन्नचैः ॥ मो नगणषट्कं सगगाश्च । झचचरिति नवभिः षड्भिः षड्भिश्च यतिः । यथा ''यः श्लाघ्यः प्रतिदिनमपि मदनदहन गरुडगमन चतुरास्याद्यैर्गेयो यः सुरपतिपरिपदि च किमपि मुदितविबुधरमणीवृन्दैः । चौलुक्यान्वयजलनिधिहिमकर कियदिह तव नृपवर तस्यैतद्यत्सर्वं कृतमखिलमपरथमपभटमपगजमपवाहं च'' २७४ ॐ भो नौ स्नो निल्गा आपीडो ढैः ॥ भननसमा नगणत्रयं लघुगुरू च । ढैरिति चतुर्दशभिर्यतिः । यथा ''पश्य विविधवरविटपिनिकुञ्जश्यामीकृतविपुलतरकटकभूराश्रमशतलसद्भिहरिमैत्री-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

प्रेक्षारसवदमरयुवतिजनः । रैवतकगिरिरियमिह पुरस्ताद्यस्मिन् जिनचरणनमनमिलिताशेषसुरपतिपतदमलपुष्पापीडैर्भवति सुरभिरयमनिलः" २७५ ❀न्जौ न्सौ भनिलगा वेगवती ॥ नजनसभा नगणत्रयं लघुगुरू च । यथा "नभसि भृशं स्तनति भरितदिक्कन्दरमभिनवजलधरपटले धृतमुदि नृत्यति मधुरकेकाकलकलजुपि समदशिखिकुले । स्फुटितकदम्बकुटजसुमनःसर्जपरिमलमिलदलिनि च वने मनसिशये च भुवनजयसंवेगवति बत भवसि पथिक कथम्" २७६ ❀ नजभजिभ्जलगाः सुधाकलशो ढैः ॥ नजभा जत्रयभजलगाः । ढैरिति चतुर्दशभिर्यतिः । यथा "अयमनुनीय सर्वसुरकार्यकृते मम वल्लभेन दिविपत्पतिना ननु विनियोजितः कवलितश्च ततस्त्रिपुरान्तकृन्नयनहव्यभुजा । इति हृदये विचिन्त्य परिजीवितुं मकरध्वजं सपदि पूर्वदिशा नियतमुदासि सम्प्रति सुधाकलशः परिपूर्णशीतरुचिबिम्बमिपात्" २७७ ❀ २६/५ उक्तादिजातिप्रकरणम् । ❀ शेषजातौ मतिनायि मालाचित्रं टैः ॥ मस्तगणत्रयं नगणद्वयं यगणत्रयं च एषां समाहारद्वन्द्वः । टैरिति एकादशभिर्यतिः । यथा "पान्थाः शीघ्रं यात नातः परं वः क्षणमपि यदिह शुभं तत्र गत्वा श्रयध्वं कान्तां नो चेदत्र तां देवतां स्वां स्मरत सपदि भवतो हन्त संहर्तुकामः । कालोऽयं जीमूतनामाभ्युपैति स्तनितबधिरितमहीमण्डलश्चण्डविद्युन्मालाचित्रास्त्रप्रहारीति दूरात्कथयति शिखिनिवहस्तारकेकारवेण" २७८ २७/१ ❀ म्तौ यतौ निर्सलगाः प्रमोदमहोदयो घछैटैः ॥ मतयता नगणत्रयं रसलगाश्च । घछैटैरिति चतुर्भिः सप्तभिरेकादशभिश्च यतिः । यथा "काप्युद्ग्रीवा प्रास्थितबद्धोत्कण्ठं करकलितशिथिलवसना दधाव च काचन स्तम्भं दध्रे कापि च काचिच्चासीदति शयितबहलपुलकाङ्कुरोल्लसिताङ्गिका । काचिच्चक्रे भूषणमङ्गे काचित्तिलकमकृत नवमलिके चुलुक्यमहीपतौ यात्रां कृत्वोपेयुषि पौरस्त्रीणां समजनि निरवधिरधुना प्रमोदमहोदयः" २७९ ॥ यथा वा ॥ "वन्द्या देवी पर्वतपुत्री नित्यं मधुमधुरकमलवदना पुरन्ध्र्यपि देवता देवैः स्तुत्या किन्नरगेया भक्त्या वरचरितमहिषमथनी जगत्त्रयनायिका । सिद्धैर्ध्येया केसरियाना कामं रणचतुररसिकहृदया त्रिलोचनवल्लभा वीरैः पूज्या दर्पणपाणिर्नूनं गुणनिलयलटभललिता सतीषु धुरन्धरा" २८० ❀ २९/१ द्विर्भजसना भ्यौ नृत्तललितम् ॥ द्वौ वारौ भजसन इत्येते गणाः । भयौ च केवलौ । भजसनभजसनभया इति । यथा "अद्य कलहंसललने ललितमन्थरगतौ सपदि मानय सपत्नरहितं स्वं कोकिलविलासिनि विधेहि कलगीतिरचनाचतुरतामदममन्दमतिमत्ता । दुर्ललितनृत्तललितं युवमयूर रचय त्वमपि सम्प्रति चिराय गतशङ्कः सर्वगुणकेलिसदनं चकितबालमृगलोलनयनां प्रियतमामिह विना ताम्" २८१ ❀ ३०/१ द्वादशना ल्गौ ललितलता त्रिर्जैः ॥ द्वादशनगणा लघुगुरू च । त्रिर्जैरिति त्रीन्वारान् दशभिर्यतिः । यथा "जिनचरणसरसिरुहपरिचरणरतमनसि परमशममुपदधति कलितपरमलये विषयबलदलनजुषि बत तरुणिविफलमतिचतुरतरनयनगतिमिह



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

यतिनि तनुपे। व्रज भदन निजसदनमपसरणमुपरचय पिकतरुणरणरणकमुपजनयसि न हि प्रकटयसि मधुसमय किमिति तव मदमुदितमधुपकुलकलरणितमुखरललितलताम्" २८२ ॐ ३८/१ मातनीजभ्राः पिपीलिका जणैः ॥ मद्वयं तगणो नगणचतुष्टयं जभराः। जणैरिति अष्टभिः पञ्चदशभिश्च यतिः। यथा "निष्प्रत्यूहं पुण्यां लक्ष्मीमविरतमभिलपसि यदि रमयितुं सुखं च यदीच्छसि स्थातुं न्यायोन्मीलद्बुद्धे लघुभिरपि सह बहुभिरिह कुरु मा विरोधपदं तदा। विस्फूर्जत्पूत्कारं क्रीडाकवलितसकलमृगकुलमजगरं भुजङ्गमुन्मदं सङ्घातं कृत्वा पश्यैता ग्लपितवपुपमनवधिरचितरुजा अदन्ति पिपीलिकाः" २८३ ३०/१ ॐ एषैव नीपरतःपञ्चदशपञ्चदशलवृद्धा क्रमेण करभ ॥ ३५ ॥ पणव ॥ ४० ॥ मालाः ॥ ४२ ॥ एषैव पिपीलिका। चतुर्भ्यो नगणेभ्यः परतः पञ्चभिर्दशभिः पञ्चदशभिश्च लघुभिर्वृद्धाः शेषगणेपु तथैव स्थितेपु क्रमेण करभादयो भवन्ति। तेऽत्र पञ्चभिर्वृद्धा पिपीलिकाकरभः। यथा "नित्यं लक्ष्मच्छायाछन्नः कलयतु कथमिव तव वदनरुचिममृतरुचिश्चिरं क्षयसंयुतः तुल्यं नाब्जं स्फूर्जद्धूलीविधुरितजननयनयुगमतिमृदुकरचरणस्य निर्मलचारुणः। कण्ठस्येयं दासी श्यामापरभृतयुवतिरपि मधुपरिचयकलविरुतिर्निसर्गकलध्वनेः भ्रूवल्लीभङ्गे छेकाया हरिणनयनमचतुरमतिललिततनु करभोरु ते सदृशं दृशः" २८४ ३५/१ दशभिर्वृद्धा पिपीलिकापणवः ॥ यथा "रुन्दोऽमन्दः कुन्दच्छायः शरदमलघनतुहिनविकचकुमुदवनहरहसितसितः शशाङ्ककरोज्वलः तारः पारावारापारः स्थलजलगगनतलसकलभुवनपथधवलनपरिचितः प्रसाधितदिङ्मुखः। लोकालोकच्छेदं गत्वा दृढकठिनविकटदिगवधितटघटनविवलनचलयितो विशुद्धयशश्चयः प्रोत्तुङ्गः श्वेतप्राकारो ध्वनितगुणपणव तव जयति नृपवर नवललितवसतर्जगंत्रितयश्रियः" २८५ ४०/१ पञ्चदशभिर्वृद्धा पिपीलिकामाला ॥ यथा "उत्फुल्लाम्भोजाक्ष्यास्तस्याः कुसुमशरसुभग तव विरहदव इह हि जयिनि समुपवरणविपये व्यधायि सखीजनैः, अङ्गे वासः कर्पूराम्भस्तिमितशुचि तुहिनकिरणकरपरिभवचतुरधवलिमकुचतटयुगे सुमौक्तिकदाम च। रम्भागुल्मं लीलागारं मलयजरसकलितवसुधामभिनवविकचकुमुदवनदलसमुदयैश्च तल्पककल्पना नव्या मौलौ मल्लीमाला तदिदमखिलमपि दवहुतवहरुहिपरिचितमहिम विरचयति मुहुः प्रदाहमहाज्वरम्" २८६ ४५/१ शेपजातिप्रकरणं। ॐ अथ दण्डकाः॥ "यत्किञ्चित् दृश्यते छन्दः षड्विंशत्यक्षराधिकम्। शेपजात्यादिकं मुक्त्वा तत्सर्वं दण्डकं विदुः" ॐ तत्र नार्ङ्क्रैं चण्डवृष्टिः ॥ ना इति नगणद्वयं र्क्रै इति रगणसप्तकं च समाहारो द्वंद्वः। यथा "अभिनवतरदुर्मदोद्दामपाथोदमाला प्रतिच्छादिते सर्वतो व्योमनि स्फुटितकुटजकेतकीपांसुपुञ्जच्छटाच्छोटिताशेपदिश्यैन्द्रदिग्मारुते। मुदितनिखिलनीलकण्ठैः कृते क्रूरकेकारवव्याकुले ताण्डवाडम्बरे कथमिव चलितोऽसि भोः पान्थ हित्वा प्रियां चण्डवृष्टिप्रपाताकुले वर्त्मनि" २८७ चण्डवृष्टिप्रपात इत्यन्ये। ॐ यथोत्तरमेकैकरवृद्धा अर्णार्णवव्याल-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

जीमूतलीलाकरोद्दामशङ्खादयः ॥ चण्डवृष्टेरूर्ध्वमेकैकरगणवृद्धाः क्रमेणार्णादयो दण्डकाः । तत्र नगणाभ्यां परैरष्टभी रगणैरर्णः । यथा "अविरलगुरुशाखिनोऽरण्यभागान्समुत्तुङ्गशृङ्गावलीशालिनः सर्वभूमीभृतो विपुलतरतरङ्गसंसङ्गिनीः कूलिनीरुच्छ्रितानेकसौधान्पुरग्रामदेशानपि । स्थगयति तमसि प्रपन्ने सपत्नत्वमुन्मुक्तधैर्यस्य पाथोनिधेर्मङ्क्षु रज्यद्वपुः कुपित इव तदर्णसः प्रोद्ययौ तस्य संहारकारी समुद्यत्करोऽयं निशावल्लभः" २८८ नवभिरर्णवो यथा "प्रसृतनिबिडमारुतान्दोलिताश्वत्थसंशीर्णपर्णौघविस्फारवातोलिकापूर्यमाणाम्बरे घनवनदवदह्यमानाखिलक्रूरशार्दूलपोतोद्भटोन्नादसंत्रस्तमातङ्गयूथाकुले । दिनकरकरतप्तकोलावलीश्रीयमाणार्द्रतल्ले लसल्लोलकल्लोलवाचालमाद्यन्महार्णवपयसि ननु प्रिय ग्रीष्मकालेऽधुना मा स्म गा मानय त्वं हि पीनस्तनाश्लेषसौख्यानि मे" २८९ दशभिर्व्यालो ॥ यथा "चिरवहदरघट्टसम्पूर्यमापोच्छलत्सारिणीतोयधाराभिरामं सदैकान्तकान्तप्रसर्प्पल्लताबहलिततरुगुल्मकेलीगृहं ये पुरोद्यानमुद्दामलीलाजुषः स्त्रीसखाश्चारु चेरुश्चुलुक्येश्वर । तृषितकरटियूथभल्लूकसन्दोहकोलव्रजव्याकुलाश्यानकल्लोलिनीवारिदुर्वारसूर्यद्युतिव्यतिकरविधुरीकृतव्यालसंरुध्यमानद्रुमच्छायमुद्दण्डकान्तारमीयुस्त्वदीयद्विपस्तेऽधुना" २९० एकादशभिर्जीमूतो यथा ॥ जिनपदपङ्कजस्पर्शपुण्यकृताशेषशृङ्गः पुरस्तादयं तत्तदाश्चर्यसम्पन्निदानं भुवो भूषणं, प्रतिविपिननिकुञ्जकूजत्पिकीपञ्चमोच्चारसंवर्गितस्वर्गसीमन्तिनीवर्गगीतिप्रपञ्चाभिरामोऽन्वहम् । कुरुबकसहकारकारस्कराशोकजम्बूकदम्बेङ्गुदीवेणुकान्तारमालाप्रतिच्छन्नमार्त्तण्डचण्डातपः प्रतितटविनिविष्टजीमूतसन्दोहनिर्मुच्यमानामृतासारपूर्णोद्वहन्निर्झरः पश्य-दिष्टधोजयन्तो गिरिः"।२९१द्वादशभिर्लीलाकरो यथा "घनपरिमलसारकर्पूरपानीयतिम्यद्दुकूलं कुकूलश्रियं पद्मिनीपल्लवस्रस्तरः खादिराङ्गारविस्फूर्जितं तुहिनकिरणचन्द्रिका हन्त हालाहलत्वं नवं चन्दनं तप्तलोहोपमां वेणुवीणानिनादोऽपि कर्णज्वरत्वं दधत् । अयि तव विरहे यदस्या मृगाक्ष्या भवन्नामधेयाक्षरोच्चारमन्त्रैकरक्षाजुषः साम्प्रतं सर्वमेवाभजब्ध्यत्ययं तदस्ति सुभग सान्द्रपीयूषलीलाकरैस्तैर्वचोभिः समाश्वासयैनां चिरायान्यथा तु त्वमेवात्र निःशूकचूडामणिः" । २९२ त्रयोदशभिरुद्दामः ॥ यथा "वलयितवरकन्धरं बलात्तुङ्गतेजस्विगन्धर्वराजीखुरक्षुण्णविश्वम्भराक्षोदसन्दोहविक्षेपणादुर्द्दिनाडम्बरं प्रथममपि निरीक्ष्य सप्रेमकान्तामुखाम्भोरुहालोकने स क्षणं कौतुकी नष्टकामोऽपि यावद्भवत्युन्मनास्त्वद्विपक्षव्रजः । नृप तव सहसा जयश्रीविलासैकधामोऽभ्रमातङ्गसंस्पर्धिनोऽभ्रङ्कषैर्विग्रहैर्भीषणाः क्षोभयन्तो जगत् गर्जितैरूर्जितैः श्रुतमदजलनिर्झरैर्ध्वस्तधूलीवितानाः कृतान्ता इवोद्दामगन्धद्विपास्तावदाविर्भवन्तश्चिरान्मूर्छयामासुरेनं विभो" २९३ चतुर्दशभिः शङ्खः ॥ यथा "अमरपतिकरिभ्रमं बिभ्रती भोः समग्राः कलङ्कः कला विभ्रमं धारयत्यत्रिनेत्रप्रसूतस्य कृष्णो वहत्यन्धकध्वंसकर्तुस्तुलां कुवलयवनमातनोति श्रियं पौण्डरीकीं कलिन्दात्मजा जह्नुकन्योज्वलं वारि धत्ते विधत्तेञ्जनाद्रिर्विलासं च कैलासपृथ्वीभृतः । कलयति लवणोदधिः



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

क्षीरपाथोधिलीलायितं शेषशोभामशेषाह्वयः प्राप्नुवन्तीन्द्रनीलाश्च मुक्तामणीनां समासादयन्ति त्विषं विचकिलहरहासनीहारहारेन्दुशङ्खावदातैरमीभिः स्फुरद्भिर्महीपालचूडामणे शासनैश्वर्यवज्रायुध! त्वद्यशोराशिभिः २९४ आदिशब्दात्पञ्चदशभिः समुद्रः । षोडशभिर्भुजङ्ग इत्येवमादयो यथेष्टकृतनामानो यावदेकोनसहस्राक्षरपादस्तावद्भवन्ति । ॐ नाभ्यां रवद्यादयः प्रचितः ॥ नगणद्वयात्परे यादयः सर्वे वर्णगणा यदा भवन्ति तदा प्रचितः । रवदित्यतिदेशात् सप्तभिर्यैः प्रचितः । ततः परमेकैकयादिवृद्धा अर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयोऽत्रापि भवन्ति । यथा "विलसदुरुतरवारिप्रचण्डे महावाहिनीव्यूहविस्फारणशक्तौ प्रकटयति रुचिराखण्डकोदण्डदण्डं दिशुरयुच्चकै राजहंस प्रणाशम् । प्रशमयति निखिलं मेदिनीचक्रसन्तापविस्फूर्जितं न्यक्कृतार्कप्रतापे प्रचितघनबलयुक्तो नभस्यायमाने चुलुक्येश्वरे को न धत्ते प्रमोदम्" २९५ एवमादिषु शेषगणेपूदाहार्यं । एकैकगणवृद्ध्या चार्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयोऽप्युदाहार्याः । ॐ नग्भ्यामष्टादिराः पन्नग-दम्भोलि-हेलावली-मालती-केलि-कङ्केल्लि-लीलाविलासादयः ॥ नगणाद्गुरोश्च परे अष्टादिसङ्ख्या रगणा येषु ते यथासङ्ख्यं पन्नगादयो दण्डका भवन्ति । तत्राष्टरगणः पन्नगः । यथा "अविकलध्यानसन्तानधूमध्वजज्योतिराडम्बरप्लुष्टनिःशेषकर्मेन्धनो विदलितोदग्रभूयःकषायश्रियायैष पायादपायात्स वः पार्श्वनाथो जिनः । कमठदैत्ये च गाढोपसर्गक्रियाकर्कशे तत्प्रतीकारवद्धप्रयत्ने भृशं प्रकटितात्यन्तभक्तौ तदा पन्नगेन्द्रे वयस्याभवन्दृष्टिपाताः कृपार्द्राः समाः" २९६ एवमेकैकरगणवृद्ध्याऽन्येऽपि षडुदाहार्याः । ॐ लोर्यथेष्टं राश्चण्डकालः ॥ लघुपञ्चकात्परे यदृच्छया क्रियमाणा रगणाश्चण्डकालः । यथा "विविधमणिमेखलाश्रेणिविश्राणितश्रोणि हित्वा पुराण्याशु चान्तःपुराण्युच्चकैः करटितुरगादिसेनासहस्राणि च स्वीकृतच्छद्मकर्मादिवेषास्त्वदीयद्विपः । प्रतिदिशममी गिरीणां महाकन्दराः शाखिगुल्मानि कूलङ्कषाकूलरन्ध्राणि च स्फुरति तव चण्डकाले कराले कृपाणे सदा संश्रयन्ते महीपालचूडामणे" २९७ एकैकरगणवृद्ध्याप्युदाहार्यं । ॐ याः सिंहविक्रान्तः ॥ लोः परे यथेष्टं यगणा यत्र स सिंहविक्रान्तः । यथा "तरुणतरणितेजःप्रतप्ता वराहा इवारण्यभागेषु मुस्ताक्षतिं पल्वलान्ते विदधति किल केचित्तथान्ये महाभूभृतां कन्दराः कौशिकौघा इवाभिश्रयन्ते । विपिनगहनमध्ये पुनः केऽपि शाखामृगक्रीडितं बिभ्रति प्रत्यनीकक्षितीशाः प्रकटयति सदा सिंहविक्रान्तलीलामनूनाम् त्वयीमां धरित्रीश चौलुक्यचन्द्र" २९८ एवमेकैकयगणवृद्ध्याप्युदाहार्यं । ॐ लूगिभ्यां मेघमाला ॥ लघुपञ्चाद्गुरुत्रयाच्च परे यथेष्टं यगणा यत्र प्रयुज्यन्ते सा मेघमाला नाम दण्डकः । यथा "अविरलमदपाथोनिर्झरप्लावितक्षोणिपीठा महाशैलशृङ्गायमाणाः कपिशरुचिलसद्दन्ताशनिद्योतरौद्रा महागर्जितत्रासिताशेषलोकाः । रिपुनरपतिमातङ्गाः क्षणादेव देव प्रणाशं ययुः संयु-



P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

गान्तर्युगान्तानिल इव विपुलप्राणे महामेघमाला महीपालधुर्य त्वयि प्रोज्जिहाने" २९९ एवमेकैकयगणवृद्ध्यान्येप्युदाहार्याः । ॐ यथेष्टं रा मत्तमातङ्गः ॥ स्वेच्छया यत्र रगणाः प्रयुज्यन्ते स मत्तमातङ्गः । पुनर्यथेष्टग्रहणं लूगिभ्यामित्येतस्य निवृत्त्यर्थं । यथा "पुष्पचापस्य चापश्रियं बिभ्रती भङ्गुरभ्रूविलासैः स्मितस्मेरकस्तूरिका केलिपत्रावलीभङ्गिविभ्राजिगण्डस्थलेनेन्दुबिम्बानुकारं सदा कुर्वती । चारु वक्रोक्तिगर्भैर्वचोभिर्विदग्धैरमन्दं च पीयूषनिष्पन्दमातन्वती मत्तमातङ्गलीलागतिः काञ्चनच्छेदगौरी मुदं कस्य नाविष्करोति प्रिया" ३०० एवमेकैकरगणवृद्ध्याऽन्यदप्युदाहार्यम् । ॐ साः कुसुमास्तरणः ॥ यथेष्टं सगणा यत्र प्रयुज्यन्ते स कुसुमास्तरणः । यथा "सुभग त्वयि दूरमुपेयुपि सा न कदाचिदुपैति विलासगृहाभिमुखं विकचाब्जवते न ददाति दृशं शिशिरागरुचन्दनपङ्कमपाकुरुते । नच हृष्यति चाटुकरीषु सखीष्वपि पक्वपलाण्डुनिभं वहते वदनं कुसुमास्तरणानि पिनष्टितरां परिमुह्यति शीतलशीतमयूखकरैः" ३०१ एवमेकैकसगणवृद्ध्याऽन्यदप्युदाहार्यं । ॐ याः सिंहविक्रीडः ॥ यत्र यथेष्टं यगणाः प्रयुज्यन्ते स सिंहविक्रीडः । यथा "क्वचित्पङ्कशङ्काभ्रमत्कोलदंष्ट्रासमुल्लेखनिष्पिष्टवेश्मान्तकाचावनीकं क्वचिन्नालिकेरीफलास्फालनव्यग्रशाखामृगश्रेणिपर्याकुलोद्यानभागम् । क्वचित्तसमजन्महासैरिभोद्दामश्रृङ्गाग्रघातोच्छलद्दीर्घिकावारिसान्द्रं क्वचित्सिंहविक्रीडवूत्कारघोरं चुलुक्येन्द्र जज्ञे पुरं त्वद्रिपूणामिदानीम्" ३०२ एवमेकैकयगणवृद्ध्याऽन्यदप्युदाहार्यम् । ॐ लगावनङ्गशेखरः ॥ यत्र यथेष्टं निरन्तरौ लघुगुरू प्रयुज्येते सोऽनङ्गशेखरः । यथा "विशालभाललोलपूर्णमानकज्जलोज्वलालकद्विरेफमालिकोपशोभिते विवृद्धहावमुग्धचारुपक्ष्मलालसभ्रमत्सुतारदीर्घनेत्रपत्रसुन्दरे । अमन्दकुन्दकुड्मलाग्रकोमलोल्लसद्द्युतीद्धशुद्धदन्तपङ्क्ति केसरालये प्रियामुखाम्बुजेऽधरं चिराय मध्विवापिबन्ननारतं भवेदनङ्गशेखरः" ३०३ एवं लघुगुरुवृद्ध्याऽन्यदप्युदाहार्यम् । ॐ ग्लावशोकपुष्पमञ्जरी ॥ यत्र यथेष्टं निरन्तरौ गुरुलघू प्रयुज्येते सोऽशोकपुष्पमञ्जरीनामा दण्डकः यथा "अस्तमाश्रितस्तुषारभारपातदग्धसर्वपुष्पजातिसञ्चयो हिमर्तुरद्य सर्वतो वसन्तनामधेय एष जृम्भति प्रियः सखा तवेह देव पुष्पचाप । विष्टपत्रयीपराजयेच्छया गृहाण नूतनान् शिलीमुखानखण्डितैकवीर चारुचूतकोरकानशोकपुष्पमञ्जरीर्नवाः स्मितानि केसराणि पाटलाश्च" ३०४ एवं गुरुलघुवृद्ध्याऽन्यदप्युदाहार्यं । ॐ तागौ कामबाणः ॥ यत्र यथेष्टं तगणा अन्ते गुरुद्वयं च प्रयुज्यते स कामबाणः । यथा "त्वद्विप्रयोगे नवे बालिकाया मनोभूशरक्लेशशान्त्यै प्रयत्नात्सखीभिः समन्तात्पाथोजिनीपल्लवैः कल्पितं चारुतल्पं समासूत्रिता नूतनैर्हारयष्टिर्मृणालैः । रम्भादलैः कोमलैर्निर्मितं तालवृन्तं कृतश्चान्दनेन द्रवेणाङ्गरागः किलास्यास्तीव्रव्यथां प्रत्युतैतद्वितन्वत्समग्रं कठोराशयाऽशिक्षितात् कामबाणत्वमुग्रम्" ३०५ एवमेकैकतगणवृद्ध्याऽन्यदप्युदाहार्यम् । ॐ भागौ भुजङ्ग-

॥ १९ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

विलासः ॥ यत्र यथेष्टं भगणाः प्रयुज्यन्तेऽन्ते च गुरुद्वयं स भुजङ्गविलासः । यथा "पीनघनोन्नतवृत्तविशालतरस्तनमण्डलगाढनिपीडनकण्टकिताङ्गः कोमलपङ्कजमृणाललताद्दढवेष्टितकण्ठतटः परिचुम्बनविभ्रमपात्रम् । वासगृहे बहलोचलितागरुधूमलतानिचिते शयने मृदुनि क्षणदायां यो दयितां रमयत्यतिसम्भ्रममानजुषं स भुजङ्गविलासधुरामिह धत्ते" ३०६ एवमेकैकभगणवृद्ध्याऽन्यदप्युदाहार्यम् । ❀ नाभ्यां पञ्चमात्रैरुत्कलिका ॥ द्वाभ्यां नगणाभ्यां परैर्यथेष्टं पञ्चमात्रैर्गणैरुत्कलिकानाम । यथा "स्मितवकुलशिरीषकङ्केल्लिककोलनव्यप्रसूनावलीपरिमलविलोलरोलम्बलीलाकुलीकृताखिलचारुलीलावने । मृदुमलयसमीरशैलूषशिक्षाक्रमानुगुणविविधाङ्गहारप्रयोगप्रपञ्चप्रवलगल्लतानर्त्तकीरम्यरङ्गावनिः । अभिनवसहकारकोरकास्वादमाद्यत्पिकयुवतिपञ्चमोच्चारमन्त्राखसाधितविषममानिनीमानदुर्गः समन्तादयं कमिव सपदि सन्ततोत्कलिकमिह न विधत्ते जनं हेलया निर्जिताशेषलोकस्य देवस्य कामस्य निर्व्याजबन्धुर्मधुः" ३०७ एवमेकैकपञ्चमात्रवृद्ध्याऽन्यदप्युदाहार्य्यम् । दण्डकप्रकरणम् । ❀ इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ समवृत्तव्यावर्णनो नाम द्वितीयोऽध्यायः ॥ २ ॥

इदानीमर्द्धसमवृत्तव्यावर्णनार्थमुपक्रम्यते । ❀ ओजयुजोः ॥ अधिकारोऽयमाविषमवृत्तेभ्य उपतिष्ठते । तत्रौजं विषमं युक्समं लोकसिद्धं । तत्र ❀ सिलगा नभभ्रा हरिणप्लुता ॥ पाद इति चानुवर्तते । ओजपादयोः सगणत्रयं लघुगुरू च युक्पादयोर्नभभरा यत्र वृत्ते सा हरिणप्लुता । यथा "नृप शैलशिलाशयनासनाकन्दफलाहरणाः सदा । निवसन्ति वने भवतो रिपोस्तरुनिकुञ्जगता हरिणप्लुताः" १ प्राच्यवृत्तिरियम् । ❀ सिलगा भिगगा उपचित्रम् ॥ ओजपादयोः सगणत्रयं लघुगुरू च । युजोर्भगणत्रयं गुरुद्वयं च । यथा "अयमत्र नृपः सचिवस्त्वसावेष कुमार इतः प्रतिहारः । उपचित्रमिति त्वदरेर्गृहे वक्ति मिथः किल पान्थसमूहः" ❀ लोनं वेगवती ॥ उपचित्रमेव लघुना रहितं वेगवती । ओजे सिगौ युजि भिगगा इत्यर्थः । यथा "नृपते तव कार्मुकवंशान्निष्पतिता शितसायकमाला । क्षितिभृच्छिरसि प्लवमाना वेगवती बत नूतनरेखा" २ आपातलिकेयम् । ❀ भिगगा नजज्या द्रुतमध्या ॥ ओजे भगणत्रयं गुरुद्वयं च युजि नजजयाः । यथा "वीरजिनेन्द्र भवत्पदपद्मं भ्रमर इव द्रुतमध्यगमद्यः । मुक्तिवधूपरिरम्भणसौख्यं करतलगामि कृतं खलु तेन" ३ उपचित्रा । आपातलिकापरान्तिकेयम् । ❀ तजगा मस्जगगा भद्रविराट् ॥ ओजे तजरगाः युजि मसजगगाः । यथा "पश्येद्भगवन् पदारविन्दद्वन्द्वम् भक्तित एकदापि यस्ते । विश्वद्भुवनाधिपत्यमेकं भद्रं भद्रविराट् भजेत सोऽपि" ४ औपच्छन्दसिकमिदम् । ❀ सजसगा भर्नगगाः केतुमती ॥ ओजे सजसगाः । युजि भरनगगाः । यथा "प्रसरद्रजःस्थगितसूर्यां केतुमतीमुदीक्ष्य

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aradhak Trust

तव सेनाम् । वसुधापते दिवमिवात्मनाशमशङ्कत त्वदरिवर्गः" ४ ❀ ताजगगा जतजगगा आख्यानकी ॥ ओजे ततजगगाः । युजि जतजगगाः । यथा "त्वद्वैरिभूपैरियमागतोच्चैर्मरालनादैर्मुखरा शरच्छ्रीः । आख्यानकीव त्वदनीकयात्रोत्सवस्य सद्यश्चकितैरुदैक्षि" ६ आख्यानकी वार्त्ताहारिका । ❀ व्यत्यये विपरीतादिः ॥ व्यत्यये इति ओजे जतजगगाः । युजि ततजगगाः । विपरीतादिर्विपरीताख्यानकीत्यर्थः । यथा "अमंस्त ते दुर्नयचेष्टितानामाख्यानकीं या विपरीतवृत्तिम् । पुरः सखीनां ब्रुवता विपक्षनाम त्वया संप्रति लज्जिता सा" ७ एतयोश्चोपजात्यन्तर्गतत्वेऽपि विशेषसंज्ञार्थमत्र पाठः । ❀ र्जर्जा ज्रज्रगा यववती ॥ ओजे रजरजा युजि जरजरगाः । यथा "वन्यसैरिभा भवद्विपक्षधाम्नि निरन्तरेन्द्रनीलबद्धभूमिभागे । न्यग्मुखं प्रकुर्वते मुधा वितर्क्य विनीलविस्फुरद्यवान्वितां धरित्रीम्" ८ यवान्वितां यववतीमित्यर्थः । छन्दोवशाच्च यवान्वितामित्युक्तम् । ❀ व्यत्यये षट्पदावली ॥ व्यत्यये इति ओजे जरजरगाः युजि रजरजा यथा "नवोदयं चिरादुपेयिवांसमर्कं स्वागतानि पृच्छतीव संमदेन । सरोजिनी विकस्वरा निशावसाने षट्पदावलीकृतस्वनच्छलेन" ९ ❀ नभभ्रा नभिरा मकरावली ॥ ओजे नभभराः युजि नो भत्रयं रश्च । यथा "मकरकेतुभटस्य विराजते वरतनुर्ध्वजयष्टिरिव प्रगुणीकृता । मृदुकपोलतले दधती नवां मृगमदस्तबकैर्लिखितां मकरावलीम्" १० ❀ मसागाः सभासाः करिणी ॥ ओजे मः सगणद्वयं गुरुश्च । युजि सो भगणद्वयं सश्च । यथा "चन्द्रो मत्तकरीन्द्र इवायं दलितोद्दामतमस्तरुगहनः । क्रीडत्यम्बरपल्वलमध्ये स्फुटताराकरिणीभिरनुसृतः" ११ ❀ साज्गाः सभल्गाः प्रबोधिता ॥ ओजे सद्वयं जगौ च । युजि सभरलगाः । यथा "तरुमूलगृहाः क्षपाक्षये नृप निद्रां जहति द्विपस्तव । विटपान्तकुलायनिष्पतत्पतगश्रेणिरवैः प्रबोधिताः" १२ ❀ नारलगा नजज्रा अपरवक्त्रम् ॥ ओजे नगणद्वयं रलगाश्च । युजि नजजराः । यथा "नृपवर भवदीयवर्णनं निखिलमुखै रचयन् पुरातनैः । अधिकमपरवक्त्रमीहते श्रुतिपठनाय चतुर्मुखोऽधुना" १३ एतौ वैतालीयभेदौ । ❀ गान्तं पुष्पिताग्रा ॥ अपरवक्त्रमेवौजयुजोर्गान्तं पुष्पिताग्रा । यथा "स्मर इव शयितः कयाथ शोकेप्यपदहनेन जगज्जयाय नुन्नः । सपदि यदिपवोऽस्य पुष्पिताग्रप्रसवमिषात्प्रगुणाः परिस्फुरन्ति" १४ ❀ साज्गगाः स्भर्या मालभारिणी ॥ ओजे ससजगगाः । समे सभरयाः । यथा "इह वासकसज्जिका विलासं वहते शारदशर्वरीवरेण्यम् । अवतंसितकैरवोज्वलश्रीर्विकसत्तारकमालभारिणीयम्" १५ नितम्बिनीत्यन्यः । औपच्छन्दसिकभेदावेतौ ❀ भातल्गा न्जन्सगा विलसितलीला ॥ ओजे भद्वयं तलगाश्च । युजि नजनसगाः । यथा "वक्रनिरीक्षणभङ्गिप्रणयी भ्रमति धनुर्विलसदिपुरनङ्गः । भृत्य इवाशु यदाज्ञां विदधद्रमयति सा नवविलसितलीला" १६ ❀ भ्रन्जनल्गा ञैर्न्जे-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

भजनसाष्टैर्मानिनीः ॥ ओजे भरनजनलगाः । जैरिति दशभिर्यतिः । युजि नजभजनसाः । टैरित्येकादशभिर्यतिः । यथा "मानभृतामिदं तृणमिव जीवितमिति न किं कलयसि शास्सि रोहिणि न यत् त्वमपि निजपतिम् । दक्षसुते कलङ्कय पितृगोत्रमलमधुना चिरमथ मानिनीजनवधानुमतिघटनया" १७ ❀ रो ज्रलगाः कामिनी ॥ ओजे रगणः । युजि जरलगाः । यथा "निर्वृतिं, विधेहि हस्तगामिनीं । सर्वथा, जहीहि हन्त कामिनीम्" १८ रो ज्रज्रा शिखी ॥ ओजे रगणः । युजि जरजराः । यथा "योषितो, वियोगदुःखखिद्यमानमानसाः । दन्दहत्कटुस्वनैर्निहन्ति निश्चितं शिखी" १९ ❀ रो ज्रज्रा ज्गौ नितम्बिनी ॥ ओजे रगणः । युजि जरजरजगाः । यथा "सर्वथा, विरिञ्चिशङ्करामराधिराजकेशवर्षयः । भेजिरे, यदुत्पथं चिराय तत्र कारणं नितम्बिनी" २० ❀ रस्त्रिर्ज्रौ ल्गौ वारुणी ॥ ओजे रगणः । युजि त्रीन् वारान् ज्रौ जरजरजरलगाः । यथा "उत्तमं, घनाविनश्वरप्रमोदकारणं कृतिन्यदीहसे सुखम् । निर्मलं, तदा शमामृतं पिबानिशं सुदारुणां विमुञ्च वारुणीम्" २१ ❀ रश्चतुर्ज्रौ वतंसिनी ॥ ओजे रगणः । युजि चतुरो वारान् ज्रौ जरजरजरजराः । यथा "शोभते, धनुर्लतेव पुष्पधन्वनः शिरीषकोमलाङ्गिका सरोजलोचना । बालिका, जपासहोदराधरा मधूककान्तिमत्यशोकपल्लवावतंसिनी" २२ ❀ कामिन्याद्या व्यत्यये वानरीशिखण्डिसारस्यपराहंस्यः ॥ कामिनीशिखिनितम्बिनी वारुणीवतंसिन्य ओजयुक्पादयोर्व्यत्यये यथासंख्यं वानरीशिखण्डिसारस्यपराहंसीसंज्ञाः । कामिनीव्यत्यये वानरी । यथा "नियम्य गाढसन्ततैः, सद्गुणैः । सखे स्थिरां कुरु श्रियं, वानरीम्" २३ शिखिव्यत्यये शिखण्डी । यथा "तपात्यये घनध्वनन् मृदङ्गके, कुर्वते । अखण्डपङ्जुगीतयः शिखण्डिनस्ताण्डवम्" २४ नितम्बिनीव्यत्यये सारसी । यथा "त्वमब्जलोचने शरत्त्वदीयमेतदाननं, चन्द्रमाः । झणझणायितस्वनापि मेखला विभाति ते, सारसी" २५ वारुणीव्यत्यये अपरा यथा "जिन त्वदीयशासनादृते विवेकदीपको भवत्ययं न क्वचित् । तमश्छिदाक्षमं हि तेज एकमूर्जितं प्रसूत इन्द्रदिक् नापरा" २६ वतंसिनीव्यत्यये हंसी । यथा "त्वदारवे कृतस्पृहाऽश्रु विस्मृतस्वनिस्वना बकी जगाम, साधुना । मूकतां सरो विकस्वराम्बुजाकरं प्रियप्रणीतचाटुका तदेहि सोत्सवं, हंसिके" २७ ❀ स्लगा सिल्गा इला ॥ ओजे सलगाः । युजि सत्रयं लघुगुरू च । यथा "करटिस्रवन्मदपङ्किलधूलिचितालिताम् । रणितच्छलात्तव गायति नूनमिला बलम्" २८ ❀ स्लगाः सूर्मृगाङ्कमुखी ॥ ओजे सलगाः । युजि सगणाष्टकम् । यथा "विरहे नवे, भवतः सुभगोद्धतबाष्पतुषारकणप्रकरो ग्लपयत्यनिशम् । कुमुदस्मितामरविन्दकरां विकचोत्पलचारुदृशं परिपूर्णमृगाङ्कमुखीम्" २९ ❀ न्लृलगा न्लृगौ शिखा ॥ ओजे नगणनवकं लघुगुरू च । युजि नगणदशकं गुरुश्च । यथा "प्रसृमरमरिनरपतिबलतिमिरनिकरमतनुमपि गुरुगिरिगुहा-

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

तरुगहनविकटकुहरशरणमिममखिलमिह समरसमयदिनमुखे। परममहिमनि शशधरकुलगगनदिनकरपरपटिमजुषः किरणततय इव विदधति चिरतरमवनिपतितिलक तव वरविशिखाः" ॐ व्यत्यये खञ्जा ॥ ओजयुक्पादयोर्व्यत्यये शिखैव खञ्जा। तत्रौजयोस्त्रिंशल्लघवो गुरुश्च। युक्पादयोरष्टाविंशतिलघवो गुरुश्च। यथा "प्रमुदितसमदपरभृतकलरणितमविकलशशधरकिरणविततयो, विकसितसरसिरुहविपिनमलिकुलविरुतमुखरितकुसुमितलताः। कुरुबकबकुलविचकिललसदविरलपरिमलसुरभिमलयपवनो, विरहविधुरयुवतिहृदयतपनमिदमखिलमपि नवमधुसमये" ३१ खञ्जेतिशब्दस्य छन्दसि प्रवेशयितुमशक्यत्वान्नाम नोक्तम्। शिखाखञ्जयोः प्रकारान्तरमाह। ॐ अर्द्धयोर्वा ॥ न्लृलगा न्लृगौ चेत्योजयुक्पादयोर्यच्छिखाया लक्षणमुक्तं तत्पूर्वापरार्द्धयोश्चेद्भवति तदापि शिखा। एवं पूर्वापरार्द्धयोर्व्यत्यये खञ्जापि। अर्द्धयोरित्यभिधानादोजयुजोरिति निवृत्तम्। तत्र शिखा यथा "सुभग तव नवविरह इह महति विलसति चकितहरिणशिशुदृशः। अमृतरुचिरुचिरजनि विषममलकमलदलततिरपि दवदहनशिखा" ३२ खञ्जा यथा "अभिनवविकसितकुरुबकविचकिलबकुलपरिमलमधुसमये। त्वमिह कथमिव पथिक हतक गतकरुण परिहरसि निजमृगदृशम्" ३३ अनयोर्विषमवृत्तत्वेऽप्यर्द्धसममध्ये लाघवार्थं पाठः ॐ न्लृगावतिरुचिरा द्वयोः ॥ अर्द्धयोर्नगणनवकं गुरुश्च। यथा "घनपरिमलमिलदलिकुलमुखरितनिखिलकमलकुवलयवनः। जनयति मनसि निरवधि मुदमविरतमिह मम मधुरतिरुचिरे" ३४ ॐ न्लृलगाश्च ॥ द्वयोरर्द्धयोर्यथासंख्यं न्लृगौ न्लृलगाश्च यत्र भवन्ति साप्यतिरुचिरा यथा "रतिकरमलयमरुति शुचिशशिभृति हतहिममहसि मधुसमये। परिहरसि पथिक हतक कथमतिरुचिर युवतिमतिहि चपलतया" ३५ द्वे अप्येते चूलिके इत्यहीन्द्रः। अर्द्धसमप्रकरणम्।

अथ विषमवृत्तान्युच्यन्ते। ॐ अनुष्टुभि नाद्यात्स्नौ तुर्याद्यो वक्रम्। अनुष्टुभ्यष्टाक्षरायां जातौ पादस्याद्यात्प्रथमादक्षरात्परौ स्नौ सगणनगणौ न भवतोऽन्ये तु षड्गणा यथेष्टं भवन्ति चतुर्थादक्षरात्परतश्च यगणो भवति तद्वृत्तं वक्रनाम यथा "तस्यास्त्रस्तकुरङ्गाक्ष्या वक्रेण त्वं पराभूतः। हिमांशो क्षीयसे युक्तं लज्जसे तु न किं वृथा" १ एवमन्यदप्युदाहार्यम्। अत्र प्रथमपादस्य प्रथमस्थाने ग्लाविति द्वौ विकल्पौ। द्वितीये स्नवर्जनात् शेषगणैः षट्। तृतीये य एकएव। चतुर्थे ग्लाविति द्वौ। अन्योन्याभ्यासे चतुर्विंशतिः। प्रतिपादं चतुर्विंशतेर्भावादन्योन्याभ्यासे जातास्तिस्रो लक्षा एकत्रिंशत्सहस्राः सप्त शतानि षट्सप्तत्यधिकानि। एवमियमेव संख्या प्रत्येकं विपुलाभेदेष्वपि ज्ञेया। ॐ तद्युजोर्जः पथ्या ॥ तद्वक्रं युजोः पादयोस्तुर्यादक्षरात्परो जगणश्चेद्भवति तदा पथ्या। यथा "आलानितगजस्कन्धघृष्टाः पथ्यायतद्रुमाः। अद्यापि कथयन्त्येते राजेन्द्र तव दिग्जयम्" २ ॐ ओजे विपरीतादिः ॥ ओजयोः

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

पादयोस्तुर्यादक्षरात्परो जगणश्चेद्विपरीतादिः पथ्या युक्यादयोर्य एवावतिष्ठते यथा "विपरीतानि रे शठ करिष्यसि कियन्त्यस्मात् । दुकूलं प्रच्छदीकृतं तस्या धत्से ममाग्रे यत्" ३ ॐ नश्चपला ॥ ओजयोः पादयोस्तुर्यादक्षरात्परो नगणश्चेच्चपला । यथा "वीक्षितोऽप्येष तिलकश्चपलाक्षि त्वया सद्यः । दधाति नव्यमुकुलै रोमाञ्चकञ्चुकं मन्ये" ४ ॐ युजोः षड्भ्यो लो विपुला ॥ युक्पादयोः पञ्चयः परो लघुश्चेद्विपुला । नचेयं पथ्यया गतार्था । विपुलावर्गस्येदानीमारभ्यमाणत्वात्तां विना तस्यानुपपत्तेः । युक्पादयोः सप्तमेन लघुनाऽवश्यमेव भवितव्यम्, विषमपादयोस्तु नादिभिर्यगणस्यापवादं वक्ष्यति । पथ्यायां तु यगण एवावतिष्ठते । ॐ सैतवस्य चतुर्षु ॥ सैतवस्याचार्यस्य मते चतुर्षु पादेषु पञ्चयः परो लो भवति यथा "विपुलेऽप्यम्बुधौ कृतं वर्त्म रामेण सैतवम् । चित्रमेतदिहाथवा किमसाध्यं महात्मनाम्" ५ ॐ तुर्यान्नतभ्रम्सास्तद्विपुला ॥ ओजे विपरीतादिरित्यत ओज इत्यनुवर्त्तते । ओजयोः पादयोस्तुर्यादक्षरात्परं यगणं बाधित्वा नतभरमसाश्चेद्भवन्ति तदा तद्विपुला । नविपुला तविपुला भविपुला रविपुला मविपुला सविपुला चेति । युजोः षञ्चयो ल इति तु स्थितमेव । नविपुला यथा "पश्यन्ति देवचरणद्वयं ये तव भक्तितः । तेषां भवन्ति विपुलाः सद्यः कल्याणसम्पदः" ६ ओजे इति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम् । व्यक्तिपक्षे पुनरेकस्य प्रथमस्य तृतीयस्य वा । तथा च महाकवीनां प्रयोगः "अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः । तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना" ७ तथा "तव मन्त्रकृतो मन्त्रैर्दूरात्संशमितारिभिः । प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः" ८ तविपुला जातिपक्षे यथा "पादेन हता येन सा जातीलुब्धेन मल्लिका । अलेस्तस्य दैवादहो बदर्यपि सुदुर्लभा" ९ व्यक्तिपक्षे "वन्दे कविं श्रीभारविं लोकसन्तमसच्छिदम् । दिवा दीपा इवाभान्ति यस्याग्रे कवयोऽपरे" १० तथा "लोकवत्प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः । लोकव्यवहारं प्रति सदृशौ बालपण्डितौ" ११ । जातिपक्षे भविपुला यथा "इयं सखे चन्द्रमुखी स्मितज्योत्स्नावभासिनी । इन्दीवराक्षी हृदयं दन्दहीति तथापि मे" १२ व्यक्तिपक्षे यथा "यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति । देवः स जयति श्रीमान् दण्डधारो महीपतिः" १३ तथा "मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा । उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता" १४ जातिपक्षे रविपुला यथा "वधूभिः पीनस्तनीभिस्तूलीभिः कुङ्कुमेन च । कालागरुधूपधूमैर्हेमन्ते जयति स्मरः" १५ व्यक्तिपक्षे यथा "महाकविं कालिदासं वन्दे वाग्देवतागुरुम् । यज्ज्ञाने विश्वमाभाति दर्प्पणप्रतिबिम्बवत्" १६ तथा "कामिनीभिः सुखं सङ्गः क्रियते पण्डितैरपि । यदि न स्याद्वारिवीचीचञ्चलं हन्त जीवितम्" १७ जातिपक्षे मविपुला यथा "सर्वातिरिक्तं लावण्यं बिभ्रती चारुविभ्रमा । स्त्रीलोकसृष्टिः सा नूनं

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

छंदोनु-
॥ २२ ॥

निःसामान्यस्य वेधसः" १८ व्यक्तिपक्षे यथा "मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः । षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः" १९ तथा "अदूरवर्त्तिनीं सिद्धिं राजन्विगणयात्मनः । उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत्" २० जातिपक्षे स- विपुला यथा । "क्षणविध्वंसिनि काये का चिन्ता मरणे रणे । को हि मन्दः सहसैव स्वल्पेन बहु हारयेत्" २१ एवं व्यक्तिपक्षेऽप्य- न्वेष्यम् । सङ्कीर्णाश्च विपुलप्रकारा दृश्यन्ते । यथा "क्वचित्काले प्रसरता क्वचिदापत्यनिघ्नता । शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम्" "तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् । हिमांशुमाशु ग्रसते तन्मृदिम्नः स्फुटं फलम्" २२ इत्यादि । ते स्वबुद्ध्याभ्यूह्याः । सर्वासां च विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवतीत्याम्नायः । वक्त्रप्रकरणं ॥ **एकोऽष्टाक्षरः पादश्चतुर्वृद्धाः क्रमात्परे पदचतु- रूर्ध्वं चतुर्विंशतिधा** ॥ एकः कश्चिदष्टाक्षरः पादस्ततोऽन्ये पादाः क्रमाच्चतुर्भिश्चतुर्भिर्वर्णैर्वृद्धाः कार्या इति पदचतुरूर्ध्वं । तच्च न्यासभेदाच्चतुर्विंशतिधा स्थापना यथा ।

| | | | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ८ | ८ | ८ | ८ | ८ | ८ | १२ | १२ | १२ | १२ | १२ | १२ | १६ | १६ | १६ | १६ | १६ | १६ | २० | २० | २० | २० | २० | २० |
| १२ | १६ | २० | १२ | १६ | २० | ८ | १६ | २० | ८ | १६ | २० | १२ | ८ | २० | १२ | ८ | २० | १२ | १६ | ८ | १२ | १६ | ८ |
| १६ | १२ | १६ | २० | २० | १२ | १६ | ८ | १६ | २० | २० | ८ | ८ | १२ | ८ | २० | २० | १२ | १६ | १२ | १६ | ८ | ८ | १२ |
| २० | २० | १२ | १६ | १२ | १६ | २० | २० | ८ | १६ | ८ | १६ | २० | २० | १२ | ८ | १२ | ८ | ८ | ८ | १२ | १६ | १२ | १६ |

प्राप्ते वसन्तमासेऽस्मिन्नन्तरेणौपाधिं वल्लभां गेहिनीम् । पदचतुरूर्ध्वं कथमिव पथिक यास्यसि, विपलतिकानामिवोत्फुल्लक- क्केलिलतानां गन्धं जिघ्रन्" २४ एवमन्येऽपि भेदा उदाहार्याः । ** तदादौ द्विगं सर्वलं प्रत्यापीडः** ॥ तदेव पदचतुरूर्ध्व- मादौ द्विगुरुकं ततः परं सर्वलघुवर्णं प्रत्यापीडः । यथा "स्वामिन् जिनवर तव, योऽङ्घ्रिद्वितीयमृषभ विनमति । नम्रामरम- णिमयमुकुटशुचिकिरणमालाकिसलयितचरणकमल इह दिवि भवति" २५ **अन्ते च** ॥ तत्पदचतुरूर्ध्वमन्ते चकारादादौ च द्विगं शेषसर्वलघुवर्णं पुनः प्रत्यापीडसंज्ञम् । यथा "नित्यं प्रणमत भक्त्या, पादद्वयमिह चरमजिनस्य । सद्यो यदमरनरभुजगपरि- वृढानां, मौलौ सपदि भवति नवविकसितकमलवतंसः" २६ ** द्विगमापीडः** ॥ चानुकृष्टत्वादादाविति नानुवर्त्तते अन्ते द्विगुरुकं शेषसर्वलघुकं पदचतुरूर्ध्वमापीडसंज्ञम् यथा "मदमुखरमयूरे, स्फुटविविधसरिदधिकपूरे, । नवघनसमय इह कलय बत कान्तां, शरणमयि पथिक हतक झगिति जहिहि वनान्तम्" २७ अत्र प्रतिपादं चतुर्भिर्यतिरिति कश्चित् । पदचतुरूर्ध्ववदापीडोऽपि चतुर्विंशति-

शासन॰

॥ २२ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

धेति तन्मध्यात्पूर्वाचार्यानुरोधेन भेदत्रयस्य नामान्युच्यन्ते । ❀ स आद्यस्य द्वितीयादिना व्यत्यये कलिकालवल्यमृतधाराः ॥ स आपीड आद्यस्य पादस्य द्वितीयतृतीयतुर्यैः पादैर्विपर्यासे यथासंख्यं कलिकादयो भवन्ति । तत्राद्यस्य द्वितीयेन व्यत्यये कलिका यथा "करकलितनिशितकरवालः, सुचिरमवनिपालः । प्रथुमदरिपुनृपतिबलदलनकालः, त्वमिह जय निजविलसितपरिदलितकलिकालः" । २८ मञ्जरीति पिङ्गलः । आद्यस्य तृतीयेन व्यत्यये लवली यथा "त्वयि जलधिमनुवलति नृपमुखवासः, समजनि निखिलदिगबलानाम् । सुरभिबहुरजोभिः, तरलतुरगनिकरखुरमृदितमृदुलवलीनाम्" २९ आद्यस्य तुर्येण व्यत्ययेऽमृतधारा यथा "प्रणयवति सखि समुपहसितमनसिशयरूपे, प्रणयमनुसर क इव मानः । स्रवति वचनमपि मधुरमिह यदस्य, सततममृतधाराम्" ३० पिङ्गलस्तु पदचतुरूर्द्ध्वभेदानेतानाह । यथा "जनयति महतीं प्रीतिं हृदये, कामिनां चूतमञ्जरी । मिलदलिचक्रचञ्चुपरिचुम्बितकेसरा, कोमलमलयवातपरिनर्त्तिततरुशिखरस्थिता" ३१ । विरहविधुरहूणकान्ताकपोलावदातम्, परिणतिदरपीतपाण्डुच्छवि लवलीफलं निदाघे । जयति हिमशीतलं, पाण्डवस्वादु तृष्णाहरं सुन्दरम्" ३२ यदि वाञ्छसि कर्णरसायनं सततममृतधाराभिः, यदि हृदि वा परमानन्दरसम् । भ्रातः श्रृणु धरणीधरवाणीममृतमयीं, तत्काव्यगुणभूपणामिति" ३३ पदचतुरूर्द्ध्वप्रकरणं सप्तभिः । ❀ स्जसला न्सज्गा भ्नजल्गा स्जसज्गाः पादेष्वुद्गता ॥ यस्य प्रथमे पादे सजसलाः । द्वितीये पादे नसजगाः । तृतीये पादे भनजलगाः । चतुर्थे पादे सजसजगास्तद्वृत्तमुद्गता । यथा "बत चन्द्रिका जलमशेपमुपरमयितुं चकोरकाः । शक्यमिह न खलु तत्परितः, पिबतोद्गतां सपदि चन्द्रलेखिकाम्" ३४ ❀ र्नभगास्तृतीये सौरभकम् । उद्गतैव तृतीये पादे रनभगाश्चेत्सौरभकम् । तृतीय इति वचनादुद्गताया एवान्ये त्रयः पादाः गृह्यन्ते । यथा "अतिरेकवान्किल गुणोऽपि कलयति कदापि दोपताम् । सप्तपर्णविटपी लसन् (विरुधां) मदसौरभाद्गनगजैर्विदल्यते" ३५ ❀ नौ सौ ललितम् ॥ उद्गतैव तृतीये पादे ननससाश्चेल्ललितम् । पादत्रयं पूर्ववत्तदेव यथा "सदलङ्कृतैर्गुणगणेन, विविधरसभावभङ्गिभिः । सुललितपदरचनाभिरहो, ललनेव का न कविता मनोरमा" ३६ उद्गताप्रकरणं त्रिभिः । ❀ म्सज्भगगाः स्नजरगाः नासौ निज्याः पादेषूपस्थितप्रचुपितम् । प्रथमे पादे मसजभगगाः । द्वितीये पादे सनजरगाः तृतीये ननसाश्चतुर्थे नगणत्रयं जयौ च यत्र भवन्ति तदुपस्थितप्रचुपितं वृत्तम् । यथा "राजन्यैः समरे मदादुपस्थितपूर्वम् द्विरदप्रचुपितयायिभिर्विपक्षैः । तव धनुरुरुनिनदाद् द्रुतगतिमृगवदपसरति त एते" ३७ ❀ नौ स्नौ न्सौ तृतीये वर्द्धमानम् ॥ उपस्थितप्रचुपितमेव तृतीये पादे ननसननसाश्चेद्वर्द्धमानम् । तृतीय इति वचनादन्यत्पादत्रयं तदवस्थमेव । यथा "दिग्यात्रासमयेऽद्य जैत्रतूर्यनि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aradhak Trust

नादैर्वियति प्रतिरसितेन वर्द्धमानैः । भयतरलितगमनान् दिनकररथतुरगान् कथमपि नृवर नियमयत्यरुणोऽयम्" ३८ ❀ तज्राः शुद्धविराडृषभम् ॥ उपस्थितमेव तृतीये पादे तजराश्चेत्तदा शुद्धविराडृषभम् । अन्यत्पादत्रयं तदवस्थमेव । यथा "लावण्यामृतपूरधारिणीह विशालरमणोन्नतपुलिनस्थलीमनोज्ञा । सा शुद्धविराण्मुखाम्बुजा, सरिदिव रमयति हृदयानि नराणाम्" ३९ उपस्थितप्रचुपितप्रकरणं त्रिभिः ॥ ❀ पूर्वे अर्द्धे मुगौ परे न्लृलला: सौम्या ॥ पूर्वार्द्धे पञ्च मगणा गुरुश्च । षोडश गुरव इत्यर्थः । उत्तरार्द्धे दश नगणा लद्वयं च द्वात्रिंशल्लघव इत्यर्थः यत्र तच्छन्दः सौम्या । यथा "सौम्यैतस्याः किं बालाया नो जानीषे कष्टावस्थाम् । धरणितलविलुठनमलिनितकुचकलशमनुभवति तव विरहमिह किल" ४० ❀ व्यत्यये ज्योतिः ॥ यत्र पूर्वार्द्धे द्वात्रिंशल्लघव उत्तरार्द्धे षोडश गुरवस्तच्छन्दो ज्योतिः । यथा "परिहर बत परिचयमपि युवतिषु किमति नहि विसृजसि विषयसुखमिह । ज्योतीरूपं निष्कर्माणं कृत्वात्मानं मुक्तिं यायाः" ४१ एते द्वे अप्यनङ्गक्रीडेति जयदेवः । शिखेत्यहीन्द्रः । विषमवृत्तप्रकरणम् ॥

अथ मात्राछन्दांसि । ❀ ओजे षण्मात्रा लॅगन्ता युज्यष्टौ न युजि षट् सतन्तं ला न समः परेण गो वैतालीयम् ॥ ओजपादयोः षण्मात्रा लॅगन्ताः रगणलघुगुर्वॅवसानाः । युक्पादयोरष्टौ मात्रा लॅगन्ता एव यत्र तद्वैतालीयं नाम च्छन्दः । अपवादमाह । न युजोः पादयोः षड्लघवो निरन्तरा भवन्ति । न च समो लः सर्वपादेषु परेण सह गुरुर्भवति। यथा "अधुना भवदीय वैरिणामटवीकोटरचारिणां नृप । प्रतिभाति तृषान्धचेतसां वैतालीयरसः सुधोपमः" १ अत्रौजपादेऽष्टौ विकल्पाः । ऽऽऽ | ॥ऽऽ | ऽ॥ऽ | ॥ ॥ऽ | ऽऽ॥ | ॥ऽ॥ | ऽ॥॥ | ॥॥॥ | युक्पादे त्रयोदश । ऽऽऽऽ | ॥ऽऽऽ | ऽ॥ऽऽ | ॥॥ऽऽ | ऽऽ॥ऽ | ॥ऽ॥ऽ | ऽ॥॥ऽ | ऽऽऽ॥ | ॥ऽऽ॥ | ऽ॥ऽ॥ | ॥॥ऽ॥ | ऽऽ॥॥ | ॥ऽ॥॥ | अष्टभिस्त्रयोदशगुणिताश्चतुरुत्तरं शतं वैतालीयपूर्वार्द्धे भेदा भवन्ति । उत्तरार्द्धेऽपि तावन्त एव । अन्योन्यताडनायां जातानि दश सहस्राण्यष्टौ शतानि षोडशाधिकानि ❀ यॅान्ता ओपच्छन्दसकम् ॥ ओजे षण्मात्रा युज्यष्टौ यॅान्ता रगणयगणान्ताश्चेद्भवन्ति शेषं तु सर्वं वैतालीयसमं तदा ओपच्छन्दसकं नामच्छन्दः यथा "कीर्तिस्तव वल्लभा त्रिलोकीमखिलां पर्यटतीति यत्प्रबुद्धाः । कवयः कवयन्ति सत्यमेतन्नौपच्छन्दसका भवन्ति सन्तः" २ ❀ भगान्ता आपातलिका ॥ ओजे षण्मात्रा युज्यष्टौ भगणगुरुद्वयान्ताश्चेद्भवन्ति शेषं वैतालीयसमं तदा आपातलिकानामच्छन्दः । यथा "आपातलिका बत संपत्क्षणिकं प्राणितमप्यसुभाजाम् । इति मत्वा निश्चयपूर्वं, शाश्वतिकार्थे यत्नमुपाद्ध्वम् । आपातलिकाऽस्थिरा" ३ ❀ युजि तिसृभ्यो गः प्राच्यवृत्तिः ॥ युक्पादयोस्तिसृभ्यो मात्राभ्यः परो गुरुश्चेत्तदा प्राच्यवृत्तिश्छन्दः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aradhak Trust

ओजयोस्तु पूर्ववत् । सा च वैतालीयौपच्छन्दसकापातलिकोपाधिभेदात्त्रेधा । तत्र वैतालीयप्राच्यवृत्तिर्यथा "भुवने दधदेकवीरतां, त्यागधर्म्मकरुणापराक्रमैः । नृपसिंह पटच्चरीं निजप्राच्यवृत्तिमकरोः पुनर्नवाम्" ४ औपच्छन्दसकप्राच्यवृत्तिर्यथा "उदयाचलवप्रभागवल्गत्सप्तसप्तितुरगाङ्घ्रिताडनोत्था । नवपल्लवपाटला पुरस्ताद्धातुधूलिपटलीव भाति सन्ध्या" ५ आपातलिकाप्राच्यवृत्तिर्यथा "अलिमलिने व्योम्नि पतन्तो, रश्मयोऽभिनवशीतमरीचेः । दधति तुलामन्तरुदन्वत्सान्द्रविद्रुमलताविपिनानाम्" ६ अत्र चत्वारो विकल्पा यथा " | ऽ । ऽ । ऽ | ॥ । ऽ । ऽ | ऽ । ऽ ॥ । | ॥ । ऽ ॥ । | ते चौजपादविकल्पैरष्टभिराहता द्वात्रिंशत्पूर्वार्द्धविकल्पाः । उत्तरार्द्धेऽपि तावन्तोऽन्योऽन्यताडनायां दश शतानि चतुर्विंशत्यधिकानि । इयमुपपातलिकेत्येके ॐ अयुज्याद्यलाद्द्व उदीच्यवृत्तिः ॥ अयुक्पादयोराद्याल्लघोः परो गुरुश्चेत्तदा उदीच्यवृत्तिः । युजोस्तु पूर्ववत् । एषापि पूर्ववत्त्रिधा । तत्र वैतालीयोदीच्यवृत्तिः यथा "विवस्वतोदीच्यवृत्तिना मरुता दक्षिणवृत्तिना तथा । जनोऽयमिह जायते मधौ युगपत्तापतुपारभाजनम्" ७ औपच्छन्दसकोदीच्यवृत्तिर्यथा "भवद्गुणश्रुतेरमर्षाद्दशनैरोष्ठमखण्डयन्नृपा ये । महीश युधि चेटचिह्नमेते विदधत्यङ्गुलिखण्डनं त्वदग्रे" ८ आपातलिकोदीच्यवृत्तिर्यथा "विनम्रसुररत्नकिरीटरश्मिविमिश्रितपादनखांशुः । अगाधकरुणारससिन्धुः, पातु स वश्चरमो जिननाथः" ९ । अस्या अपि विकल्पौ द्वौ | । ऽ । ऽ | । ऽ ॥ । | युक्पादविकल्पैस्त्रयोदशभिराहतौ षड्विंशतिः पूर्वार्द्धभेदा । अपरार्द्धेऽपि तावन्तोऽन्योन्यताडनायां जातानि षट्शतानि षट्सप्तत्यधिकानि ॐ ते मिश्रे प्रवृत्तकम् ॥ ते प्राच्यवृत्त्युदीच्यवृत्ती मिश्रे सङ्कीर्णे प्रवृत्तकम् । युक्पादे मात्रात्रयात् गुरुरयुक्पादे आद्यलाद्गुरुरित्यर्थः । इदमपि वैतालीयादिभेदात्त्रेधा । तत्र वैतालीयप्रवृत्तकं यथा "प्रवृत्तकरिविद्रवं रथभ्रष्टनष्टसुभटं विवाजि च । द्विषां बलमजायत त्वयि क्ष्मापते क्षणं अधिज्यधन्वनि" १० औपच्छन्दसकप्रवृत्तकं यथा "पुरो दिनपतेरमुष्य सद्यः, पश्य संप्रति कठोरपादपातैः । स्फुटन्ति कमलाकराः समन्ताच्छीर्यंते च सहसा तमिस्रराशिः" ११ आपातलिकाप्रवृत्तकं यथा "भवच्चरणयोः प्रणयित्वं, यान्त्युः क्षितिभृतां न शिरांसि । क्षणाद्ददृशिरे युधि तानि, क्षुद्रगृध्रचरणप्रणयीनि" १२ अत्र प्रथमपादविकल्पाभ्यां द्वितीयपादविकल्पाश्चत्वारः आहता अष्टौ पूर्वार्द्धे विकल्पा । एवं उत्तरार्द्धेऽपि । अन्योऽन्यताडनायां चतुःषष्टिविकल्पाः ॐ वैतालीयादेर्युक्पादजापरान्तिका ॥ वैतालीयौपच्छन्दसकापातलिकातत्प्राच्यवृत्तीनां समपादैर्जनिताऽपरान्तिका । तत्र वैतालीयापरान्तिका यथा "दिशर्ती दुग्धपयोधिविभ्रमं, लवणाब्धेरिह रोधसि स्थिताः । श्रीसिद्धाधिप कीर्त्तिमुच्चकैस्तव गायन्त्यपरान्तिकाः स्त्रियः" १३ इयं वैतालीयदक्षिणान्तिकेत्येके । औपच्छन्दसकापरान्तिका यथा "श्रीचौलुक्य किमद्भुतं पपात व्योम्नो यत्त्वयि

दिव्यपुष्पवृष्टिः । प्राक्तस्मिन्नरिकुम्भिकुम्भभेदात्कीर्णा मौक्तिकपङ्क्तयस्त्वया हि" १४ इयमौपच्छन्दसकदक्षिणान्तिकेत्येके । आपातलिकापरान्तिका यथा "तरुणीवैषा दीपितकामा, विकसज्जातीपुष्पसुगन्धिः । उन्नतपीनपयोधरभारा प्रावृट् तनुते कस्य न हर्षम्" १५ इदं नलिनमित्येके । अत्र भेदत्रये प्रत्येकं प्रथमपादविकल्पैस्त्रयोदशभिर्द्वितीयपादविकल्पास्त्रयोदशाहताः एकोनसप्तत्यधिकं शतं पूर्वार्द्धे विकल्पाः । उत्तरार्द्धेऽपि तावन्तोऽन्योऽन्यताडनायां जातानि अष्टाविंशति सहस्राणि पञ्च शतानि एकषष्ट्यधिकानि । वैतालीयप्राच्यवृत्त्यपरान्तिका यथा "आगतोऽसि धूर्त्तापरान्तिकात्र व्यलीकवाचामिहास्पदम् । जतुरसोऽयमक्ष्णोस्तथाधरे कज्जलं च यत्ते विलोक्यते" १६ औपच्छन्दसकप्राच्यवृत्त्यपरान्तिका यथा "केवलस्य न गिरेर्यदङ्घ्रिपद्माङ्गुष्ठपीडनवशाच्छिरः सुमेरोः । कम्पितं दिविषदां च विस्मितानां पातु पश्चिमजिनः स वोऽद्भुतश्रीः" १७ आपातलिकाप्राच्यवृत्त्यपरान्तिका यथा "सुभग हे सरभसं सविलासैः प्रतिमुहुस्तरललोचनपातैः । सङ्गमोत्सवविधौ तव सत्यङ्कारमर्पयति पङ्कजनेत्रा" १८ इयमुत्पातलिकेत्येके । अत्रापि भेदत्रये प्रत्येकं प्रथमपादविकल्पैश्चतुर्भिर्द्वितीयपादविकल्पाश्चत्वार आहताः षोडश पूर्वार्द्धे । उत्तरार्द्धेऽपि तावन्तोऽन्योऽन्यताडनायां द्वेशते षट्पञ्चाशदधिके । ॐ

**ओजजा चारुहासिनी** ॥ वैतालीयादेर्विषमपादजाता चारुहासिनी । तत्र वैतालीयचारुहासिनी यथा "यदि सा बत **चारुहासिनी** किमु चन्द्रिकयाऽनया ततः । यदि सा च विलोललोचना किमु नीलसरोजिनीवनैः" २४ वैतालीयोत्तरान्तिकेत्येके । औपच्छन्दसकचारुहासिनी । यथा "ततिरिह गगने न तारकाणां, प्रतिदिशमुदिता विभाति किन्तु । सरभसमुपसर्पतः सुधांशोः, कीर्णः कुसुमाञ्जली रजन्या" २१ औपच्छन्दसकोत्तरान्तिकेत्येके । आपातलिकाचारुहासिनी यथा "भाति सुवदने तव भाले नवमलयजचित्रकलेखा । पद्मं जित्वा नयनाभ्यामुत्क्षिप्तेवेह पताका" २२ अवपातलिकेत्यन्ये । अत्र भेदत्रये प्रत्येकं प्रथमपादविकल्पैरष्टभिर्द्वितीयपादविकल्पा अष्टावाहताः चतुःषष्टिः पूर्वार्द्धे । अपरार्द्धेऽपि तावन्तोऽन्योऽन्यताडनायां चत्वारिंशच्छतानि षण्णवत्यधिकानि । वैतालीयोदीच्यवृत्तिचारुहासिनी यथा "हृदि प्रविष्टा मृगेक्षणा, तथा यथेहैव तस्थुषी । मनोभुवो निष्पतच्छरैर्निरन्तरैः कीलितेव सा" २३ औपच्छन्दसकोदीच्यवृत्तिचारुहासिनी यथा "विदग्धयूनां पतद्भिरेभिः स्खलद्गतिरिवायतैः कटाक्षैः । इयं सुजघनातिमन्दमन्दं, सखे वितनुते पदप्रपञ्चम्" २४ आपातलिकोदीच्यवृत्तिचारुहासिनी । यथा "विशालवंशादपि जातः सदा प्रकटयन्नतिमेकाम् । धनुःसदृशतां कलय त्वं, गुणाधिरोहोऽभिमतश्चेत्" २५ अत्रापि भेदत्रये प्रथमपादविकल्पाभ्यां द्वितीयपादविकल्पावाहतौ चत्वारः पूर्वार्द्धे । अपरार्द्धेऽपि तावन्तोऽन्योऽन्यताडनायां षोडश । ॐ **सर्वेष्वाद्यलाद्गो दक्षिणान्तिका** । वैतालीयादेर्यथासंभवं सर्वेषु पादेष्वाद्याल्लघोः परो गुरुश्चेद्भवति ।



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

तदा दक्षिणान्तिका। यथा "तुषारसंभारवेदनाभियेव हैमवतीं त्यजन् दिशम्। मयूखवानेष संप्रति, प्रयाति सरणिं दक्षिणान्तिकाम्" २६ एवमौपच्छन्दसकापातलिकयोरुदाहार्यम्। अत्र भेदत्रयेऽपि प्रत्येकं प्रथमपादविकल्पद्वयेन द्वितीयपादविकल्पाश्चत्वारो हताः अष्टौ पूर्वार्द्धे। अपरार्द्धेऽपि तावन्तः। अन्योन्यताडनायां चतुःषष्टिः। ॐ **ओजे चौ युजि षचौ लदलदान्तौ मागधी** ॥ विषमे चौ चतुर्मात्रौ द्वौ गणौ। लदलदान्तौ। समे षचौ षण्मात्रचतुर्मात्रौ च लदलदान्तौ। ते यत्र भवतः सा मागधी। लदलदान्ताविति ल इति लघुः द इति मात्राद्वयम् पुनर्लघुर्मात्राद्वयं चान्ते ययोस्तौ तथा। यथा "मधुसहचरीह पिकरमणी, नवसहकारविहारलालसा। त्रिजगज्जयिनो मनोभुवो, मङ्गलगीतौ भवति **मागधी**" २७ अत्र प्रथमपादे चौ पञ्चपञ्चभेदौ। ल एकभेदः। दो द्विभेदः। पुनर्ल एकभेदः। दो द्विभेदः। अन्योन्यताडने षष्ट्यधिकशतद्वयम्। अस्य प्रथमपादविकल्पैस्ताडने जातानि षड्विंशतिः सहस्राणि पूर्वार्द्धे विकल्पाः। अपरार्द्धेऽप्येवम्। अन्योन्यताडने जाताः सप्तषष्टिकोट्यः षष्टिलक्षाधिकाः ॐ **ओजजा पश्चिमान्तिका** ॥ मागधिकाया ओजपादेन जनिता पश्चिमान्तिका। यथा "उदयं लब्ध्वा महीतले, सन्तापकरः कथं भवान्। दिवसापगमेऽस्तकारिणी तरणे तव **पश्चिमान्तिका**" २८ अत्र प्रथमपादविकल्पशतेन द्वितीयपादविकल्पशतं ताडितं जातानि दश सहस्राणि पूर्वार्द्धे। अपरार्द्धेऽप्येवं। अन्योन्यताडनायां जाता दशकोट्यः ॐ **युग्जोपहासिनी** ॥ मागधिकायाः समपादैर्जनितोपहासिनी। यथा "वपुषेयं द्रुतहेमभासिनी लोचनलक्ष्म्याम्बुजविलासिनी। भ्रुवा मनसिजधनुःप्रकाशिनी, वदनरुचा **चन्द्रोपहासिनी**" २९। अत्र प्रथमपादविकल्पानां षष्ट्यधिकशतद्वयेन द्वितीयपादविकल्पास्तावन्त एवाहता जातानि सप्तषष्टिः सहस्राणि षट्शताधिकानि पूर्वार्द्धे। अपरार्द्धेऽप्येवम्। अन्योन्यताडनायां चत्वार्यब्जानि षट्पञ्चाशत् कोट्यः सप्तनवतिर्लक्षाः षष्टिः सहस्राणि ॥ **वैतालीयप्रकरणं त्रिंशत्** ॐ **अजमुखश्चीर्गन्तो नवमे ले मात्रासमकम्** ॥ न विद्यते जगणो मुखे यस्यासावजमुखः। चीरिति चत्वारश्चगणाः गुर्वन्ता। नवमे लघौ सति। मात्रासमकं। तत्राद्ये चगणे चत्वारो विकल्पाः। ऽऽ | ॥ऽ | ऽ॥ | ॥॥ | द्वितीये त्रयः। ऽऽ | ॥ऽ | ऽ॥ | मध्यगुरुसर्वलघुविकल्पौ तु विश्लोकेनापोदितत्वान्न भवतः। तृतीये एकः। ॥ऽ | नवमे ले इतिवचनादादिगुरुसर्वलघू न भवतः। मध्यगुरुसर्वलघू तु वानवासिकालक्षणेनापोदितत्वात्। चतुर्थे द्वौ ऽऽ | ॥ऽ | गन्तत्वाभिधानादन्यविकल्पानामप्राप्तिः। अन्योन्यताडनायां प्रतिपादं चतुर्विंशतिर्भेदाः। चतसृणां चतुर्विंशतीनामन्योन्यताडनायां जातं तिस्रो लक्षा एकत्रिंशत् सहस्राः सप्त शतानि षट्सप्तत्यधिकानि। यथा "अद्यापि मधुः शिशुरेवायं नो सज्जशरः कुसुमास्त्रोऽपि। मा त्रासमुपाश्रय धीरास्व भावी क्षणतः प्रयतः सोऽपि"

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

३० ❀ ग्युपचित्रा ॥ अजमुखश्रीर्गन्तो नवमे गुरावुपचित्रा । अस्यां तृतीये चे द्वौ विकल्पौ ऽ ऽ | ऽ ॥ अन्ये च गणविकल्पाः प्राग्वत् । अन्योन्यताडनायां प्रतिपादमष्टाचत्वारिंशद्भेदाः । प्राग्वदन्योन्यताडनायां त्रिपञ्चाशल्लक्षाश्चतुरशीतिः शतानि षोडशोत्तराणि यथा "शङ्खक्षोदरुचा तव कीर्त्या, लोकानां च त्वय्यनुरागैः । कृष्णैश्चापयशोभिर्द्विपतां दिशि दिशि जाता भूरुपचित्रा" ३१ ❀ लौ पञ्चमाष्टमौ विश्लोकः यस्य पादे पञ्चमाष्टमौ लघू भवतः, स विश्लोकः । अत्राद्ये चे चत्वारो विकल्पाः | ऽ ऽ | ॥ ऽ | ऽ ॥ | ॥ ॥ | द्वितीये द्वौ । ऽ । | ॥ ॥ | तृतीये द्वौ ऽ ऽ | ऽ ॥ | गुरुमध्यगुर्वन्तसर्वलघुगणत्रयं तु चित्रयापोदितम् । चतुर्थे गुर्वन्तं गणद्वयमेव ऽ ऽ | ॥ ऽ | अन्योन्यताडनायां प्रतिपादं द्वात्रिंशद्भेदाः प्राग्वदन्योन्यताडनायां दश लक्षा अष्टाचत्वारिंशत्सहस्राः पञ्च शतानि षट्सप्तत्यधिकानि । यथा "यस्य न कुलमपि यो विश्लोकः, स्फुरति च मनसि न यस्य विवेकः । येन न गुणविषये निहिता धीर्जीवन्नपि स पुमानवसन्नः" ३२ ❀ नवमश्च चित्रा ॥ नवमो लघुश्चकारात् पञ्चमाष्टमौ च यत्र भवतः सा चित्रा । आद्ये चे विकल्पाश्चत्वारः ऽ ऽ | ॥ ऽ | ऽ ॥ | ॥ ॥ | द्वितीये द्वौ । ऽ । | ॥ ॥ | तृतीये त्रयः ॥ ऽ | ॥ ऽ | ॥ ॥ | चतुर्थे द्वौ ऽ ऽ | ॥ ऽ | अन्योन्यताडनायां प्रतिपादमष्टाचत्वारिंशद्भेदाः । प्राग्वदन्योन्यताडनायामुपचित्रातुल्यासंख्या यथा "नित्यं प्रतिगृहमपि विस्फूर्जद्विद्रुममरकतकनकमयूखैः । चित्रा नृप तव पुरि भवति द्यौः, प्रकटितबहुविधसुरधन्वेव" ३३ ❀ द्वादशश्च वानवासिका ॥ द्वादशश्चकारान्नवमश्च यत्र लघुर्भवति सा वानवासिका । अत्राद्ये चे चत्वारः ऽ ऽ | ॥ ऽ | ऽ ॥ | ॥ ॥ | द्वितीये त्रयः ऽ ऽ | ॥ ऽ | ऽ ॥ | तृतीये द्वौ । ऽ । | ॥ ॥ | चतुर्थे द्वौ ऽ ऽ | ॥ ऽ | अन्योन्यताडनायां प्रतिपादमष्टाचत्वारिंशत् । अन्योन्यताडनायां सैव संख्या । यथा "सौरभपाण्डिममहिमविशेषान्नागरखण्डाधिकप्रमोदम् । दधदधुना भूप गीयते ते चारु यशो वानवासिकाभिः" ३४ ❀ एभिः पादाकुलकम् ॥ एभिर्मात्रासमादिपादै रचितं पादाकुलकं तच्च द्विकत्रिकचतुष्कसंयोगभेदात्पञ्चषष्टिभेदम् । तत्र द्विकसंयोगे मात्रासमकस्य त्रयः पादा उपचित्राचतुष्टयस्यैकैक इति चत्वारो भेदाः । उपचित्रायास्त्रयः पादा मात्रासमकादिचतुष्टयस्यैकैक इति चत्वारः । विश्लोकस्य त्रयः पादा मात्रासमकादिचतुष्टयस्यैकैक इति चत्वारः । चित्रायाः त्रयः पादा मात्रासमकादिचतुष्टयस्यैकैक इति चत्वारः । तथा वानवासिकायास्त्रयः पादा मात्रासमकादिचतुष्टयस्यैकैक इति चत्वारः । मात्रासमकस्य द्वौ पादौ उपचित्राया विश्लोकस्य चित्राया वानवासिकायाश्च प्रत्येकं द्वाविति भेदाश्चत्वारः । मात्रासमकं हित्वा उपचित्राया द्वौ पादौ विश्लोकस्य चित्राया वानवासिकायाश्च प्रत्येकं द्वाविति त्रयो भेदाः । मात्रासमकमुपचित्रां च हित्वा विश्लोकस्य द्वौ पादौ चित्राया वानवासिकायाश्च प्रत्येकं द्वाविति-

॥ २५ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

द्वौ भेदौ । मात्रासमकमुपचित्रां विश्लोकं च हित्वा चित्राया द्वौ पादौ वानवासिकायाश्च द्वावित्यकः एवं त्रिंशत् त्रिकसंयोगे मात्रासमकस्य द्वौ पादौ उपचित्राविश्लोकयोरुपचित्राचित्रयोरुपचित्रावानवासिकयोर्विश्लोकचित्रयोर्विश्लोकवानवासिकयोश्चित्रावानवासिकयोश्च प्रत्येकं द्वाविति पड्भेदाः । उपचित्राया द्वौ पादौ मात्रासमकविश्लोकयोर्मात्रासमकचित्रयोर्मात्रासमकवानवासिकयोर्विश्लोकचित्रयोर्विश्लोकवानवासिकयोश्चित्रावानवासिकयोः प्रत्येकं द्वाविति पड्भेदाः । तथा विश्लोकस्य द्वौ पादौ मात्रासमकोपचित्रयोर्मात्रासमकवानवासिकयोरुपचित्राचित्रयोरुपचित्रावानवासिकयोश्चित्रावानवासिकयोश्च प्रत्येकं द्वाविति पड्भेदाः । चित्राया द्वौ पादौ मात्रासमकोपचित्रयोर्मात्रासमकविश्लोकयोर्मात्रासमकवानवासिकयोरुपचित्राविश्लोकयोरुपचित्रावानवासिकयोर्विश्लोकवानवासिकयोश्च प्रत्येकं द्वाविति पड्भेदाः । तथा वानवासिकाया द्वौ पादौ मात्रासमकोपचित्रयोर्मात्रासमकविश्लोकयोर्मात्रासमकचित्रयोरुपचित्राविश्लोकयोरुपचित्राचित्रयोर्विश्लोकचित्रयोश्च प्रत्येकं द्वाविति पड्भेदाः । एवं त्रिंशत् । चतुष्कसंयोगे एकैकपरिहारेण पञ्च । सर्वे मिलिताः पञ्चषष्टिः । द्विजातिजा विकल्पाः स्युस्त्रिंशत्त्रिंशत्रिजातिजाः । चतुर्जातिभवाः पञ्च पञ्चषष्टिरितीरिताः॥ १॥ इति संग्रहश्लोकः एषां च पञ्चषष्टेर्भेदानां मध्यात् मात्रासमकस्य त्रयः पादाः एक उपचित्राया इत्येवंरूपस्य प्रथमभेदस्य संख्या यथा मात्रासमकपादत्रयभेदानां तिसृणां चतुर्विंशतीनामुपचित्रैकपादभेदानां चाष्टाचत्वारिंशतोऽन्योन्याभ्यासे जाताः पड्लक्षाः त्रिषष्टिः सहस्राणि पञ्च शतानि द्विपञ्चाशदधिकानि । प्रथमभेदस्य च लोष्टसंचारक्रमेण चातुर्विध्यं । स्थापना । ततश्चतुर्भिर्गुणने जाताः पड्विंशतिर्लक्षाः चतुःपञ्चाशत्सहस्रा द्वे शते अष्टोत्तरे एवं द्वितीयादिभेदेष्वप्यूह्यम् । तत्र मात्रासमकस्य त्रिभिः पादैरुपचित्रायाश्चैकेन पादाकुलकं यथा "शशधरपादाकुलके गगने कोकिलनादैर्मुखरे च वने । मदने च जगज्जयनैकाग्रे पान्थ कथं गन्ता तदिहाग्रे" ३५ मात्रासमकस्य पादद्वयेन उपचित्राया एकेन विश्लोकस्य चैकेन यथा "जयिनि दिगन्ताद्भवति प्राप्ते पौरस्त्रैणं त्वरितं नृपते । विचरति सद्यः पादाकुलकं मलयानिल इव भृङ्गीकुलकम्" ३६ मात्रासमकोपचित्राचित्रावानवासिकापादैर्यथा "वन्दितपादाकुलकैर्युसदामनुपममहिमश्रीधाम सदा । सा वो वितरतु शिवमाकल्पं भारत्यनुदिनमसममनल्पम्" ३७ भाषान्तरेष्वपि यथा "चंदुज्जोओ चन्दणलेवो कुवलयसेज्जा कमलुक्खेवो । दाहिणमारुअओ कप्पूरं अहिअं विरहे डहइ सरीरं" ३८ एवमन्यदप्युदाहार्यं । अथवा । एभिरिति वैतालीयादिभिः पादाकुलकं । अयमर्थः । एक पादो वैतालीयस्यापर औपच्छन्दसकादेर्मात्रासमादेर्वा । यद्वा एक औपच्छन्दसकादेरपरो मात्रासमादेर्यद्वैको मात्रासमस्यापर उपचित्रादेः पाद इत्यादि । तदापि पादाकुलकम् ❀ चो गीर्नटचरणं जैः ॥ चगणो गुरुचतुष्टयं च

| | | | |
|---|---|---|---|
| मा | मा | मा | उ |
| मा | मा | उ | मा |
| मा | उ | मा | मा |
| उ | मा | मा | मा |

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

जैरित्यष्टभिर्मात्राभिर्यतिः यथा "कर्मविशेषाद्दिव्यो मर्त्त्यस्तिर्यङ्नृपः । इह भवनाब्धेर्जन्तुर्नटचरणं ही धत्ते" ३९ इह चः पञ्चविकल्पो गीस्त्वेकविकल्प इत्यन्योन्याघाते पञ्चैव प्रतिपादं । तेषामन्योन्यताडनायां षट् शतानि पञ्चविंशत्यधिकानि । ❀ चौ गौ चौ गौ नृत्तगतिष्ठैः ॥ द्वौ चतुर्मात्रौ गुरुद्वयं च । ठैरिति द्वादशभिर्यतिः यथा "अधुना ध्वनति गभीरं मेघमृदङ्गे चन्द्र्यां तडिति पुरस्ताच्चित्रपदायाम् । इह किमपि नीलकण्ठः प्रमुदितचित्तो, गीतगतिं तनुतेऽसौ नृत्तगतिं च" ४० अत्र प्रथमे चगणे पञ्च भेदाः द्वितीयेऽपि । तृतीये एकः । चतुर्थे पञ्च । पञ्चमे एकः । अन्योन्यघाते पञ्चविंशत्यधिकं शतं प्रतिपादं भावादन्योन्यताडनायां चतुर्विंशतिः कोट्यः एकचत्वारिंशल्लक्षाः चत्वारिंशत्सहस्राः षट् शतानि पञ्चविंशत्यधिकानि । ❀ चीनौंजे जो जो लीर्वान्तेऽनुप्रासे पद्धतिः ॥ चगणचतुष्टयं । पादान्तेऽनुप्रासे सति पद्धतिः पद्धटिकेत्यन्ये । अस्यापवादः नात्र विषमे जगणः, पादान्ते च जगणो लघुचतुष्टयं वा यथा "छत्रायमाणधरणोरगेन्द्र पार्श्वजिनेन्द्र स्मरमृगमृगेन्द्र । दर्शय दीर्णदुरिततिमिरनिकर सत्पद्धतिमास्यजितरजनिकर" ४१ यथा वा धनपालस्य "नतसुरकिरीटसङ्घृष्टचरण जय भवगतिभीतजनैकशरण । चपलाक्षशकुनिसंयमनपाश जय विदितजगत्स्थितिसर्गनाश" ❀ अपभ्रंशे चास्या भूयसा प्रयोगो यथा "उन्निद्दकमलदलदीहरच्छु कञ्चणकवाडदढवियडवच्छु । सुरवइकरिन्दकरसरलवाहु एक्कंगिणअरिवलु वरइ नाहु" इत्यादि । अत्राद्ये चे चत्वारो विकल्पाः । द्वितीये पञ्च । तृतीये चत्वारः । चतुर्थे द्वौ । अन्योन्यघाते षष्ट्यधिकं शतं । प्रतिपादं तेषां भावादन्योन्यताडनायां पञ्चषष्टिः कोट्यस्त्रिपञ्चाशल्लक्षाः षष्टिः सहस्राणि भवन्ति । **मात्रासमकादिप्रकरणं नवभिः ॥**

**इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोनुशासनवृत्तावर्द्धसमविषमवैतालीयमात्रासमकादिव्यावर्णनस्तृतीयोऽध्यायः ॥**

**चृगौ षष्ठो जो न्लौ वा पूर्वेऽर्द्धे परे षष्ठो आर्या गाथा ॥** नौंजे ज इति वर्त्तते । चृगौ चगणसप्तकं गुरुश्चार्द्धे यस्याः सा आर्या । अत्रापवादः । पूर्वेऽर्द्धे षष्ठो जगणो न्लौ वा । परेऽर्द्धे षष्ठो गणो लघुः कार्यः । अर्द्धग्रहणादार्यादिषु पादव्यवस्था नास्ति । तेन द्वीपादन्यस्मादपीत्यादौ गणत्रयस्यान्ते लघोर्गुरुत्वं न भवति । आर्यैव संस्कृतेतरभाषासु गाथासंज्ञेति गाथाग्रहणम् । अत्र पूर्वार्द्धे प्रथमे चे विकल्पाश्चत्वारः यथा । ऽऽ | ॥ऽ | ऽ॥ | ॥॥ | द्वितीये पञ्च ऽऽ | ॥ऽ | । ऽ । | ऽ॥ | ॥॥ | तृतीये चत्वारः ऽऽ | ॥ऽ | ऽ॥ | ॥॥ | चतुर्थे पञ्च ऽऽ | ॥ऽ | । ऽ । | ऽ॥ | ॥॥ | पञ्चमे चत्वारः ऽऽ | ॥ऽ | ऽ॥ | ॥॥ | षष्ठे द्वौ । ऽ । | ॥॥ | सप्तमे

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

चत्वारः ऽ ऽ | ॥ ऽ | ऽ ॥ | ॥ ॥ | अष्टमे गुरुरेक एव। अन्योन्यताडनायां द्वादश सहस्राण्यष्टौ शतानि । एवं अपरार्द्धेऽपि । नवरं षष्ठे लघुन्येकस्मिन्नेक एव विकल्पः । अन्योन्यताडनायां षट् सहस्राणि चत्वारि शतानि । उभयदलविकल्पताडनायां अष्टौ कोटयः एकोनविंशतिर्लक्षाः विंशति सहस्राणि। यदाह। "जगणविहीना विषमे चत्वारः पञ्च युजि चतुर्मात्राः। द्वौ षष्ठाविति चगणास्तज्जाता प्रथमदलसंख्या ॥ १ ॥ एवमपरार्द्धसंख्या षष्ठे स्यात् लघुनि चैकस्मिन् । आर्यासंख्योभयदलसंख्याघाताद्विनिर्दिष्टा" ॥ २ ॥ आर्या यथा "उपदिश्यते तव हितं यदि वाञ्छसि कुशलमात्मनो नित्यम्। मा जातु दुर्जनजनेष्वार्याचरितं प्रपद्यस्व" १ प्राकृते यथा "कलसभवतवस्सिचुलुअपूरणमेत्ते वि मुणिअमज्झाण। जलहीण कहं सरिसा सया अगाहा महप्पाणो" २ पैशाचिके यथा "पनमध पनयपकुप्पितगोलीचलनग्गलग्गपतिविंबं। तससु नखतप्पनेसुं एकातसतनुधलं लुद्दं" ३ एवमन्यभाषास्वप्युदाहार्यं। आर्याया वक्तव्यान्तरमाह। ॐ षष्ठे न्ले लाद्द्वितीयात्सप्तमे चाद्यात्पदमन्यार्द्धे च पञ्चमे ॥ पूर्वार्द्धे षष्ठे गणे न्ले सति द्वितीयाल्लादारभ्य पदं भवति षष्ठन्लगणस्य प्रथमे ले यतिरित्यर्थः। तथा सप्तमे न्ले आद्याल्लादारभ्य पदं भवति षष्ठगणान्ते यतिरित्यर्थः । अन्यार्द्धे द्वितीयेऽर्द्धे पञ्चमे न्ले सत्याद्याल्लात्पदम् चतुर्थगणान्ते यतिरित्यर्थः । यथा "चतुरम्बुराशिमुद्रितभूभारोद्धारचतुरभुजपरिघः । एकाङ्गवीरतिलकः श्रीमानिह जयति सिद्धेशः" ४ आर्याविशेषानाह । ॐ आद्यत्रियतिः पथ्या ॥ यस्यां द्वयोरप्यर्द्धयोराद्यत्रये चगणत्रये यतिर्भवति सा पथ्या यथा "नेपथ्यानि निरस्यति संत्रस्यति मत्तकोकिलानादात् । निन्दति चेन्दुमयूखांस्त्वद्विरहे नः सखी सुभगा" ५ ॐ विपुलान्याद्यन्तसर्वभेदात्त्रिधा ॥ अन्या, द्वयोरर्द्धयोराद्यत्रियतिरहिता विपुला । सा चाद्यन्तसर्वभेदात्त्रेधा । पूर्वार्द्धे चगणत्रययतिरहिता आदिविपुला मुखविपुलेत्यर्थः। अपरार्द्धेऽन्तविपुला जघनविपुलेत्यर्थः । द्वयोरप्यर्द्धयोः सर्वविपुला महाविपुलेत्यर्थः। यथा "मुखविपुला पर्यन्ते च लघीयांसो भवन्ति नीचानां । वर्षासु ग्रामपयःप्रवाहवेगा इव स्नेहाः" ६ "नाभीनिम्ना कुचतटतुङ्गा जघनविपुलाथ मध्यकृशा । भ्रूकुटिलाशयसरला च मानसं हरति सा बाला" ७ "शस्त्राभ्यासे रतिवल्लभस्य मन्ये खल्लूरिका रम्या । तव कमलदलाक्षि नितम्बभूमिरेषा महाविपुला" ८ ॐ ग्मध्ये द्वितीयतुर्यौ जौ चपला ॥ गुर्वोर्मध्ये द्वितीयतुर्यौ जगणौ यस्यां सा चपला । सा चाद्यन्तसर्वभेदात्त्रेधा । तत्र पूर्वार्द्धे आदिचपला मुखचपलेत्यर्थः । अपरार्द्धेऽन्तचपला जघनचपलेत्यर्थः। द्वयोरप्यर्द्धयोः सर्वचपला महाचपलेत्यर्थः। तत्र पूर्वार्द्धे प्रथमे चे द्वौ विकल्पौ ऽ ऽ | ऽ ॥ | द्वितीये एकः । ऽ । | तृतीयेप्येकः ऽ ऽ | चतुर्थेप्येकः । ऽ । | पञ्चमे द्वौ ऽ ऽ | ऽ ॥ | षष्ठेऽपि द्वौ । ऽ । | ॥ ॥ | सप्तमे चत्वारः ऽ ऽ | ॥ ऽ | ऽ ॥ | ॥ ॥ |

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

अष्टमे गुरुरेव । अन्योन्यताडनायां द्वात्रिंशत् । अपरार्द्ध षष्ठस्य लघोरेकत्वात् षोडशैव । उभयार्द्धताडनायां पञ्च शतानि द्वादशोत्तराणि सर्वचपलाविकल्पाः । मुखचपलायां पूर्वार्द्धविकल्पैर्द्वात्रिंशतापरार्द्धचतुःषष्टिशतविकल्पानां ताडने द्वे लक्षे अष्टाचत्वारिंशच्छतानि । जघनचपलायां चापरार्द्धविकल्पैः षोडशभिः पूर्वार्द्धविकल्पानामष्टशताधिकद्वादशसहस्रसंख्यानां ताडने तावन्त एव विकल्पाः । तत्र पथ्यापूर्विका मुखचपला यथा "एकोपि बालचूतः शिखोद्गमैरभिनवैर्मनो दहति । एतत्पुनरधिकं सखि कलकण्ठी तत्र मुखचपला" ८ आदिविपुलापूर्विका मुखचपला यथा "मृदुवाच्य एष नैणाक्षि वल्लभस्ते शठोऽन्यविवशमनाः । तर्जय परुषैर्वचनैर्मुखचपलानामयं विषयः" ९ अन्तविपुलापूर्विका मुखचपला यथा "दयितस्तवानुनीतो मया सखि त्वां किलानुनेष्यति सः । तं पादानतमालोक्य मा कटु ब्रूहि मुखचपले" १० एवं सर्वविपुलापूर्विकायां मुखचपलायामुदाहार्यम् । पथ्यापूर्विका जघनचपला यथा "तस्या नितान्तचपलान्नेत्रविलासान्विलोक्य बालायाः । को वर्णयेदमुग्धः कुरङ्गिकादृष्टिललितानि" ११ अन्तविपुलापूर्विका जघनचपला यथा "उद्दाममारुतहतध्वजघनचपलानि जीवितव्यानि । जानन् जनः कथं नाम जातुचित्प्रीयते तत्र" १२ महाविपुलापूर्विका जघनचपला यथा "कस्य कृते कृतपुण्यस्य, दृष्टिरियमनिमिषास्त्वया ध्रियते । यासीत् पुरा कुरङ्गाक्षि नित्यमत्यन्तचपलैव" १३ एवं मुखविपुलापूर्विका जघनचपलोदाहार्या । पथ्यापूर्विका महाचपला यथा "चपलं न कस्य चेतो, नरस्य जायेत पश्यतस्तन्वीम् । नृत्यत्क्षणेऽत्र नव्याङ्गहारलीलामहाचपलाम्" १४ महाविपुलापूर्विका महाचपला । यथा "युगपत्प्रफुल्लकङ्केल्लिमल्लिकां बकुलचम्पकान् दृष्ट्वा । जाता मधूत्सवे षट्पदावलीयं महाचपला" १५ एवं मुखविपुलापूर्विका जघनविपुलापूर्विका च महाचपलोदाहार्या । एवं गाथाप्युदाहार्या । एवं पथ्याभेदेनैकेन विपुलाभेदैस्त्रिभिश्चपलाभेदैर्द्वादशभिः षोडशभेदाः । केचित्तु लघुत्रयादारभ्य द्विद्विलघुवृद्ध्या कमलादीन् षड्विंशतिभेदानाहुः । यथा "कमला ललिया सीला जुण्हा रंभा य मागही लच्छी । विज्जा माला हंसी ससिलेहा जण्हवी सुद्धा ॥ १ ॥ काली कमली मेहा सिद्धी रिद्धी अ कुम्भई धरणी । जक्खी वीणा बंभी गंधव्वी मंजरी गोरी ॥ २ ॥ कमला तिहि लहुएहिं, ललिआ पंचेहिं एवमाईओ । बिहिं बिहिं वड्ढंतेहिं, कमेण सेसाओ जाअन्ति ॥ ३ ॥" एतच्च गाथाप्रस्तारेष्वन्तभूतमिति न पृथग्लक्ष्यते । न च सर्वे प्रस्तारभेदाः शक्या उपदर्शयितुमित्यास्तामेतत् । ॐ द्विः पूर्वार्द्धे गीतिः ॥ द्वौ वारौ पूर्वार्द्धलक्षणं यस्यामार्यायां सा गीतिः । सा च एकः पथ्यायाः त्रयो विपुलाया द्वादश चपलाया विकल्पा इति षोडशधा । अत्र पूर्वार्द्धे द्वादश सहस्राण्यष्टौ शतानि विकल्पाः । अपरार्द्धेऽपि तावन्तोऽन्योन्यताडनायां षोडश कोट्योऽष्टात्रिंशत् लक्षाश्चत्वारिंशत् सहस्राः विकल्पाः पथ्यागीतौ भवन्ति ।

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

विपुलागीतावपि त एव । सर्वचपलागीतौ पूर्वार्द्धे द्वात्रिंशद्विकल्पाः । अपरार्द्धेऽपि तावन्तः । अन्योऽन्यताडनायां चतुर्विंशत्यधिकानि दश शतानि । मुखचपलागीतौ पूर्वार्द्धे द्वात्रिंशद्विकल्पाः । अपरार्द्धे द्वादश सहस्राण्यष्टशताधिकानि । अन्योऽन्यताडनायां चतस्रो लक्षाः षण्णवतिः शतानि । जघनचपलायामप्येतावन्त एव । तत्र पथ्यागीतिर्यथा "विरचितकुसुमाभरणा तन्वाना गीतिमलिकुलनिनादैः । अभ्यागच्छति चैत्रे वासकसज्जेव संप्रति वनश्रीः" १६ महाविपुलागीतिर्यथा "मत्तद्विरेफ पुंस्कोकिल वैतालिक महाविपुलगीत्या । क्रियते निर्भरमुन्निद्र एष यूनां मनःसु मनसिशयः" १७ पथ्यामहाचपलागीतिर्यथा "यावल्लुनामि चूताङ्कुरान्पुरोऽस्या मधुं व्यपह्नोतुम् । तावद्बभूव गीतिः पिकाङ्गनानां प्रमोदचपलानाम्" १८ महाविपुलामहाचपलागीतिर्यथा "कष्टाञ्जनस्त्वदालोकनादपि क्षणमिमां दशां लभते । विपुलां तनोपि दीर्वाक्षि गीतिमेतां कुतो महाचपले" १९ एवं शेषभेदेषु द्वादशस्वप्युदाहार्यम् । ❀ परार्द्धमुपगीतिः ॥ द्विः परार्द्धं लक्षणं यत्र भवति सार्योपगीति । इयमपि पूर्ववत्षोडशभेदाः । तत्र पथ्योपगीतौ पूर्वार्द्धे चतुःषष्टिशतानि विकल्पाः । अपरार्द्धेपि तावन्तः । अन्योन्यताडनायां चतस्रः कोट्यो नव लक्षाः षष्टिः सहस्राणि । विपुलोपगीतावपि तावन्त एव । महाचपलोपगीतौ पूर्वार्द्धे षोडश । अपरार्द्धेपि तावन्तः । अन्योन्यताडनायां षट्पञ्चाशदधिके द्वे शते । मुखचपलोपगीतौ पूर्वार्द्धे षोडश विकल्पाः । अपरार्द्धे चतुःषष्टिः शतानि । अन्योन्यताडनायां लक्षमेकं चतुर्विंशतिः शतानि । जघनचपलोपगीतावपि तावन्त एव । तत्र पथ्योपगीतिर्यथा "उपगीति कुरङ्गशिशो मा गाः श्रुतिसुखलवस्पृहया । व्याधं किमिति न पश्यसि चापन्यस्तेषुमिह पुरतः" २० महाविपुलोपगीतिर्यथा "संप्रति शिलीमुखाः पश्य महाविपुलोपगीतिरवैः । सौख्यप्रसुप्तिकाः पङ्कजिनीः प्रीत्योपतिष्ठन्ते" २१ पथ्यामहाचपलोपगीतिर्यथा "उपगीतिगन्धरूपादि याति चेतो महाचपलम् । तेभ्यो निवर्त्तयैतत्समीहसे चेत्परां सिद्धिम्" २२ महाविपुलामहाचपलोपगीतिर्यथा । "चूताङ्कुराः स्मरास्त्राणि चापलात्कोकिलैर्लीढाः । विपुलोपगीतयोऽस्त्राणि तेनिरे ते न तैस्तस्य" २३ एवं शेषभेदेषु द्वादशस्वप्युदाहार्यम् । ❀ द्वयोर्व्यत्यये उद्गीतिः ॥ आर्यायाः द्वयोः पूर्वार्द्धपरार्द्धयोर्विपर्यये उद्गीतिः । इयमपि पूर्ववत् षोडशधा । पथ्यावच्च तदुद्गीतिषु विकल्पा वाच्याः । तत्र पथ्योद्गीतिर्यथा "वीरवरेण्य रणमुखे श्रुत्वा तव सिंहनादमिह । सपदि भवन्त्यरिकरिणो मधुव्रतोद्गीतिरिक्तगण्डतटाः" २४ महाविपुलोद्गीतिर्यथा "विपुलोद्गीतिः कलकोकिलारवैः पल्लवाताम्रा । मत्तेव पुरस्तरुपङ्क्तिरियं मधुपरिचयादितो भाति" २५ पथ्यामहाचपलोद्गीतिर्यथा । "चपले प्रयातु मानादयं वराकः किमाह्वयसि । प्रतिभूरमुष्य भूयः समागमे भाविनी पिकोद्गीतिः" २६ महाविपुलामहाचपलोद्गीतिर्यथा "बाला कुतोपि सारङ्गिकेव सा विपुलचपलाक्षी । श्रुत्वा

P. P. Ac. Gunratnasuriji M.S.                Jin Gun Aradhak Trust

तवाभिदोद्गीतिमाशु निष्यन्दिर्नी चिरं भवति" २७ एवं शेषेपु द्वादशसु भेदेष्वप्युदाहार्यम् । तत्रायं संग्रहः । एकैव भवति पथ्या तिस्रो विपुलास्ततश्चतस्रस्ताः । चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्या स्युः ॥ १ ॥ गीतीनां त्रयमित्थं प्रत्येकं षोडशप्रकारं स्यात् । साकल्येनार्याणाममी विकल्पाश्चतुःषष्टिः ॥ २ ॥ ॐ गीतिः सप्तमे षे रिपुच्छन्दाः ॥ गीतिरेव सप्तमे षे पञ्चमात्रे गणे रिपुच्छन्दा । अतः परं प्राकृतादौ छन्दसां भूम्ना प्रयोग इति तत्रैवोदाहरिष्यते । यथा "कैलाससैलतुलणामाणं मा वहसु संपयं द-समुह । उअह रिपुच्छन्दोलणतोलिज्जन्ते महोअहिम्मि गिरिणो" २८ अत्र षगणस्याष्टभेदत्वेऽपि नौजे ज इति जगणानुविद्ध-भेदद्वयवर्ज्जनात् षड्भेदाः । ततस्तेषां शेषगणविकल्पानां चान्योन्यताडनायां पूर्वार्द्धे जाता एकोनविंशतिः सहस्रा द्वे शते । तावद्भि-रेवोत्तरार्द्धविकल्पैर्घाते जाताः षट्त्रिंशत् कोटयः षडशीतिर्लक्षाश्चत्वारिंशत्सहस्राणि । ॐ तृतीये ललिता ॥ गीतिरेव तृतीये षे ललिता यथा "अंगुलिआहिं ललिअंगीपवासदिअहे गणन्तिआणुदिणम् । वल्लहआयड्ढणकए जव इव मंतक्खराइं एक्कमणा" २९ अत्र तृतीयषगणस्य षड्विकल्पत्वे प्राग्वत्तावन्त एव भेदाः । ॐ द्वाभ्यां भद्रिका ॥ गीतिरेव द्वाभ्यां सप्तमतृतीयषगणाभ्यां भद्रिका यथा "जुवईण नयणलच्छीए सहजसलोणत्तणेण भद्दिआए । चक्खुभएण व दिण्णयं लक्खिज्जइ कज्जलं वयंसिआहिं" ३० अत्र तृतीय-सप्तमगणयोः षट्षट्भेदास्ततस्तेषामन्यविकल्पानां चान्योन्यघाते जाताः अष्टाविंशतिः सहस्रा अष्टौ शतानि पूर्वार्द्धे । तेषां तावद्भिरेवोत्तरार्द्धविकल्पैर्घाते जाता व्यशीतिः कोटयश्चतुर्नवतिर्लक्षाश्चत्वारिंशत्सहस्राः । ॐ षष्ठं विनेष्टपैर्विचित्रा ॥ गीतिरेव षष्ठगणं विना यथेष्टं षगणैर्निबद्धा विचित्रा यथा "भासासु विचित्रासु जुगवं सुरनरतिरिआण जीवजाईण । संवादमणुहवंती जयइ वाणी भयवओ जिणिंदस्स" ३१ विचित्रभेदत्वादस्या विकल्पसंख्या नोक्ता केचित्सर्वैरपि षगणैरिच्छन्ति । ॐ चेऽष्टमे स्कन्धकम् ॥ गीति-रेवाष्टमस्य गुरोः स्थाने चगणे कृते स्कन्धकं आर्यागीतिरित्यहीन्द्रः । अत्र गीत्यर्द्धविकल्पानामष्टमचगणविकल्पपञ्चकेन ताडने जाता-श्चतुःषष्टिः सहस्राः पूर्वार्द्धे । तावद्भिरेवोत्तरार्द्धविकल्पैस्ताडने जातानि चत्वारिंशदर्बुदानि नव कोटयः षष्टिर्लक्षाणि । ४०९६०००००० । यथा "तुह रिउरायपुरेसुं तरुणीजणलालिअम्मि किंकेल्लिवणे । संपइ अरण्णमहिसाण खंधकं डूयणं पयट्टेइ दढं" ३२ केचित्तु लघुचतुष्टयादारभ्य लघुद्वयद्वयवृद्ध्या ब्रह्मादीनि स्कन्धकान्याहुः । यथा "बंभो हीरो कण्हो रामो चंदो पुरन्दरो मेरू । धम्मो सेलो भाणू जक्खो पण्हीअ मायंगो ॥ १ ॥ कालो हरी कुबेरो सालो सुवणो सुदंसणो खंदो । नीरं सिही सुवण्णो मेहो पंको अ कल्हारो ॥ २ ॥ हेरंबो नीणो वण्णे लहुभेएहिं सुहयनामाइं । एआइं साहिआइं पउणतीसाण खंधाणं ॥ ३ ॥ "चउलहुएहिं बंभो हीरो



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

छहिं अट्ठहिं तहा कण्हो। बिहिं बिहिं वट्टंतेहिं कमेण सेसाण नामाइं" एतच्च स्कन्धकप्रस्तारेष्वन्तर्भूतमिति न पृथक् लक्ष्यते। एवं भेदपरिकल्पने ह्यतिप्रसङ्गः स्यादिति । ❀ तत्षष्ठे ल्युपात् तत्स्कन्धकमर्द्धद्वयेपि षष्ठे गणे एकस्मिन्नेव लघौ सति उपात्परं स्कन्धकं उपस्कन्धकमित्यर्थः । यथा "उअ खंधाहइतुट्टंतबाहुदंडोवि कोवि सुहडओ । एसो सहि परजोहं पहरइ पाएण दढाहरओ" ३३ अत्र षष्ठस्य गणस्य लघुत्वेनैकत्वात्पूर्वार्द्धद्वात्रिंशत्सहस्रास्तावद्भिरेवापरार्द्धविकल्पैस्ताडने जातानि दशार्बुदानि द्वे कोटयौ चत्वारिंशल्लक्षाः । १० २४०००००० । ❀ आद्येर्द्धे उदः ॥ आद्येर्द्धे षष्ठे लि उदः परं स्कन्धकं उत्स्कन्धकमित्यर्थः। यथा "जा बलमडप्फरेणं निवाण उक्खन्धया आसि पुरा। सा तुह सासणभारं ताण वहंताण संपयं कहवि गया"३४ अत्र पूर्वार्द्धविकल्पानां द्वात्रिंशत्सहस्राणामपरार्द्धविकल्पैश्चतुःषष्टिसहस्रैर्घाते जातानि विंशतिरर्बुदानि चतस्रः कोटयोऽशीतिर्लक्षाः। २०४८०००००० । ❀ अन्त्येऽवात् ॥ अन्त्येर्द्धे षष्ठे लि अवात्परं स्कन्धकं अवस्कन्धकमित्यर्थः। यथा "पवणपहल्लिरपल्लवधयवडमुल्लसिअकोइलावंदिरवं। ओखन्धावारं चिअ पच्छ(त्थ)वणं रइवइनरिंदस्स" ३५ पूर्ववद्विकल्पाः। ❀ गीतिस्कन्धके सङ्कीर्णम् ॥ पूर्वार्द्धे स्कन्धकमपरार्द्धे गीतिः, यद्वा पूर्वार्द्धे गीतिरपरार्द्धे स्कन्धकमित्युभयथापि सङ्कीर्णं नाम स्कन्धकम्। यथा "जह जह तुह पहु सेन्नं किज्जइ संकिन्नयं मयगलघडाहिं । तह तह रिउरायघरेसु खलइ लच्छित्ति पेच्छ अच्छरिअं" ३६ "सा बाला तुह विरहे हियए संकिण्णए अमंताइं। नीसासधूमलहरीच्छलेण दुक्खाइं सुहय उव्वमइ फुडं" ३७ अत्र स्कन्धकार्द्धविकल्पानां गीत्यर्द्धविकल्पैर्घाते भङ्गद्वयेऽपि प्रत्येकं जाता एकाशीतिः कोटयो द्विनवतिर्लक्षाः। ८१९२०००० । ❀ गाथाद्यर्द्धेन्त्यगात् प्राक् चो वृद्धौ जातीफलम् गाथैव पूर्वार्द्धेन्त्याद्गुरोः प्राक् चगणस्य वृद्धौ जातीफलम् । उत्तरार्द्धं तु गाथाया एव। यथा "तुह रिउणो निवसन्तो अविरलजाईहलेसु जलहितडवणेसु। वणवाससुहसइण्हा न रज्जमीहंति सिविणेवि" ३८ ❀ चयोगाथः । गाथैव पूर्वार्द्धेन्त्यगात्प्राक् चगणद्वयस्य वृद्धौ गाथः। यथा "गौरीए चिहुरभारो जलगाहोत्तिन्निआइ निवडंतघोरबिंदूहिं । विअलिअपसूणमालाविरहदुहेणं रुएइ व्व" ३९ अत्राष्टमश्चगणः पञ्चभेदो । नवमो नौजे ज इति चतुर्भेदोन्योन्याहतौ विंशतिस्तथा आर्याविकल्पानां गुणने जातमञ्जमेकं त्रिषष्टिः कोट्यश्चतुरशीतिर्लक्षाः १६३८४००००० । एवमुद्गाथादिष्वपि । वर्द्धमानचगणद्वयविकल्पैर्विंशत्या पूर्वपूर्वविकल्पानां ताडने विकल्पसंख्या उन्नेयाः । ❀ क्रमवृद्ध्योद्यवसमुपात् ॥ गाथात्परं क्रमेण चगणद्वयवृद्ध्या उद् वि अव सम् उप परो गाथो भवति। उद्गाथ विगाथ अवगाथ सङ्गाथ उपगाथा इत्यर्थः। उद्गाथो यथा "सिरिवद्धमाणजिणवर उग्गाहंतो सुराहिवो तुज्झ अइसयसिरिं

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

परूढरोमञ्चो । अहिलसइ मुहसहस्सं ठाणे दिट्ठीसहस्सस्स" ४० विगाथो यथा "सिरिकुमरवालभूवइ अच्चब्भुअचरिअवण्णं तुज्झ जो किर करेउमिच्छइ कुसग्गतिक्खबुद्धी वि । बाहाहिं सो विगाहिउमिच्छइ रयणायरं सयलं" ४१ अवगाथो यथा "सो जयइ अजलट्ठाणं वायागुंफो पुराण सुकईण कोवि अन्नो च्चिअ सरिनाहो अकलिअमज्झो सयावि विबुहेहिं । जो अवगाहिज्जंतो निरन्तरं देइ अमयरसं" ४२ । संगाथो यथा "नहकोलस्स व दाढा तिक्खखुरुप्पं व जलणउत्तिण्णमणंगमहाभडस्स किंसुअवतंसउ व्व पुरहूअव-लहदिसाइ एत्ताहे । कणयपिसंगाहरिणंकलेहिआ सहइ उअयंती" ४३ । उपगाथो यथा "समरमहोअहिमुब्भडकरिमयरमुच्छलं-तरुहिरसलिलमसिवरदाढिआइ सहसत्ति मेइणिं उद्धरंतओ महिहराण आकंपणाइं विरयंतो । उअगाहइ चोलुक्कस्स आइकोलुव्व भुअदंडो" ४४ ॐ गाथिनी । उपगाथाच्चगणद्वयवृद्ध्या गाथिनी यथा "सिरिमूलरायभूवइकुलगयणमिअंक तिहुअणललाम जय-सिरिनिवास जसभरभरिअदिअंत रिउभडकयंतनिव कुमरवाल भणिमो अइगहिराइं कह तुज्झ चरिआइं । सयलगुणगाहिणी जस्स न किर चउवयणवाणीवि" ४५ ॐ यथेष्टं मालागाथः ॥ गाथिन्याः परं यथेष्टं चगणद्वयवृद्ध्या मालागाथो यथा "इह मालागाहाण व वयंस पेच्छसु नवंबुवाहाण गयणविउलसरवरम्मि विमुक्कघोरघोसाण विज्जुजीहाविहीसणाण बहलवारिनिचयपम(ण)च्चिराण अइदीह-गत्ताण । हद्धी गसइ मयंकं खेलंतं रायहंसं व" ४६ ॐ जातीफलाद्यर्द्धे गाथवद्दामादयः ॥ जातीफलस्य प्रथमेर्द्धेऽन्त्यगात् प्राक् क्रमेण चगणद्वयवृद्ध्या दामादयो भवन्ति गाथवदिति यथा गाथः केवल उद्यवसमुपात्परो मत्वर्थीयान्तो मालायाश्च पर उक्त-स्तथायमपि तत्र दामो यथा "जूहालववूहाओकड्डिअ चोलुक्कराइणा दरिअवेरिभूतमयगलाण । कंठे पाएसु तहा ओदीसइ घल्लिअं दाम" ४७ उद्दामो यथा "थालुक्क तुज्ज नयरी उद्दामसुरालयाण सिहरेसु पवणतरलेहिं दीहरधयवडकरोहिं । देइ चविलापहारं किल कलिणो ओअरंतस्स" ४८ विदामो यथा "सिरिकुमरवाल मुञ्चसि सरमालं जत्थ जत्थ सुहडम्मि तत्थ तत्थ अणुमग्गलग्गो सयंवरकए सहसत्ति । मेल्लइ सुरकुसुममयं सुरजुअइजणो विदाम नवं" ४९ अवदामो यथा "ओदामाइं रयंतीइ तीइ कामस्स पूयणनिमित्तमिह तुह समागमूसवं तद्दिअहमहिलसंतीए नवकुवलयच्छीए । कुसुमसमिद्धिविरहिअं उज्जाणं निम्मिअं सयलं" ५० संदामो यथा "अणुरयणिचंदकिरणप्फुसप्पसरंतचंदकंतसिलानीसंदामयरसासिंचिज्जमाणतरुतलनिसण्णरइकेलिखिन्नविज्जाहर-मिहुणो । जिणचरणरयपवित्तो रेहइ सिरिउज्जयंतगिरी" ५१ उपदामो यथा "सिरिमूलरायभूवइकुलगयणमयंक तुह दिसज-यम्मि दुद्धरतुरङ्गखुरपुडुरकायमेइणीबहलधूलिपडलेण पंकिलिज्जंतसायरसलिलसयणिज्जे । उअदामोअरमेण्हिं लच्छी अइदुक्करं रमइ"



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

५२ दामिनी यथा "सिरिसिद्धरायनंदण तुमयं आयंतमिक्खिउं झत्ति धाविरीए इमाइ पज्जाउलत्तवससिढिलवद्धगंठिल्हसिऊण रमणत्थलाउ चरणग्गएसु रईअघणावेढं मणिकंचिदाम निम्मिअगइखलणं दामिणी होइ" ५३ मालादामो यथा "हंहो जुआणय तुमं मा उज्जाणम्मि भमसु भुल्लोवि अन्नहा इत्थ फुल्लिअनवल्लमल्लिआवचयकोउअपरायणाण मयभिंभलाण कंदपविब्भमुब्भासिआण उपोढमहिलिआण । दूसहकडक्खमालादामिअहिअओ न नीहरसि" ५४

इदानीं मात्राछन्दसां गुरुलघुपरिज्ञानार्थमाह । ॐ मात्रा वर्णोना गा वर्णा गूना लः ॥ यस्य कस्यापि मात्राछन्दसो यावत्यो मात्रा भवन्ति ता वर्णोना अक्षरैरूना गुरवो ज्ञातव्याः । तथा वर्णा गुरुभिरूना लघवो ज्ञातव्याः । तत्रायमुपयोगः । यदा कश्चित्पृच्छति अष्टात्रिंशदक्षरायामार्यायां कति गुरवः कति वा लघव इति । तदा सप्तपंचाशति शास्त्रोपदिष्टायामार्यामात्रासंख्यायामष्टात्रिंशतं वर्णसंख्यामपनयेत्, अत्र येऽवशिष्यन्ते तान् गुरूनुपदिशेत् । ते चैकोनविंशतिः । वर्णेभ्यश्च गुरून्पातयित्वा शेषानेकोनविंशतिं लघूनुपदिशेत् । यथा "जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान् । विमलस्त्रासविरहितस्त्रिलोकचिन्तामणिर्वीरः" ५५ इति आर्याप्रकरणम् ।

ॐ पौ चौ तौ गलितकं यमितेऽङ्घ्रौ ॥ द्वौ पञ्चमात्रौ द्वौ चतुर्मात्रावेकस्त्रिमात्रो गणो गलितकं । अङ्घ्रौ पादे यमिते सति । तगणो यद्यपि वर्णगणोप्यस्ति, तथापि मात्रागणसमभिव्याहारादिह मात्रागणो गृह्यते । एवमन्यत्रापि यथा "गलिअंजणधवले वहइ नयणपंकए सुहय चयइ कालागुरुचंदणपंकए । सहीअण अप्पियं दलइ च्चिअ णिद्दयं, सा तुह विरहे मालइदाम विणिद्दयं" १ ॐ तृतीये षष्ठे ल्युपात् ॥ यमितेऽङ्घ्रौ तृतीये षष्ठे च लघुन्युपात् । उपगलितकमित्यर्थः । यथा "तुह विजयपयाणयभेरीरवडंवरम्, झत्ति णिसुणिऊण पडिरवमुहलिअंवरम् । सज्झसेण पकंपिरस्स हरिणो करओ, उअगलिअमिमं खु धणुहं धरए सरओ" २ ॐ समेऽन्तरात् ॥ समेऽङ्घ्रौ यमितेन्तरात् । अन्तरगलितकमित्यर्थः । यथा "उअ वयंस वित्थरिअमहूसवलच्छिअं, रणरणंतभसलावलिअं वणराइअं । कवलिअचिरपरूढमाणंसिणिमाणियं फुल्लवल्लिकुसुमंतरगलिअपराइअं" ३ अन्ये तु प्रथमचतुर्थयोः पादयोर्यमनेऽन्तरगलितकमाहुर्यथा "पत्तलच्छिसुहयं जणमोहपयासयं, गलिअनिद्दइन्दीवरपत्तसहोअरम् । सहइ तुज्झ एयं तं लोअणजुअलयं, पत्तलच्छि सुहयंजण मोहपयासयं" ४ ॐ पौ चौ पो वेः ॥ द्वौ पञ्चमात्रौ द्वौ चतुर्मात्रौ एकः पञ्चमात्रश्चेद्यमितेऽङ्घ्रौ वेर्गलितकं । विगलितकमित्यर्थः । यथा "उअ महुसमओ मिउफुरिअमलयपवमाणओ, विगलिअचिरपरूढमाणंसिणिजणमाणओ । कोइलाहिं

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

कयकलगीईहिं गिज्जमाणओ, वम्महस्स विजयम्मि सहाओ असमाणओ" ५ ॐ **चौ पः समः** ॥ द्वौ चतुर्मात्रौ पञ्चमात्रश्चैको यमितेऽङ्घ्रौ समः परं गलितकं । संगलितकमित्यर्थः । यथा "वणफलभरसंगलिअयं, जस्स य णिव्वुइदायय । तस्स सया वणवासिणो, किं वण्णामि महेसिणो" ६ ॐ **षतीगाः शुभात्** ॥ एकः पण्मात्रः चत्वारस्त्रिमात्रा गुरुश्च यमितेऽङ्घ्रौ शुभात् गलितकम् । शुभगलितकमित्यर्थः । यथा "पुणरवि निअरज्जसिग्गिमुहगलिआसया, पव्वयकंदरेसु निवसंतया सया । पहु तुह रिउणो धरंतया मुणिव्वयं, पुणो पुणो वि हु उवालहंति दिव्वयं" ७ ॐ **चः पौ चौ त्रिः समात्** ॥ एकश्चतुर्मात्रो द्वौ पंचमात्रौ द्वौ चतुर्मात्रौ एकस्त्रिमात्रोऽङ्घ्रौ यमिते समात् गलितकम् । समगलितकमित्यर्थः । यथा "दुद्धरवारिवुड्ढिघोरा चलविज्जुलभीसणा, सेलगुहंतरालपडिसद्दियदुगुणिअनीसणा । जाव समुत्थरंति मेहा पिहिअंबरदेसया, पढिआ ताव हुंति जंवूफलसमगलिआसया" ८ ॐ **तदोजे चतौ मुखात्** ॥ तदेव समगलितकमोजपादयोः चगणतगणौ चेत्तदा मुखाद्गलितकम् । मुखगलितकमित्यर्थः । यथा "सयवत्तयं, मुहगलिअमहुकरसुरहिअजलमलिसयवत्तयं । तगणं गओ चावम्मि ठवेविणु कस्स व न हु हंत मणं गओ" ९ ॐ **षाच्चृनौजे जः समे जो लीर्वा मालायाः** ॥ पण्मात्राद्गणात् परे दश चगणा, न विपमे जः । समे जो लघुचतुष्टयं वा यमितेऽङ्घ्रौ मालाया गलितकम् । मालागलितकमित्यर्थः । यथा "खेलिरकामिणीकराहयअविरलविअसिअजलरुहमालागलिअपरायसुरहिअसलिलयं, तरलतरङ्गरङ्गपरिनच्चिरकलहंसमिहुणावलिसरहसकिज्जमाणकलयलकलिलयम् । अब्भंलिहतडपरिरूढबहलबउलतिलयतमालतालीवणपडिहयखरदिणयरकरयं, पिच्छ सरोवरं इममणारयं पि विज्जाहरसुरवरकिन्नराण एवं विलासहरयं" १० ॐ **चृर्गन्तो मुग्धात्** । पगणात्परे अष्टौ चगणा गुर्वन्ताः । नौजे जः समे जो लीर्वा यमितेऽङ्घ्रौ । मुग्धात् गलितकं मुग्धगलितकमित्यर्थः । चृ इत्यस्य गन्तत्वेन विशेषणादन्त्यश्चगणो गुर्वन्तो लभ्यते । नतु पृथगेव गुरुः । अन्यथा चृगाविति कुर्यात् । यथा "नमिरसुरासुरिंदसिररयणमउडरुइभरकरंबिअचरणकमलनहमणिं, सयलतिलोअलोअणतिहुरणमोहंधयारनिअरविहडणनहमणिं । न नवसि जइ जुआइजिणइंदममलकेवलसिरिकुलहरमिह भवभयहणणं ता वयंस तुह रयणं चिअ कराउ मुद्धगलिअं किर विहलमिदं खु जणणं" ११ ॐ **चूरुग्रात्** ॥ षात्परे पट्चगणा गन्ता । नौजे जः समे जो लीर्वा यमितेऽङ्घ्रौ । उग्रात् गलितकम् । उग्रगलितकमित्यर्थः । यथा "निम्मलनाणदिट्ठिअवलोइअभुवणयलं विसुद्धचित्तं, उग्गगलिअसमगाकम्मं निरवहिनाणरइअजगचित्तं । वीरं संभरामि तारणतरंडयं समपसन्नसोह, पंडिओ दुत्तरस्स भवसायरस्स लहरीभरम्मि सोहं" १२ ॐ **पौ तः सुन्दरात्** ॥ द्वौ पञ्चमात्रौ त्रिमात्रश्चैको



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

यमितेऽङ्कौ सुन्दरानामगलितकम् । नौजे जः समे जोलीर्वेति निवृत्तम् । यथा "नरवरिंद तुह कित्तिआ, कत्थ कत्थ न पहुत्तिआ । भरियगयणमहिकन्दरा, कुन्दसंखससिसुन्दरा" १३ ❀ पौ तौ भूषणा । द्वौ पञ्चमात्रौ द्वौ त्रिमात्रौ यमितेऽङ्कौ भूषणानामगलितकं । यथा "पीच्छ पीवरमहापओहरा, कस्स कस्स न वयंस मणहरा । विप्फुरन्तसुरचावकण्ठिआ, भूसणा नहसिरी उवट्ठिआ" १४ ❀ चपचापचाग्ला मालागलिता । चतुर्मात्रः पञ्चमात्रश्चतुर्मात्रद्वयं पञ्चमात्रः चतुर्मात्रद्वयं लघुगुरू च मालागलिता । यथा "न मुणिज्जइ गलाउ रयणमाला गलिइआ न गणिज्जइ भग्गओ । मणिवलयनिअरो न य जाणिज्जइ अंसुअंचलो विहु विलग्गओ । चोलुक्ककुलंबरदिणमणि तुह अवलोअणणिमित्तधावंतिहिं, मयरद्धयबाणधोरणिविद्धहिअइहि नारिहि हरिसिज्जंतिहिं" १५ ❀ षश्वी: समे जो लीर्वा विलम्बिता ॥ एकः षण्मात्रश्चतुष्टयं च । तथा समे स्थाने जगणो लघुचतुष्टयं वाङ्कौ यमिते विलम्बितागलितकम् । यथा "मसिसव्वम्भ(प्प)यारिघणतिमिरमालिआओ, ओअइ समुल्लसन्ति दुव्वारमालिआओ । वासयपंजरेसु सुत्ताओ सारिआओ, तह अविलंबिआओ जंति अहिसारिआओ" १६ ❀ गन्तचः पचुपाः खण्डोद्गतम् ॥ गुर्वन्तश्चतुर्मात्रः पञ्चमात्रश्चतुर्मात्रपञ्चकम् पञ्चमात्रश्च । समे जो लीर्वा खण्डोद्गतम् । यथा "खंडुग्गयमिंदुबिंबमिणमज्जवि अहिणवकिंसुअकुसुमसरिसयं, नहु जा चंदिमाइ तिमिरभरं किर परिदलिऊण पयडइ हरिसयं । वम्मीसरभडस्स सरनिअरेहिं अइदूसहिहिं पहरिज्जंतओ, अहिअं ता संपइ अहिसरणे पयट्टइ जुवइजणो तुवरंतओ" १७ ❀ चपाचीपाः प्रसृता ॥ चतुर्मात्रः पञ्चमात्रद्वयं चतुर्मात्रचतुष्टयं पंचमात्रश्च प्रसृता यथा "जं किर मुद्धिआइ तीए अहिणवमहुसमयलच्छितुवरिज्जंतओ, पसरिअमलयमारुओ नहु सुहाइ तुह विरहम्मि सुरूव छिवंतओ । तस्स व चिंतिऊण पडिखलणकारणं किरइ रुद्धनहयलवहाओ, किर उण्हुण्हिआओ घणनीससिअसमीरलहरीओ अइदूसहाओ" १८ ❀ चुर्दो नौजे जो लम्बिता ॥ पञ्च चतुर्मात्रा द्विमात्रश्चैको । नौजे जगणश्चेल्लम्बितागलितकं । यथा 'कइलासतुलणपयडिअबहुबाहपएण, संजणिअतिअसमंडल बहुबाहपएणं । आलंबियखयकारण दसासएण वणे नीआ सीआ तेणं दसासएण वणे" १९ ❀ सौजे पैर्विच्छित्तिः ॥ सैव लम्बितौजे पगणैर्विच्छत्तिर्गलितकमङ्कौ यमिते । यथा "रणरणंति जत्थ पमत्ता कुसुमेसुसिलीमुहा, होंति जत्थ लोहदूसहा कुसुमेसु सिलीमुहा । विच्छित्तिपरो तरुणीअणो विणा विहु महुसमओ, विब्भमइ जत्थ समुत्थरइ एस इह महुसमओ" २० ❀ चापचपदा ललिता ॥ चद्वयं पचपदाश्चाङ्कौ यमिते ललितागलितकं यथा "मत्तमयरपुच्छच्छटोहभग्गवणराइअं तीरसहंतलवंगलवलिकणइवणराइअं । नहमंडलगरुअविरंतर विविह घणवालयं उअहिं पेच्छ ललिअगत्तिपभं घणवालयं" २१ ❀



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

उभे विषमा । उभे विछित्तिललिते ललिताविछित्ती वा संकीर्णे विपमागलितकमङ्कौ यमिते यथा "तरलं दीहत्तणेणं पाविअकण्ण-मग्गं, विसमत्थ मोहसायरे करेइ कण्ण मग्गं । एअं तुह नयणजुअलयं सुन्दरिकालसारं, सोहाविणिजिअलोअणं निंदइ कालसारं" २२ अत्र पूर्वार्द्धे ललिता अपरार्द्धे विच्छित्तिः ॐ तीचौ मुक्तावली ॥ चत्वारस्त्रिमात्राश्चतुर्मात्रश्चैको मुक्तावलीगलितकं यथा "चंदणयं पि हु नहु सा सहए, गंडयलं करकलिअं वहए । धरइ न मुत्तावलिअं हिअए, तुज्झ तणुं चिअ लिहिअं निअए" २३ ॐ पिचौ रतिवल्लभः ॥ त्रयः पञ्चमात्राश्चगणश्चैको रतिवल्लभो गलितकम् यथा "दीसए एस तरुणिअणदुल्लहओ पच्चक्खतणू चेव रइवल्लहओ । जो भणइ मयणो हरेण परिअड्ढो, सो मा(सा)मि जणो नि(मि)च्छइण अवियड्ढो" २४ ॐ पौ चपौ हीरावली । द्वौ पञ्चमात्रौ चतुर्मात्रपण्मात्रौ च हीरावलीगलितकम् । यथा "कुवलयदलनयणे पयावइणा कयं, बहुरयणमयं पिव तुह वयण-पंकयं । जंसिं मणहरदसणाहरकुन्तलया, हीरावलिविद्दुमदलइंदनीलया" २५ दण्डकार्यादिभ्योऽन्यच्च सयमकं गलितकमित्येके । गलितकप्रकरणम् ॥

गलितकमेवायमकम् सानुप्रासं समाङ्घ्रि खञ्जकम् ॥ पूर्वकाण्येव गलितकानि यमकरहितानि सानुप्रासानि यदि भवन्ति, तदा खञ्जकसंज्ञानि । खञ्जकविशेपानाह । ॐ तौ चितगाः खञ्जकम् । त्रिमात्रगणद्वयं चतुर्मात्रत्रयं त्रिमात्रो गुरुश्चायमकं सानुप्रासं खञ्जकम् । यथा "मत्तमहुअमंडलकोलाहलनिब्भरेसुं, उच्छलंतपरहुअकुडुंबपंचमसरेसुं । मलयवायखंजीकयसिसिरवयाघणेसुं, विलसइ कावि चित्तसमयंमि सिरी वणेसुं" १ ॐ पचपचपा महातोणकः ॥ पञ्चमात्रचतुर्मात्रपञ्चमात्रचतुर्मात्रपञ्चमात्राश्चेत् महा-तोणकः । यथा "तुह पयावेणवि दवदूसहेण महिवलए, दड्ढदरिअवेरिमंडलेण इह पसाहिए । महातूणयदरिविवरमज्झंमि अहो-मुहा, लज्जियव्व ठिआ नरनाह तुज्झ सिलीमुहा" २ ॐ चीगौ सुमङ्गला ॥ चगणचतुष्टयं गुरुश्च सुमङ्गला यथा "चीणं चएसु निवसेसु कंबलम् चा(चो)लुकरायमणुसर महाबलं । मूढ वहसु मा माणविसघंघलं, अत्ताणयस्स चिंतेसु मंगलं"३ॐ चौ पः खण्डम् ॥ चतुर्मात्रद्वयं पञ्चमात्रश्च खण्डं नाम खञ्जकं यथा "नच्चाविअचंदणवणो, मच्चाविअमहुअरगणो । खंडिअमाणिणिमाणओ, वाअइ दाहिणपवणओ" ४ ॐ षचता उपात् ॥ षण्मात्रश्चतुर्मात्रस्त्रिमात्रश्च उपात्खण्डकं उपखण्डकमित्यर्थः यथा "साहीणो चित्तण्णुओ, पणओ खंडिअमब्भुओ । माए पवरणदुल्लहो कत्तो लब्भइ वल्लहो" ५ ॐ षश्चौ खण्डिता ॥ एकः षण्मात्रो द्वौ चतुर्मात्रौ खण्डिता यथा "उज्जगरकसायनयणं, हिअयलग्गजावयं चलणं । खंडिआइ दट्ठूण पिअं मरणयम्मि हिअयं निहिअं" ६ ॐ त्रयोऽप्यव-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

लम्बकः ॥ त्रयोऽपि खण्डोपखण्डखण्डिताभेदाः प्रत्येकं अवलम्बकसंज्ञाः । संज्ञाप्रयोजनं द्विपदीखण्डे । ꙮ षश्चीर्युग्जो लीर्वा हेला ॥ षण्मात्रश्चतुर्मात्रचतुष्टयं तथा युक् समस्थानगतो जो लीर्वा हेला । यथा "कोअंडं पसूणरइअं गुणो महुयरा, बाणा कामिणीण नयणा विलासगहिरा । समयतणू जडो सहयरो तुसारकिरणो, हेलाए तहावि भुवणं जिणेइ मयणो" ७ ꙮ सान्ते दोनावली ॥ सा हेला पादान्ते द्विमात्रोना आवली । यथा "नवघणमालिअत्ति कलिउं विहत्थओ, सजलविलोयणेहिं पहिआण सत्थओ । गिम्हे दवहुआसमसिमलिणसामलिं, पेच्छइ हंत विंझसिहराण आवलिं" ८ ꙮ चूपगा विनता ॥ चतुर्मात्रपञ्चकं पञ्चमात्रो गुरुश्च समे जो लीर्वा विनता यथा "सुहसिरिकलावनिज्जिअदिवायरनिसायरं तइलोकवइं, अक्खलिअसुद्धझाणाणलेण निद्दड्ढसयलकम्मुग्गहं । विणयामरिंदमणिमउडकंतिपब्भारपल्लविअचरणयं, तं अणुसरामि भवजलहितारणं वद्धमाणमिह सरणयं" ९ ꙮ तौ चस्तौ विलासिनी ॥ द्वौ त्रिमात्रावेकश्चतुर्मात्रः पुनर्द्वौ त्रिमात्रौ विलासिनी । यथा "मत्तकोइला महुरभासिणी, हसइ किंपि सा जइ विलासिणी । दोण्हि हुंति सोहग्गलण्हिआ, मल्लिआ तहय चंदजोण्हिआ" १० ꙮ तौ चितौ मञ्जरी ॥ द्वौ त्रिमात्रौ त्रयश्चतुर्मात्राः पुनरेकस्त्रिमात्रो मञ्जरी । यथा "चूअमंजरिं मंजुकोइलागीअयं, मलयमारुअं पुण्णबिंबयं चंदयं । पाविऊण महुमासि एत्थ विसमत्थओ, हवइ झत्ति तेलोक्कनिज्जयसमत्थओ" ११ ꙮ सा तान्ता सालभञ्जिका ॥ सा मञ्जरी त्रिमात्रान्ता सालभञ्जिका यथा- "चरणकमललग्गे वि हु पिअयम्मि पकोविरी, सालभंजिअव्व सहि कीस तुमंसि अजंपिरी । सुणसु समुल्लसंति पिअमाहवीकुलकलयला, मयणविजयदुंदुहिझुणी इव पूरिअनहयला" १२ ꙮ चादिः कुसुमिता ॥ सैव मञ्जरी पादादौ चतुर्मात्रश्चेत्कुसुमिता यथा "मयपरिपुट्ठघुट्ठकलयंठीपञ्चमनिब्भरा, विहडप्फुडभमंतभसलावलिकलयलसुन्दरा । घणघोलंतमलयपवणोहुअकुसुमिअकेसरा, हिअयं निम्महंति न हु कस्स इमे महुवासरा" १३ ꙮ षश्चुगौ द्वितीयषष्ठौ जो लीर्वा द्विपदी ॥ एकः षण्मात्र पञ्च चतुर्मात्रा गुरुश्च । तथा द्वितीयषष्ठौ चगणौ जो लीर्वा द्विपदी । यथा "सा रे वच्च पहिअ निअदइअं परिहरिऊण सव्वहा, इह हि समुत्थरंतकुसुमायरमासमुहम्मि अन्नहा । परहुअजुवइगीअहालाहलविहलंघलिअचित्तओ, वलसि न दुवइअं पि वम्मीसरसरनिउरंबछित्तओ" १४ इहान्यापि सुमनस्ताराज्योत्स्नामनोवतीप्रभृतयः सप्तत्रिंशद्गणसमा द्विपद्यो विपुलाचपलादयोऽष्टावर्द्धसमाश्च कैश्चिन्निबद्धास्ताश्च क्वचित्काश्चिदन्तर्भवन्तीति पृथङ्नोक्ता । ꙮ साद्ये न्ले छै रचिता ॥ सा द्विपदी आद्ये चगणे न्ले लघुचतुष्टये सति छैः सप्तभिर्मात्राभिर्यतिश्चेद्रचिता । रतिकेत्यन्ये । यथा "नच्चिरकीरमिहुणकोलाहलमुहलिअकलमच्छेत्तओ, दिम्मुहमहमहंतगंधुक्कडविहसि-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

असत्तवण्णओ । विरइअमुद्धदुद्धसुंदरिमअविरलकासहासओ, पिअसहि मा पिअम्मि परिकुप्पसु जं सरओ समागओ" १५ ❀ गन्तारनालम् ॥ सा द्विपदी गुर्वन्ता एकेन गुरुणा वृद्धा आरनालं । यथा "अविरलबाहवारिधारावलिवियलणसोणलोअणाए, दारुणपंचबाणबाणाहयहिअयफुरंतेवअणाए । तुह विरहंमि चंदमंदानिलचंदणतावजालिआए, अहिणवमार नालवणयं पि तीइ तं कुणसि बालिआए" १६ ❀ उपान्त्यलोना कामलेखा ॥ सैव द्विपदी अन्त्यस्य गुरोः समीपमुपान्त्यं तत्र यो लस्तेनोना कामलेखा । यथा "राईचंदकिरणधवला मणहरणा पुप्फमाला, नीलुप्पलपसूणपरिवासमहग्घाजुण्णहाला । गेहं रयणदीवरुइरं रुइगीअं पंचमेणं, तेण विणा असारमखिलं खु कामलेहाधरेणं" १७ ❀ षचौदाश्चन्द्रलेखा ॥ एकः षण्मात्रश्चत्वारश्चतुर्मात्रा द्विमात्रश्चैकश्चन्द्रलेखा । यथा "मयणविआरसमुद्दलहरिविथ्थारकारिणी, जणिआणंदचंदमणिणिब्भरसारसारणी । उच्छलंतलायण्णमऊहावलिपसाहिआ, मज्झ नयनकुमुआण इमा सा चंदलेहिआ" १८ ❀ चिपचाः क्रीडनकं जैः ॥ चतुर्मात्रत्रयं एकः पञ्चमात्रस्त्रिमात्रश्च जैरित्यष्टभिर्यतिश्चेत् क्रीडनकं । यथा "कंकणकिंकिणिनेउरकलयलमुहलं, पवणपहल्लिरसिचयंचिअगयणयलं । दीहोच्छल्लणखेल्लणकयलोलणयं, सहइ इमाए अंदोलणकीलणयं" १९ ❀ षपत्रतदा अरविन्दकं ॥ षट्पञ्चचतुस्त्रिद्विमात्रा अरविन्दकं यथा "ओअह तुम्ह विरहे इमाइ मुहकमलं, अविरलबाहधाराविलुलिअकज्जलं । अब्भलेहपिहिअं व पुण्णिमचंदयं, सेवलसंवलियं व नवारविंदयं" २० ❀ षलदलचदगाद्गौ मागधनर्कुटी ॥ षण्मात्रलघुद्विमात्रलघुचतुर्मात्रद्विमात्रगुरुभ्यः परौ गुरू चेन्मागधनर्कुटी । यथा "नवमयरंदपाणपायडमयउत्ताला, भमरा रुणरुणंति कायलिकयसद्दाला । पंचममुग्गिरंति एआ अवि दिट्ठीओ, चूअंकुरुकसायकंठा कलयंठीओ" २१ ❀ सश्चेन्नर्कुटकम् ॥ षलदलचदगात्सगणश्चेत्तदा नर्कुटकं यथा "परिमललुद्धलोलअलिगीअसणकुडयं, जाव न जग्गवेइ विसमत्थमहाभडयं । माणं मोत्तुआण माणंसिणि स(म)प्पणयं, पेम्मभरेण ताव अणुसर सहि वल्लहयं" २२ ❀ षजौ सिः समात् ॥ एकः षण्मात्रो जगणः सगणत्रयं च समान्नर्कुटकं समनर्कुटकमित्यर्थः । यथा "सयलसुरासुरिंदपरिवंदिअपायतलो, निरुवमझाणनाणवसनासिअकम्ममलो । निवसउ मे मणम्मि भवयं सिरिवीरजिणो, विलयं जंति कामपमुहा जह ते अरिणो" २३ नलगजसाः ससौ यदि तदा समनर्कुटकमिति तु संस्कृतनर्कुटेनैव गतार्थमिति नोक्तम् । ❀ त्रिष्वप्यन्त्यचस्य ते तरङ्गकम् ॥ त्रिष्वपि मागधनर्कुटी–नर्कुटक–समनर्कुटकेष्वन्त्यस्य चतुर्मात्रस्य स्थाने त्रिमात्रश्चेद्भवति तदा तरङ्गकम् । यथा "बहुविहुभावमुद्धमहुरत्तणमन्दिरं, पवणुद्धुअसामसरसीरुहसुन्दरं । निम्मलकंतिपुंजपरिलद्धयचंगयं, सोहइ तीइ दीहनयणाण तरङ्गिअं" २४ ❀ गान्तं पवनोद्धुतम् ॥



P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

तरङ्गकमेवं गान्तं अन्ते गुरुणाधिकं पवनोद्धुतं यथा "भसला दंसयंति महुपाणपरव्वसाण, उक्कंठा तरलियमणाण नियवल्लहाण। निब्भरमहुरगीइरवमुच्चरिउं इमासु, दोलाकीलणाइं पवणुद्धुयवल्लियासु" २५ ॐ **चाभ्यां पाभ्यां पाद्वा तिर्निध्यायिका ॥** द्वाभ्यां चतुर्मात्राभ्यां यद्वा पञ्चमात्राभ्यां एकस्माद्वा पञ्चमात्रात्परं त्रिमात्रत्रयं चेत्त्रिधाप्येपा निध्यायिका । चाभ्यां तिर्यथा । "हा खामोअरि कुरंगनेत्तिए, वयणमऊहजिअचंदकंतिए। निउज्झा(व्वा)इयजीवाविअमणसिए, दूसहो तुज्झ विरहानलो पिए" २६ पाभ्यां तिर्यथा "निज्झाइअइ जत्थ मयमयवल्लरी, ललिअकंतिचंगे कलंकसोअरी। सेवंति तं तुह मुहचंदयं सया, उव्विच बालहरणच्छि चउरया" २७ पात्तिर्यथा "हरइ जम्मसयसंचिआइं, भवियाण असेसदुरिआइं। तुह मुहं जणियमयणमाह निज्झाइअं पि भुवणनाह" २८ केचित्तु पचाभ्यां तिरिति निध्यायिकां वदन्ति। यथा "वम्मीसरकंचणतोमरललिआ, दिट्ठा छुड्ड सुंदरि चंपयकलिआ । घुलिओ छुड्ड दक्खिणओ गंधवहो, विल(य)लिओ ता पहियाण मणोरहो" २९ ॐ **चुपौ युग्न जोऽधिकाक्षरा ॥** पञ्च चतुर्मात्रा एकः पञ्चमात्रस्तथा समो न जगणोऽधिकाक्षरा । यथा "उज्जागरओ कवोलपंडुत्तणं तणुअत्तं, दीहुण्हा सासदंडया चित्तए विवसन्तं। अहिअक्खरजंपिएण किं वा सुहय तुहविरहे, सा एत्ताहे वराइआ निअयं मरणं लहे" ३० ॐ **सा तुर्यपा मुग्धिका ॥** सा अधिकाक्षरा तुर्योपि चेत्पगणो भवति तदा मुग्धिका । यथा "जीए लग्गेइ चंदणं गरलरसं व दूसहं, अंगंपि अ जीए तावइ ससी अणंगनीसहं । कयलीदलमारुओ वि किरइ हुभवहं पि व जीए, दाहो मुद्धाइ एस कह समइ गुणालय तीए" ३१ ॐ **आदौ यश्चित्रलेखा ॥** सा अधिकाक्षरा आदौ यश्चेच्चित्रलेखा। यथा "नहयलम्मि सयलदिसामुहेसु गहणम्मि गिरिवरे, सरिपुक्खरिणिआसु देवउलएसु भित्तिसु नयरे । दूरम्मि पासे घरम्मि अंगणपएसए तुह, चित्तलिहिअं पि व मयच्छि पेच्छामि सुंदरं मुहं" ३२ ॐ **पौ मल्लिका ॥** साधिकाक्षरा आदौ पौ चेन्मल्लिका। यथा "उब्भिजउ मायंदमंजरी पाडला दलओ चिरं सा, पायडविआससिरी अ नोमालिआ वि निब्भरं । विअसउ वसंतंमि फुडं मणहरा असोअवल्लिआ, एक्कच्चिअ भसलस्स माणसं हरइ हन्त मल्लिआ" ३३ ॐ **सा तुर्यपा दीपिका ॥** सा मल्लिका चतुर्थः पश्चेद्दीपिका यथा "मत्तवारिहरपंतिरुद्धहरिणंकमऊहसोहए, रोअसीकंदरुससंतघोरअंधयारवूहए । रमणवासभवणाहिसारिआण रुइरविज्जुलेहिआ, कामिणीण अवलोअकारिणी हवइ इह करदीविआ" ३४ ॐ **ताभिर्लक्ष्मिका ॥** ताभिरधिकाक्षरादिभिः संकीर्णा लक्ष्मिका यथा "केसरकुरवयमायंदतिलयअसोअकोरया, विरहाणलडज्झंतनिअंबिणिजीवियचोरया। एदे किर दुप्पिच्छा विलसंति मणोहवसरा, जेसुं ते कह निग्गमियव्वा महु-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

॥ ३३ ॥ लच्छिवासरा" ※ अत्राद्यपादत्रये अधिकाक्षरा चतुर्थपादे मुग्धिका । एवमन्याभिरप्युदाहार्या । केचित्सर्वैरपि खञ्जकभेदैः सङ्कीर्णतायां लक्ष्मिकामिच्छन्ति ॥ ३५ ॥ ※ **चतुष्पञ्चषट्सप्ताष्टनवपा मदनावतार-मधुकरी-नवकोकिला-कामलीला-सुतारा-वसन्तोत्सवाः** ॥ चतुरादिपाः क्रमेण मदनावतारादयो भवन्ति तत्र चतुर्भिः पञ्चमात्रैर्मदनावतारो यथा "गिज्जंति गीईओ पिज्जंति मइराओ, नच्चंति वेसाओ परिल्हसिअकेसाओ । एवमन्नोन्नपरिरंभणासारए, कीलंति रामाओ मयणावयारए" ३६ पञ्चभिर्मधुकरी यथा "चरणेणवि नवफुडिअकुडयमपरिघट्टयंतिआ, पक्खवाएणवि विहसिअकेअयमच्छिवंतिआ । उअह झत्ति एसा निम्मलयरगुणाणुरंजिरी, अहिसरइ विअसंतजाइकुसुमं चिअ महुअरी" ३७ षड्भिर्नवकोकिला यथा "नवकोइलरवाउलमंजरिअमायंदतरुकंतारए, सच्छन्दमल्लिआमयरंदरसमत्तघोलंतछप्पए । जिंभंतमलयद्दिसमीरणलोलनोमालिआवल्लिए, संभरइ पंथिओ पिअयमं ओसहिं हिअयए सल्लिए" ३८ सप्तभिः कामलीला यथा "मत्तपिअमाहवीपंचमोग्गारगुंजंतचूअद्दुमत्तंबओ, मिउमलयमाओउद्धूअवल्लिप्पसूणग्गघोलंतरोलंबओ । चारुकंकेल्लिसाहंतदोलासमंदोलणासत्तनारीअणो, कामलीलासहो संपयं विलसए एत्थ एसो वसंतक्खणो" ३९ अष्टाभिः सुतारा । यथा "पिअयम कहं जासि एआइणिं मं चइत्तूण देसंतरं पेच्छ निल्लज्ज, सुरहिमासो पयट्टो असेसाणं जणाणं विलासेक्कदिक्खागुरू अज्ज । एस सुविसट्टकंकोट्टकंकेल्लिमायंदघोलंतरोलंबगीइस्सणो, जं सुतारो धणुद्दंडटंकारओ इह निसामिज्जए सुहडपंचेसुणो" ४० नवभिर्वसन्तोत्सवो यथा "फुल्लिआणेअकंकेल्लिमहुपाणमत्तालिझंकारकलगीइगिज्जंतकुसुमाउहो, मायंदनवमंजरीकसायकंठकलयंठीकोलाहलाउलिज्जंततरुसमूहो । पिययमपरिरंभणचुंबणाइप्पसंगसंगलियरसनीसंदुद्धुसिअरोमकूवओ, हलहलियतरुणीअणहिअयओ पवंचिअपंचमो विलसिओ वणेसुं वसंतयऊसओ" ४१ खञ्जकप्रकरणम् ॥

※ **खञ्जकं दीर्घीकृतं शीर्षकम्** ॥ खञ्जकान्यपि दीर्घीकृतानि शीर्षकसंज्ञानि । शीर्षकविशेषानाह ※ **गीत्यन्तावलम्बकौ द्विपदीखण्डम्** ॥ अवलम्बकद्वयमन्ते गीतिश्चेत्तदा द्विपदीखण्डम् । यथा रत्नावल्याम् "कुसुमाउहपिअदूअयं, मउलावंतो चूअयं, सिढिलिअमाणग्गहणओ, वाअइ दाहिणपवणओ, विअलिअबउलामेलओ, इच्छिअपिअयममेलओ, पडिवालणअसमत्थओ, तम्मइ जुअईसत्थओ, इय पढमं महुमासओ, जणस्स हिअयाइं कुणइ मउआइं, पच्छा विंधइ कामओ, लद्धावसरेहिं कुसुमबाणेहिं" १ ※ **द्विपद्यन्ते गीतिर्द्विभङ्गिका** ॥ द्वौ द्विपदीगीतिरूपौ भङ्गावस्यां द्विभङ्गिका यथा "दारुणदेहदाहपविअंभण फुडफुट्टंतहारए, हिअयत्थलनिहित्तघणचंदणपंकुच्चोडकारए, दीहरसासदड्ढसहिकरयलघुअविअणारविंदए, तिणयणतइअनेत्तपत्तानलजालकरालचंदए, विरहम्मि तुज्झ ॥ ३३ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

एरिसे, तह झीणा कुवलयच्छ सदुहंगिआ, जह सण्हलक्खूणणयं, तीए अंगम्मि सिक्खइ अणंगओ" २ ॥ ॐ अन्यथापि ॥ अन्यैरपि छन्दोभिर्द्वन्द्वितैर्द्विभङ्गी अन्यैरुक्ता तत्र गाथाया भद्रिकाया योगे यथा "उध्धाइअझंझानिलझप्पझंपणपडंतविडवोहे, अविरलबहलझलक्कंतविज्जुलावलयलल्लक्के, सरहसरडंतदद्दुरे कणंतमोरे पडंतजलनिवहए, गज्जंतमेहमंडले को जिअइ विणा पिएण पाउसम्मि" ३ वस्तुवदनस्य कर्पूरेण यथा "निक्कंदलकयकच्छ नलिणिवज्जिअ कय सरसरि, निच्चंदणु किओ मलओ तुहिणवज्जिओ किओ हिमगिरि, निप्पलवकिअकरि पयत्तु कंकेल्लिविडविसय, पत्तचत्त कय बालकयलि, अकुसुम कय तरुलय सिसिरोवयारकिहिं, परियणिहिं णिम्मुत्तावलि कय भुवण, तो विहु न तीइ तुह विरहभरि खसइ दाहदारुणविअण" ४ कुङ्कुमेन यथा "गयणुप्परि किं न चडहिं किं नरि विक्खरहिं दिसिहि वसु, भुवणत्तयसंतावु हरहि किं न किरवि सुहारसु, अंधयारु किं न दलहिं पयडि उज्जोउ गहिउल्लओ, किं न धरिज्जहिं देवि सिरहं सइं हरि सोहिल्लओ, किं न तणउ होहि रयणारहु होहि किं न सिरिभायरु, तुवि चंद निअवि मुहु गोरिअहि कुवि न करइ तुह आयरु" ५ रासावलयस्य कर्पूरेण यथा "परहुअपंचमसवणसभय मन्नउं स किर, तिंभणि भणइ न किं पि मुद्धकलहंसगिर, चंदु न दिक्खण सक्कइ जं सा ससिवयणि, दप्पणि मुहु न पलोअइ तिंभणि मयनयणि, वइरिउ मणि मन्नवि कुसुमसरु खणि खणि सा बहु उत्तसइ, अच्छरिउ रूवनिहि कुसुमसरु तुह दंसणु जं अहिलसइ" ६ कुङ्कुमेन यथा "जइ अज्झलक्किहिं नयणदीहनयणि अहिखणु, केअइकुसुमदलम्मि भसलु विलसइ तजणु, जइ तीए मुहि हावि मंदु हासउ चउ(ड)इ । ता जणु हीरयपउमरायसंचओ झडइ, जइ तीए महुरमिउभासिणिहि वयणगुंफ निसुनिज्जइ, तावह करेप्पि जणु अमयरसु कण्णपण्णपुडि पिज्जइ" ७ वस्तुवदनकरासावलयसंकीर्णस्य कर्पूरेण यथा "अविहडअवरुप्परप्परूढगुणगंठिनिबद्धओ, एआरिण हलि गलइ पिम्मु सरलिमवसलद्धओ, माणमडप्फरु तुह न जुत्तु उत्तिमरमणिं, तिंभणि वारउं वारवार वारणगमणि, अह करिहि कलहु वल्लहिण सहुं इच्छिमयच्छिइ पणय मुहु, माणिक्कि मणंसिणि करिववलु हेल्लि खेल्लिताजओ तुहं" ८ कुङ्कुमेन यथा "पंडिगंडयलपुलयपयरपयडणबद्धायरु, कंचि बालबालाविलासबहलिमगुणनायरु, दविडिदिव्वचंपयचयपरिमलल्हसडउ, कुंतलिकुंतलदप्पझडप्पणलंपडउ, मरहट्ठिमाणनिद्धाहवयविहवविहंसणसक्कउ, कसु करइ न मणि हल्लो(ला)हलउ मलयानिलहु झुलक्कउ"९ रासावलयवस्तुवदनकसङ्कीर्ण(स्य)कर्पूरेण यथा"तरुणिहूणि(ण)गंडप्पहुपुंछिअतिमिरमसि, उक्कझलुक्कावढणु दुसहु मा करउ ससि; मलयानिलु मयनयणि घुणिअकप्पूरकयलिवणु संधुक्किअमयणग्गि सहि इमा तुज्झ तवउ तणु, तणु अंगिमखढहढि पडहि तुह मयणबाणवेयणकलह, चय माणु माणि वल्लहिण सहुं चडि म जीव संसय तुलह । " १० कुङ्कुमेन यथा "सवण-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

निहिअहीरयहसंतकुण्डलजुअल, ; थूलामलमुत्तावलिमण्डिअधणकमल, सेअंसुअपंगुरण बहलसिरिहंडरसुज्जल, बहुपहुल्लविअइल्लफुल्ल-फुल्लाविअकुन्तल, तो पयड धाइ दंसणजणियखलयणडरभरभारिअ, अहिसरइ चंदसुन्दरनिसिहिं पइं पिअयम अहिसारिअ" ११ वदनकस्य कर्पूरेण यथा "किं न फुल्लइ पाडल परपरिमल महमहेइ किं न माहवि अविरल, नवमल्लिअ किं न दलइ पहल्लिय कि न उत्थरइ कुसुमभरि मल्लिअ, दीहियतलायसरतल्लडिंहिं कि न पसाहि पउमिणि फुडइ, तुवि जाइ जायगुणसंभरणु झाणु कि भसलु हु मणि खुडइ" १२ कुङ्कुमेन यथा "जइ तुह मुहु करयलु उमोडवि चल्लिअ ची(वी)रंचलु अच्छोडवि माणिणि तुवि पसाओ-करि सुम्मउ, पइं पिइ उत्तावलिअ म गम्मउ, जइ किम्वइ वि संवहपयजुयलु इहु विहिवसिण विदइ, ता तुज्झ मज्झु खीणतु खरउ किं न खामोअरि तुट्टइ" १३ एताश्च वस्तुवदनककर्पूराद्या द्विभङ्गिकाः पट्पदा इति, सार्द्धच्छन्दांसीति च, सामान्याभिधानेन मागधानां प्रसिद्धाः। यदाह "जइ वत्थुआण हेट्ठे, उल्लाला छंदयम्मि किज्जंति। दिवड्ढच्छंदयच्छप्पयकव्वाइं ताइं वुच्चंति" इत्यादि। एवं मात्राया अप्युपरि द्विपद्युल्लालका वस्तुकादीनामप्युपरि दोहकादयो द्विभङ्ग्यामेव द्रष्टव्याः। वृद्धानुरोधात्तु रड्डा(ड्डा) पृथगभिधास्यत इति सर्वमवदातम्। ॐ **द्विपद्यवलम्बकान्ते गीतिस्त्रिभङ्गिका ॥** पूर्वं द्विपदी पश्चादवलम्बकस्तदन्ते गीतिरिति त्रिभङ्गिका। यथा "निब्भरदलिअसत्तदलपायवसंकडतडिणिपुलिणिया, सेहालिअपसूणपरपरिमलपुण्णपहा(दा)यपवणया ॥ कुवलयगंधलुद्धफुल्लंधुअपत्थुअगी-तिभंगिआ, पंकयवणकणंतकलहंसीकुलहुंकारसंगिआ, ओहट्टिअचिक्खल्लया, निम्मलजलसोहिल्लया, रायरणूसवदूअया, कलमामो-अपसूअयाँ, तिहुअणलच्छीभवणया जोण्हाजलभरिअनहयलाभोअया, कस्स न हरन्ति चित्तयं, एए लोअम्मि सारआ दिअहया" १४ ॐ **त्रिभिरन्यैरपि ॥** अन्यैरपि त्रिभिश्छन्दोभिः श्रुतिमुखैस्त्रिभङ्गिका तत्र मञ्जरीखण्डितान्ते भद्रिकागीतिर्यथा "उच्छलंत-छप्पयकलगीतिभंगिधरे, विप्फुरंतकलयंठिकंठपंचमसरे, गिज्जमाणहिंदोलालवणपसाहिए, चच्चरिपडहोद्दामसद्दसंखाहिए, विअसिअर-त्तासोयलए, केसरकुसुनामोअमए, पप्फुल्लिअमायंदवणे, धणघोलिरदक्खणपवणे, इअ एरिसम्मि चेत्तए, जस्स न पासम्मि अत्थि पिअमाणुसं, सो कह जिअइ वयंसिए, विद्धो मयरद्धयस्स भल्लिआहिं" १५ ॐ **गाथस्याद्यार्द्धं समैश्चैर्गात् प्राग्वृद्ध(मन्त्य)स्य ते पादः समशीर्षकम् ॥** गाथस्य प्रथमार्द्धमन्त्याद्गुरोरर्वाक् समैश्चगणैर्वृद्धमन्त्यस्य च गुरोःस्थाने ते त्रिमात्रे सति पादश्चेद्भवति तदा तादृशै-श्चतुर्भिः पादैः समशीर्षकम्। यथा "सरसयसुरहि सुरसायतरुणमायंदमउलमंजरिदलोहकवलणकसायसंसुद्धकंठकलयंठिनिअरकंठो-च्छलंतपंचमपलाववोल्लालयंमि, रुंदारविंदमयरंदबिंदुसंदोहपाणसाणंदभमरनिउरंबबहलझंकारमुहलिउज्जाणचारुलच्छीए। तिहुअणमणहरे



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

दक्खिणसमुद्दकल्लोलमालिआतरणसंगनिव्वविअमलयमारुअझडप्पहल्लं(लं)तविविहबहुवेल्लिगहणवणकुसुमगोच्छउच्छलिअपउरपिंजरपरायपडिहत्थदहदिसाचक्कदंसणुप्पण्णुपियथमाभरणमिलिअमुच्छापहारनिवडंतपहिअसंघायरुद्धमग्गंतरदूसंचरधरे । पप्फुल्लिअसघणकिंसुयसमूहकणिआरकुंजवरकंचणारकेसरलवंगचंपयपियंगुमल्लीमहल्लमाहविविआणकंकेल्लितिलयकुरुबयपियालपुन्नागनागकेसरसुवण्णकेअइकुडंगपाडलतमालनोमालिउल्लपसरंतपरमपरिमलघचक्कमहमहिअसमत्तवणंतरे,मा वच्च कंत चत्तूण मं इमं मयणपीडिअं तरुणिसत्थचच्चरिविणो(वच्चरिविणा)-असमसीसनद्ददंडाहिघायसद्दंतरालतालाणुलग्गघुम्मंतमद्दलोद्दामपाडपडिवन्नमंजुहिंदोलभंगिआलवणरेहसंवद्धवेणुवित्तरोल्लसंतसरभेअसाहणट्ठाणसहम्मि वसंतए" १६ अत्र समस्थाने जो लीर्वा तथान्त्याच्चगणात्प्रागेकश्चगणो जो लीश्च न कर्त्तव्यः । इत्याम्नायः । ॐ मालागलितकपादान्ते विषमचात्वृद्धौ वेः ॥ मालागलितकपादस्यान्ते विपमसङ्ख्यस्य चगणद्वयस्य वृद्धौ सत्यां वेः परं समशीर्षकम् । विपमशीर्षकमित्यर्थः । मालागलितकवच्चात्रापि समस्थाने जो लीर्वा विपमे तु जगणो न कर्त्तव्यः । यथा "हयवरखुरखणिज्जमाणमहिरेणुपडलबहलिज्जमाणगयणंगणुत्थरिदअविरलधारपुंजसंवलणरुद्धलोअणविलोअणपवंचमच्छरिअपरवसो, अवयरइ समंतदो तुरिदममरनिअरो निब्भरसंचरंतचउरंगसेन्नपब्भारवलिरनीसेसभूवलयखडहडंतमंदरसुमेरुकइलासविंधगिरिनारपभुदिगिरिसिहरनिवडणाइ भरंभगुरिदकंधराइ तम्मइ वराहपवरो धणुक्कावमुक्कतारायविद्धकरडिघडकुंभतडनिवडिदाविरलरंधनिब्भरझरंतसोणिदतरंगिणीरइअबहलपंकखुप्पंतचक्करहसंवराओ एआओ भीसणाओ समरवसुहाओ, सुविसमसिसयाइं निवडंति हुंकरंताइं पिच्छ निसिदकरवालधराहिघायघुम्मंतयाइं संपइ । इमाओ नच्चंति बहुविहसुहडकबंधपंतीओ सुरवहूमुक्कपारिजायविडविकुसुमाओ । १७ शीर्षकप्रकरणम् । ॐ ॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ आर्या-गलितक-खञ्जक-शीर्षकव्यावर्णनो नाम चतुर्थोऽध्यायः ।

अथ प्रायोऽपभ्रंशे संस्कृतप्राकृतच्छन्दोनन्तरमपभ्रंशगतानि छन्दांस्यधिक्रियन्ते प्रायो ग्रहणाद्भाषान्तरेपि भवन्ति ॐ अजश्चूस्तृतीयपञ्चमौ जो लीर्वोत्साहः ॥ जगणरहिताः पड् चगणा उत्साहः । अत्रापवादः तृतीयः पञ्चमश्च जगणो लघुचतुष्टयं वा यथा "अवमन्निअदुट्ठचित्तसंगमयचक्कघाय जे जे सोत्साह नाह झायंति तुज्झ पाय । ते ते संसारि वीर कहवि न लहंति दुक्खु जं किर वच्चंति झत्ति पहुनिच्छएण मोक्खु" १ इदानीं रासकानाह । ॐ दामात्रानो रासको ढैः ॥ दा इत्यष्टादशमात्रा नगणश्च रासकः । ढैरिति चतुर्दशभिर्मात्राभिर्यतिः । यथा "सुररमणीअणकयबहुविहरासयथुणिअजोइविंदविंदारयसयअमुणिअचरिअ । सिरिसिद्धत्थनरेसरकुलचूडारयण जयहि जिणेसर

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

वीर सयलभुवणाभरण" २ सर्वा अपि जातयो रासका भवन्तीति केचित् । यदाह "सयलाओ जाईओ पत्थारवसेण एत्थ बज्झंति । रासाबन्धो नूणं, रसायणं वेदगोट्ठीसु" ॐ चुलगा वा ॥ चतुर्मात्रपञ्चकं लघुगुरू च यदि वा रासकः । पृथग् योगात् ढैरिति न वर्त्तते । यथा "गोवीअणदिज्जंतयरासय निसुणंतहं, वासारत्ति पहुचइ पहिअहं पवसंतहं । निअवल्लह तिम्व किम्वइ हिअयंतरि निवडिअ, जिम्व जनह न वहंति चलणनावइ निअडि(हि)अ" ३ ॐ चपजाया अवतंसकः ॥ चतुर्मात्रः पञ्चमात्रो जगणद्वयं यगणश्च अवतंसकः । यथा "सायरु रयणायरु बोल्लहिं जं बुहसत्थ तं सच्चु जि जाय निसायरकुच्छुह जत्थ । जह एक्कु हूओ सिरिकंठसिरे अवयंसु, अवरु सिरिनाहउरिभूसणु उल्लसिअंसु" ४ ॐ चः पौ जो गौ कुन्दः ॥ चतुर्मात्रः पञ्चमात्रद्वयं जगणो गुरुद्वयं च कुन्दः । यथा "अहरुट्ठदलइजवापसूण दन्तकुन्द पाणिचरणनयणवयणविअसिआरविन्द । कुसुमपुरु पच्चक्खुवि सुन्दरि तुज्झ देहु तुह वरु मज्झ देसु वहसि विवरीउ एहु" ५ ॐ पाचाजगाः करभकः ॥ पञ्चमात्रद्वयं चतुर्मात्रद्वयं जगणो गुरुश्च करभकः यथा "करहयथणहरगलिअलोलमणोहरहारय, गंडत्थलल्लुलिअमइलजडिलकुंतलभारय । अणवरयबाहणिवडयसूण सोणविलोअण, तुह हुअ नरवइतिलय संपय वेरिवहूअण" ६ ॐ चपाचागा इन्द्रगोपः ॥ चतुर्मात्रः पञ्चमात्रद्वयं चतुर्मात्रद्वयं गुरुश्च इन्द्रगोपः । यथा "रेहहि अरुणकंति धरणीअलि इंदगोवया, पाउससिरि नाइ पय जावयबिंदु लग्गया । एहवि विज्जुलेह झलकंति अ बहलकंतिआ, लक्खिज्जइ जायरूवनिम्मविअव्व कंठिआ" ७ ॐ चपाचालगा कोकिलः ॥ चतुर्मात्रः पञ्चमात्रद्वयं चतुर्मात्रद्वयं लघुगुरू च कोकिलः । यथा "हंसि तहारओ गइविलासु पडिहासइ रित्तओ, कोइलरमणिइ तुहवि कंठु कुंठत्तणु पत्तओ । विरहय कंकेल्लिह दोहल संपइ पूरंतिअ जं किर कुवलयनयण एह हिंडइ गायंति अ" ८ ॐ चपाचलगा दर्दुरः ॥ चतुर्मात्रः पञ्चमात्रद्वयं चतुर्मात्रो लघुगुरू च दर्दुरः । यथा "मत्तंबुवाह वरसंतिण पइ समहिओ, आयण्णसु संपय महिअलि जं विरइओ । हंसहंकलसद्दिण जं आसि मणोहरु, दद्दूररडिआउलु निम्मिओ तं सरवरु" ९ ॐ चरजमगा आमोदः ॥ चतुर्मात्रो रगणजगणमगणा गुरुश्च आमोदः । यथा "असोअमंजरीफुरंतआमोएसुं, कलरोलंबचंद्रकायलीसद्देसुं । अणवरयं वहंतसारणीतोएसुं, धन्ना केवि जे रमंति उज्जाणेसुं" १० ॐ म्रलगापासा विद्रुमः ॥ मगणरगणौ लघुगुरू पगणद्वयं सगणश्च विद्रुमः । यथा "भ्रूवल्लि चावयं मणोहवस्स ससितुल्लं वयणं, अंगं चामीअरप्पहं अहिणवकमलदलं नयणं । तीए हीरावलिं व दंतपंतिं विद्दुमं अहरं, पेच्छंताणं पुणो पुणो काण न हवइ मणं विहुरं" ११ ॐ रो मीर्मेघः ॥ रगणो मगणचतुष्टयं च मेघः यथा "मेहयं मचंतं गज्जंतं संनद्धं

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

पेच्छंता, उब्भडेहिं विज्जुज्जोएहिं घोरेहिं मुच्छंता । केअईगंधेणोद्दामेसुं मग्गेसुं गच्छंता, ते कहं जीअंते कंताणं दूरेणं अच्छंता" १२ ❀ **त्रयलगा विभ्रमः ॥** तगणरगणयगणा लघुगुरू च विभ्रमः । यथा "लायण्णविब्भमं तरंगंतिहिं निद्दड्ढवम्महं जिआवंतिहिं । प्रेमिं प्रियाहिं जे पुलोइज्जइं, ता मत्तलोइ सग्गु पाविज्जइ" १३ मेघविभ्रमौ वृद्धैरपभ्रंशे एव निबद्धाविति वर्णवृत्तेषु नोक्तौ । ❀ **चपजगगाः कुसुमः ॥** चतुर्मात्रः पञ्चमात्रो जगणो गुरुद्वयं च कुसुमः । यथा "निच्छिउ करिवि चंदु दोण्णि खंड, तहि निम्मिय मयनयणाइ गंड । वरकुसुम घडेविणुं गंधचंगु, कोमलु तह विरइओ एहु अंगु" १४ इहान्येपि चन्द्रकखञ्जकान्तचञ्चलचलतनुवीरप्रियकुपितरुष्टकृष्णसितधनदकुररशिवादयो रासकभेदा वृद्धैरुपनिबद्धास्ते तु क्वचित्केचिदन्तर्भवन्तीत्यस्माभिर्नोक्ताः । ❀ **ओजयुजोश्छडा रासः ॥** विषमसमयोः पादयोः यथासंख्यं छा इति सप्त डा इति त्रयोदश मात्रा यत्र स रासः । यथा "सुणिवि वसंति पुरपोढपुरंधिहं **रासु**, सुमरि विलडह हूओ तक्खणि पहिउ निरासु" १५ ❀ **पाचदाश्चिस्तृतीये पञ्चमे चो जो लीर्वा पञ्चाङ्घ्रिस्त्रिपात्पूर्वार्द्धा मात्रा ॥** ओजे पादे प्रथमे तृतीये पञ्चमे च द्वौ पञ्चमात्रावेकश्चतुर्मात्रो द्विमात्रश्चैकः युजि पादे द्वितीये चतुर्थे च चिश्चगणत्रयं तथा तृतीये पञ्चमे च पादे चतुर्मात्रो जो लीर्वा । एवं पञ्चपदी पादत्रयेण कृतपूर्वार्द्धा मात्रानामच्छन्दः । यथा "मत्तकोइलनायणंदीइ सिंगाररसोग्गंमिण, नच्चमाणमायंदपत्तहि । अहिणिज्जइ मयण जयनाडउव्व, संपइ वसंतिण" १६ प्रायो ग्रहणात्संस्कृतेपि यथा "शुष्कशिखरिणि कल्पशाखीव निधिरधनग्राम इव कमलखण्ड इव मारवेऽध्वनि । भवभीष्मारण्य इह वीक्षितोऽसि मुनिनाथ कथमपि" १७ ❀ **द्वितीये तुर्ये तयोर्वाद्यस्य चः स्थाने पो मत्तबालिका ॥** मात्रैव द्वितीये तुर्ये वा पादे क्रमेण युगपद्वा तयोराद्यस्य चगणस्य स्थाने पगणश्चेत्तदा मत्तबालिका । तत्र द्वितीये पादे प्रथमस्य चस्य स्थाने पो यथा "कुमुभकमलहं एक्कउप्पन्ति मउलेइ तुवि कमलवणु कुमुणसंदु(डु) निच्चुवि विआसइ । सच्छन्दविआरिणिअ चंदजोण्ह किं **मत्तबालिआ**" १९ चतुर्थे यथा "गहिरु गज्जइ धरइ मयवारि विहलंघुलु नहु कमइ दुन्निवारु दिसिदिसि पलोट्टइ । ओ **मत्तबालियसरिसु** विसमचेट्ठु पाउसु पयट्टइ" १८ द्वितीयचतुर्थयोर्यथा "पेच्छ पाउसलच्छि उच्छलइ मउलंति सव्वाओ दिस घडहडंति घणममत्तबालिअ, फुट्टंति केअइकुसुम पिइ पउत्थि कह जिअउ **बालिआ**" २० ❀ **तृतीयस्य तो मत्तमधुकरी ॥** मात्रैव द्वितीयतुर्ययोः पादयोः क्रमेण युगपद्वा तृतीयस्य चगणस्य स्थाने तगणश्चेत्तदा **मत्तमधुकरी** । तत्र द्वितीयपादे तृतीयचगणस्य ते मत्तमधुकरी यथा "**मृत्तमहुअरितारझंकारकलयंठिकलयलिहिं**, मयणधणुहट्टंकारससिहिं । कह जीवहुं विरहिरिणिउ,

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

८

दूरदेसपवसंतरमणिउ" २१ तुर्ये पादे यथा "फुडिअकेसरतिलयमायंदि पप्फुल्लिअकमलवणि, सुरहिमासि संपइ पयट्टइ । मत्तमहुअरिरविण मयणचरिउ वणलच्छि गायइ" २२ उभयोर्यथा "गुणविवज्जिइ पुरिसि रचेइ, गुणवन्ति परंमुही तह य पंकउपन्ति निवसइ । मत्तमहुअरि कमलि अहह, लच्छि अविआर विलसइ" २३ ॐ तृतीये पञ्चमे तयोर्वा पोश्चौ मत्तविलासिनी ॥ मात्रैव तृतीये पञ्चमे च पादे तयोर्वा युगपदाद्ययोः पगणयोः स्थाने चगणौ चेत्तदा मत्तविलासिनी । तत्र तृतीये पादे पोः स्थाने चौ यथा "समयमयगलगमणरमणिज्ज, मयभिंभलनयणजुओ । आरत्तकवोलसोहिरु, मत्तविलासिणिनिअरु, हरइ चित्तु लल्लुरपयंपिरु" २४ पञ्चमे यथा"मत्तजलहर गहिरु गज्जंति,केकारहिँ मत्तसिहिं, मत्तु मयणु पहरेइ दुज्जओ, विणु मत्तविलासिणिहिं भणि, संपइ कांइं किज्जउ" २५ उभयोर्यथा "तेज्जि पंडिअ तेज्जि गुणवंत ते तिहुअणसिर उवरि, ताहं चिअ जम्मु जाणहु, जे मत्तविलासिणिहिं नवि, खोइ(हि)अ सुद्धझाणओ" २६ ॐ चस्य पो मत्तकरिणी ॥ मात्रैव तृतीये पञ्चमे च पादे उभयोर्वा पादयोश्चगणस्य स्थाने पगणश्चेत्तदा मत्तकरिणी । तत्र तृतीये पादे चस्य स्थाने पो यथा "जासु अंगहिं घणु नसाजालु, जसु पिंगलनयणजुओ, जासु दंत पविरलविअडुन्नय, न धरिज्जइ दुहकरिणी मत्तकरिणि जिम्व घरणि दुन्नय" २७ पञ्चमे यथा "कहिं दिव्व कहिं ते मत्तकरिणी अ, कहिं घल्लिअ भिच्चभडा, निहित्त हयवरवहिल्लय, ढुंढोल्लिर गिरिगहणि इअ तुज्झ रिउ रोअहिं गहिल्लय" २८ उभयोर्यथा "जेत्थु गज्जहिं मत्तकरिणिवह, रंखोलहिं जत्थु हय, जेत्थु भिउडिभीसण भमंति भड, तहिं तेहइ रणि वरइ विजयलच्छि पइं पर समरोब्भड" २९ ॐ आभिर्वहुरूपा ॥ आभिर्मात्रादिभिः संकीर्णा वहुरूपा यथा "गाम्वि पट्टणि हट्टि चउहट्टि राउलि देउलि पुरि जं दीसइ । लडहअंगिअ विरहिंदजालएण, तं सा एक्कवि कय वहुरूवकलिआ" ३० अत्र प्रथमः पादो मात्राया द्वितीयो मत्तमधुकर्यास्तृतीयो मत्तविलासिन्याश्चतुर्थो मात्रायाः पञ्चमो मत्तकरिण्याः । ॐ आसां तृतीयस्य पञ्चमेनानुप्रासेऽन्ते दोहकादि चेद्रस्तु रड्डा(ड्डा)वा ॥ आसां मात्रादीनां तृतीयपादस्य पञ्चमेन पादेनाऽन्तेऽनुप्रासेऽन्ते दोहका पदोहका वदोहकाश्चेत्तदा रड्डा(ड्डा)वस्तु वा यथा "लुट्टिदुं चंदणवल्लिपल्लंकि सम्मि(कि)लिदु लवंगवणि खलिदु वत्थुरमणीयकयलिहिं । उच्छलिदु फणिलयहिं घुलिदु सरलकक्कोललवलिहिं, चुंबिदु माहविवल्लरिहिं पुलइदकामिसरीरु भमरसरिच्छउ संचरइ रड्डु(ड्डु)उ मलयसमीरु" ३१ मात्राप्रकरणम् ।

ॐ चौ लान्ततौ चौ तो वस्तुकम् ॥ चगणद्वयं द्वौ च लघ्वन्तौ तगणौ चगणद्वयं तगणश्च पादे चेत्तदा वस्तुकं चतुर्भिः पादैः । यथा "सुरवहुमहुअरिपंतिपीअगुणपरिमलजालहं, नहमणिकिरणकलावचारुकेसरनिअरालहं । पत्थुअवत्थुअगीतिचारुमुणिनिवहमरालहं,

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

तिहुअणसिरिकुलहरहं नमहु जिणपहपयकमलहं" १। ॐ षच्चिषा युज्यजच्च ओजे जो लीर्वा वस्तुवदनकम् ॥ एकः षण्मात्रश्च-गणत्रयं षण्मात्रश्च वस्तुवदनकम् । अत्रापवादः समे जगणरहितश्चगण ओजे जो लीर्वा यथा "मायाविअहं विरुद्धवायवसवंचिअलोअहं, परतित्थिअहं असारसत्थसंपाइअमोहहं। को पत्तिज्जइ सम्मदिट्ठि जहवत्थुअवयणहं, जिणहं मग्गि निश्चलनिहिंत्तमणु करुणाभवणहं" २ वस्तुकमित्यन्ये। अत्र केचित्षोडशभ्यो लघुभ्य आरभ्य लघुद्वयवृद्ध्या वंशादीन् वस्तुकविशेषानाहुः। यथा "वंसो वित्तो बालो वाहो वामो बलाहओ विंदो। विद्धो विसो विसालो विसारओ वासरो वेसो। १। तुंगो रंगो भिंगो, भिंगारो भीसणो भवो भालो। भद्दो भग्गो भट्टो भीरू तत्तो भडो भसलो।२। अलओ वलओ मलओ, मञ्जीरो मयमओ मओ माणी। महणो मसिणो मउलो महो मुहो मइहवो मुहलो।३। एए नामनिबद्धा, चउवीसकला हवंति वत्थुवया। सोलहलहुआउ लहुहिं, वड्ढमाणेहिं दोदोहिं।४। एते च वस्तुवदनकप्रस्तारान्तर्भूतत्वात्पृथग् न लक्षिताः। तत्प्रस्तारे हि अष्टौ कोटीकोट्यः समधिकास्ततः कियन्तो भेदाः परिगणयिष्यन्ते इत्यास्तां तावत्। ॐ षोऽजचः षपौ रासावलयम् ॥ आदौ षण्मात्रस्ततः जगणरहितः चतुर्मात्रस्ततः षण्मात्रपञ्चमात्रौ यत्र तद्रासावलयं यथा "माणु म मेल्हि गहिल्लिए निहुईहोहि खणु, उअयओ चंदु पयट्टओ रासावलय खणु। दिक्खिसु एहिवि नयणिहिं पइ हलि मयणहय, वल्लह पयह पडंति भणंतिअ वयणसय" ॥३॥ इदं चतुष्पदी वस्तुकं चेत्येके। ॐ द्वयोरर्द्धसङ्करे सङ्कीर्णम् ॥ द्वयोर्वस्तुवदनकरासावलययोरर्द्धयोः सङ्करे यदि वस्तुवदनकस्य पूर्वार्धं रासावलयस्योत्तरार्द्धं, रासावलयस्य वा पूर्वार्द्धं वस्तुवदनकस्योत्तरार्द्धं तदा सङ्कीर्णम् क्रमेण यथा "अविहडअवरुप्परपरूढ गणगंठिनिबद्धओ, अइआरिण हलि गलइ पेम्मु सरलिमसयलद्धओ। गाणमडप्फरु तुह न जुत्तु उत्तिमरमणि, भिंभणि वारउं वार वार वारणगमणि ॥ ४ ॥ सवणनिहिअहीरयहसंतकुंडलजुयलु थूलामलमुत्तावलिमंडिअथणकमल। सेअंसुअपंगुरणवहलसिरिहंडरसुज्जल बहुपहुल्लविअइल्ल फुल्लफुल्लाविअकुंतल ॥५॥ ॐ पचचाद्दो वदनकम् ॥ पचचेभ्यः परो द्विमात्रश्चेत्तदा वदनकं यथा "अज्जवि नयण न गेण्हइ तरलिम, अज्जवि वयणु न मेल्लइ भोलिम। अज्जवि थणहरु भरु न पडिच्छइ, तुवि मुद्धाहं दंसणि जगु मुज्झइ ॥६॥ केचित्समचतुष्पदीषु पचचदाः सङ्कुलकमिति पठन्ति, तदत्रैवान्तर्भूतम्। ॐ त उपवदनकम् ॥ पचचेभ्यः परस्त्रिमात्रश्चेत्तदोपवदनकम्। यथा "आमुलुवि बहुपंकिण संवलिअ सव्ववारपडिबोह सोहरहिय। कंटयसयसंसेविअजलसयण, जिणउववयणु न सोहहिं कमलवण" ॥७॥ ॐ ते यमितेऽन्तेऽडिला ॥ ते वदनकोपवदनके चतुर्णां पादानां द्वयोर्द्वयोर्वान्ते यमकिते सत्यडिला। तत्र चतुर्णां यथा "नवघणभमभमंतसारंगहं, कुंजकुसुमगुंजिरसारंगहं। मुहविलसंतअडिलसारंगहं। लीलावणहं तरुणि



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

सारंगहं" ८॥ द्वयोर्द्वयोर्यथा "जहिं छिज्जहिं नरसीस भुअग्गल, ते हु नरय हु जा दारभुअग्गल। सा मइं सुअणहं कह पारद्धिअ, जं निसुणंतं बुद्ध पारद्धिअ" ९॥ चतुर्णां यमके मडिलेत्यन्ये। ❀ पिदावुत्थक्कः॥ पगणत्रयं द्विमात्रश्चान्ते यमितं उत्थक्कः। अवस्थितक इत्यन्ये यथा "निद्दद्धदड्ढविरहानलेण, संतावतुलिअवडवाणलेण। मुत्थाविअ नवघणमंडलेण, उअ थक्क पहिअ कयधंधलेण" १०❀ धवलमष्टपात्षट्पाच्चतुष्पात्॥ अष्टपात्षट्पाच्चतुष्पाच्च धवलं नामच्छन्दः। यदाह। धवलनिहेण सुपुरिसो, वण्णिज्जइ जेण तेण सो धवलो। धवलोवि होइ तिविहो, अट्ठपओ छप्पओ चउप्पाओ" ११॥ धवलानि च सातवाहनोक्तिपु द्रष्टव्यानि। दिग्मात्रं तूदाहरिष्यते। ❀ तत्राष्टांह्रावोजे चिदौ समे चौ श्रीधवलम्। तत्र धवलेपु मध्येऽष्टांह्रौ धवले विपमेपु पादेपु चत्रयं द्विमात्रश्चैकः, समेपु पादेपु चद्वयं यत्र तच्छ्रीधवलं वसन्तलेखेत्यन्ये। यथा "खीरसमुद्दिण लवणजलहि, कुवलय कुमुयहिं, कालिंदी सुरसिंधु जलिण, महुमहणु हरिण। कइलासिण सरिसउ हू किरि, सो अंजणगिरि, इह तुह जससिरि धवलिओं पहु, किं पंडुरु नहु" १२ ❀ आद्ये तृतीये चिदौ द्वितीये तुर्ये चिः शेषे त्वोजे चातौ समे चादौ चिर्वा यशोधवलम्। अष्टांह्रौ धवले आद्यतृतीययोः पादयोश्चगणत्रयं द्विमात्रश्च। द्वितीयतुर्ययोश्चगणत्रयं। शेपेपु चतुर्पु पादेष्वोजयोः पञ्चमसप्तमयोर्द्वौ चगणौ त्रिमात्रश्चैकः समयोः। पष्ठाष्टमयोः चगणद्वयं द्विमात्रश्चैकः। मतान्तरे चगणत्रयं वा यत्र तद्यशोधवलम्। यथा "जे तुह पिच्छहि वयणकमलु, ससहरमंडलनिम्मलु, जेविहु पालहिं भिच्चकम्मु, थुणहिं जि निरुवमु विक्कमु॥ जेविहु सासणु धरहिं, पायकमलुं जे पणमहिं, ता हंत लच्छी विमुह पहु जसधवलिधदिसिमुह" १३ ❀ षडंह्रावाद्ये तुर्ये षादौ द्वितीये पञ्चमे चौ शेषे षाभ्यां चःपो वा कीर्त्तिधवलम्। तत्र पडंह्रौ धवले प्रथमे चतुर्थे च पादे द्वौ पण्मात्रावेको द्विमात्रो, द्वितीये पञ्चमे च पादे द्वौ चतुर्मात्रौ, शेपे तृतीये पष्ठे च षगणद्वयात्परश्चतुर्मात्रः पंचमात्रो वा चेत्तदा कीर्तिधवलम् यथा "उक्करडा खलचउगजउ, चिरु जुज्झुमणु, उन्नामउ सिरु कसरु म लज्जओ, थक्क महब्भर तुहु कट्टहिं। अन्नुन्न तिहुअणि कित्ति धवल विसाओ तुह वट्टइ" १४ ❀ चतुरंह्रावोजे षश्चौ समे षचचाद्दस्तो वा गुणधवलम्। तत्र चतुरंह्रौ धवले विपमपादयोरेकः पण्मात्रो द्वौ चतुर्मात्रौ, समयोः पचचेभ्यः परो द्विमात्रस्त्रिमात्रो वा चेत्तदा गुणधवलं यथा "कद्दमभग्गा मग्गुलया, बहुपिहुला दुत्तरजलुल्लया। तिम्व भरु वहसु गुणधवलया, जिम्व केम्वइ न हसन्ति पिसुणया" १५ ❀ षचताः षचौ भ्रमरः। ओजपादयोः पण्मात्रचतुर्मात्रत्रिमात्राः समयोः पण्मात्रचतुर्मात्रौ चेत्तदा भ्रमरो धवलम् यथा "कित्ति तहारी वण्णविणु कइ अन्नुन (न्न) वणहिं। मालइ माणिवि किं भमर धत्तुरइ लग्गहिं" १६ ❀ षचताः षचचा अमरम्। ओजे षण्मात्रचतुर्मात्रत्रिमात्राः समे पण्मात्र एकश्चतुर्मात्रो द्वौ चेत्तदाऽमरं धवलम्। यथा "इंदहु तुहुं



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

गुणि अहियउ, सग्गुवि पहु मइं वाहिअउ । अमरविलासिणि गीअए, तुह पर कित्ति निसामिअए" १७ ॐ आद्ययोः षचौ अन्त्ययोश्चुः सर्वत्रान्ते तो दो वा मङ्गलम् । आद्ययोः प्रथमद्वितीययोः पादयोः प्रत्येकं पगणश्चगणत्रयं च, अन्त्ययोस्तृतीयचतुर्थयोः प्रत्येकं चगणपञ्चकं सर्वपादेषु चान्ते त्रिमात्रो द्विमात्रो वा चेत्तदा मङ्गलार्थसंबद्धत्वात् मङ्गलम् यथा "तुह असिलट्ठिहिं नरवइ मङ्गलकारणि, वित्थारिअ निम्मलयर सत्थिअधोरणि । संगररंगि विवाहमहूसवि जयलच्छिहिं, दारिअमयगलकुंभत्थलमोत्तियगुच्छिहिं" १८ ॐ उत्साहादिना येनैव धवलमङ्गलभाषागाने तन्नामाद्ये धवलमङ्गले ॥ उत्साहादीत्यादिग्रहणात्, प्रक्रान्तानां रासावलयादीनां पूर्वोक्तानां हेलादीनां वक्ष्यमाणानां दोहकादीनां च ग्रहणं, तन्नामाद्ये इति उत्साहादिनामपूर्वके । यथा । उत्साहधवलं वदनधवलं हेलाधवलं दोहकधवलं चेति । एवं मङ्गलेपि उत्साहमङ्गलादि वाच्यं । यदाहुः "उत्साहहेलावदनाडिलाद्यैर्यद्गीयते मङ्गलवाचि किञ्चित् । तद्रूपकाणामभिधानपूर्वं, छन्दोविदो मङ्गलमामनन्ति ॥१॥ तैरेव धवलव्याजात्पुरुषः स्तूयते यदा । तद्वदेव तदानेको धवलोऽप्यभिधीयते ॥२॥" ॐ देवगानं फुल्लडकम् ॥ उत्साहादिना येनैव देवो गीयते तत्फुल्लडकम् । ॐ गाने चिदौ झम्बटकम् ॥ यस्य कस्यचिद्गाने चगणत्रयं द्विमात्रश्च पादे चेत्तदा झम्बटकं । यथा "पहु तुह वेरि अरण्णिगय, निचुवि निवसहिं जिम्व ससय । घणकंटयदुसंचरणि, तहिं झंबडइ करीरवणि" १९ ॥ वक्ष्यमाणा गन्धोदकधारैवेयं गानवशाज्झम्बटकसंज्ञां लभते । उत्साहादिप्रकरणम् ।

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोनुशासनवृत्तावुत्साहादिप्रतिपादनः पञ्चमोऽध्यायः ॥

ॐ सन्ध्यादौ कडवकान्ते च ध्रुवं स्यादिति ध्रुवा ध्रुवकं घत्ता वा ॐ कडवकसमूहात्मकः सन्धिस्तस्यादौ चतुर्भिः पद्धडिकाद्यैश्छन्दोभिः कडवकम् । तस्यान्ते ध्रुवं निश्चितं स्यादिति ध्रुवा, ध्रुवकं, घत्ता वेति संज्ञान्तरम् । ॐ सा त्रेधा षट्पदी चतुष्पदी द्विपदी च ॥ सेति ध्रुवा । ॐ कडवकान्ते प्रारब्धार्थोपसंहारे आद्ये छड्डुणिका च ॥ प्रारब्धस्य प्रकरणायातस्यार्थस्य कडवकान्ते भङ्ग्यन्तरेणाभिधाने षट्पदीचतुष्पद्यावेव छड्डुणिकासंज्ञे, न केवलं ध्रुवादिसंज्ञे छड्डुणिकासंज्ञे चेति चार्थः । षट्पदीचतुष्पदीध्रुवयोश्च सप्तकलादयः सप्तदशकलान्ताः पादा भवन्तीति तेषु गणनियममाह—ॐ ध्रुवायां छैः कलाभिः पादे चतौ पदौ वा ॥ ध्रुवायां छैरिति सप्तभिः कलाभिः पादे चतुर्मात्रत्रिमात्रौ पंचमात्रद्विमात्रौ वा गणौ भवतः । ॐ जैः पतौ षदौ चौ वा ॥ जैरित्यष्टभिः कलाभिः पादे पंचमात्रत्रिमात्रौ षण्मात्रद्विमात्रौ द्वौ वा चतुर्मात्रौ गणौ भवतः । ॐ झैः षतौ तिः पचौ वा । झैरिति नवभिः कलाभिः पादे षण्मात्रत्रिमात्रौ त्रिमात्रत्रयं पञ्चमात्रचतुर्मात्रौ वा गणौ भवतः । ॐ ञैश्चादौ षचौ पौ वा । ञैरिति दशभिः कलाभिः पादे चतुर्मात्रद्वयद्विमात्रौ

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

षण्मात्रचतुर्मात्रौ, द्वौ वा पञ्चमात्रौ गणौ भवतः । ❀ टैश्चपदं पचदं षदतं चातौ वा ॥ टैरित्येकादशभिः कलाभिः पादे चतुर्मात्रपञ्चमात्रद्विमात्राः पञ्चमात्रचतुर्मात्रद्विमात्राः षण्मात्रद्विमात्रत्रिमात्राश्चतुर्मात्रद्वयत्रिमात्रौ वा गणा भवन्ति । ❀ ठैश्चपतं षचदं पादौ चिर्वा । ठैरिति द्वादशभिः कलाभिः पादे चतुर्मात्रपञ्चमात्रत्रिमात्राः षण्मात्रचतुर्मात्रद्विमात्राः पगणद्वयद्विमात्रौ, चतुर्मात्रत्रयं वा, गणा भवन्ति । ❀ डैः पातौ चापौ षचतं वा । डैरिति त्रयोदशभिः कलाभिः पादे पंचमात्रद्वयत्रिमात्रौ, चतुर्मात्रद्वयपञ्चमात्रौ, षण्मात्रचतुर्मात्रत्रिमात्रा वा गणा भवन्ति । ❀ ढैश्चिदौ षचचं वा ॥ ढैरिति चतुर्दशभिः कलाभिः पादे चतुर्मात्रत्रयद्विमात्रौ पचचा वा गणा भवन्ति । ❀ णैश्चितौ पिर्वा । णैरिति पञ्चदशभिः कलाभिः पादे चतुर्मात्रत्रयत्रिमात्रौ, त्रयो वा पञ्चमात्रा गणा भवन्ति । ❀ तैः षचादं चीर्वा । तैरिति षोडशभिः कलाभिः पादे षण्मात्रचतुर्मात्रद्वयद्विमात्राश्चत्वारो वा चतुर्मात्रा गणा भवन्ति ।❀ थैः षचातं चिपौ वा । थैरिति सप्तदशभि कलाभिः पादे षण्मात्रचतुर्मात्रद्वयत्रिमात्राश्चतुर्मात्रत्रयपञ्चमात्रौ वा गणा भवन्ति । एवं च सप्तादिसप्तदशान्तकलौघेभ्यस्त्रिभिरतुल्यैस्तुल्यातुल्यैः तुल्यैर्वार्द्धे पादा यत्र भवन्ति सा विदग्धगोष्ठी गरिष्ठा षद्वदी ध्रुवा । षद्वदीषु चाद्यस्य पादस्य द्वितीयेन तृतीयस्य षष्ठेन चतुर्थस्य पञ्चमेनानुप्रासः कर्तव्यः । चतुष्पदीष्वाद्यस्य द्वितीयेन तृतीयस्य चतुर्थेन । अन्तरसमासु सङ्कीर्णासु च प्रायेण द्वितीयस्य चतुर्थेनानुप्रासः कार्यः । तत्र षट्पदीभेदानाह ।❀तृतीयषष्ठयोर्दशादिसप्तदशान्ताः कलाः, शेषेषु, सप्त षद्वदी, षद्वदजातिरष्टधा । तृतीयषष्ठयोः पादयोः दशादयो मात्रा एकैकवृद्ध्या यावत् सप्तदश । अन्येषु चतुर्षु पादेषु सप्तैव यत्र भवन्ति, सा षद्वदजातिर्नाम षद्वदी भवति । सा च दशादीनां सप्तदशान्तानामष्टविधत्वादष्टधा । तत्राद्या यथा "इअ नारिहिं रससारिहिं, मुहपरिमललुद्धओ । दुरु ढोल्लइ, नहु मेल्लइ, छप्पयगणु मुद्धओ"१ एवं शेषभेदेपूदाहार्यम् । ❀ अष्टौ उपजातिः । तृतीयषष्ठयोः पादयोर्दशादिसप्तदशान्ताः कलाः शेषेष्वष्टौ चेत्तदोपजातिर्नाम षद्वदी । पूर्ववदष्टधा । तत्राद्या यथा "इअ उवजाइहिं, सुरहिअवाइहिं, गुंजिरवण छप्पउ उववणसारओ, केअइफारओ, कसु नवि रइ अप्पओ" २ एवं शेषभेदेपूदहार्यम् । ❀ नवावजातिः । तृतीयषष्ठयोः पादयोर्दशादि सप्तदशान्ताः कलाः शेषेषु नव चेत्तदाऽवजातिर्नाम षद्वदी । पूर्ववदष्टधा । तत्राद्या यथा "इअ वणराइहिं, अहिणवजाइहिं, छप्पओ परिभमइ, मालइरत्तओ, महुरसे मत्तओ, जलयागमसमइ" ३ एवं शेषभेदेपूदाहार्यम् । एवं षद्वदजात्युपजात्यवजातीनां प्रत्येकमष्टविधत्वाचतुर्विंशतिधा षद्वदी । ❀ चतुष्पदी वस्तुकं वान्तरसमार्द्धसमा संकीर्णा सर्वसमा च ॥ वस्तुकमिति चतुष्पद्या एव नामान्तरं, तुल्यसमपादा तुल्यविषमपादा च अन्तरेण व्यवधानेन समान्तरसमा । तुल्यप्रथमद्वितीयपादा तुल्यतृतीयचतुर्थपादा चार्धं सममस्या अर्द्ध- ॥ ३८ ॥

P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

समा । व्यामिश्रा सङ्कीर्णा । तुल्यचतुष्पदा सर्वसमा । तत्रान्तरसमाः प्राह । ※ चतुष्पदी कला ओजे सप्ताद्याः षोडशान्ताः समे प्रत्येकं सैकाः सप्तदशान्ताः चम्पककुसुम सामुद्रक मल्हणक सुभगविलास केसर रावणहस्तक सिंहविजृम्भित मकरन्दिका मधुकरविलसित चम्पककुसुमावर्त्ताः । १० मणिरत्नप्रभा कुङ्कुमतिलक चम्पकशेखर क्रीडनक वकुलामोद मन्मथतिलक मालाविलसित पुण्यामलक नवकुसुमितपल्लवाः । ९ मलयमारुत मदनावास माङ्गलिकाभिसारिका कुसुमनिरन्तर मदनोद्देक चन्द्रोद्योत रत्नावल्यः ॥ ८ भ्रूचक्रणक मुक्ताफलमाला कोकिलावली मधुकरवृन्द केतकीकुसुम नवविद्युन्माला त्रिवलीतरङ्गकाणि ॥ ७ अरविन्दक विभ्रमविलसितवदन नवपुष्पन्धय किन्नरमिथुनविलास विद्याधरलीला सारङ्गाः ॥ ६ कामिनीहासापदोहक प्रेमविलास काञ्चनमाला जलधरविलसिताः ॥ ५ अभिनवमृगाङ्कलेखा सहकारकुसुममञ्जरी कामिनीक्रीडनक कामिनीकङ्कणहस्तकाः ॥ ४ मुखपालनतिलक वसन्तलेखा मधुरालापिनीहस्ताः ॥ ३ मुखपङ्क्ति कुसुमलतागृहे ॥ रत्नमालेति पञ्चपञ्चाशद्भेदाः ॥ ओजयोः सप्ताद्याः षोडशान्ताः कलाः समयोस्ता एवैकाधिकाद्याः सप्तदशान्ताः प्रत्येकं यत्र भवन्ति सा चतुष्पदी चम्पककुसुमादिसंज्ञा । अयमर्थः— ओजे सप्त कलाः समे सैकाद्या अष्टाद्याः सप्तदशान्ता यत्र भवन्ति सा चम्पककुसुमादिभेदेन दशविधा । एवमोजेऽष्टकलाः समे सैकाद्या नवाद्याः सप्तदशान्ता यत्र भवन्ति सा मणिरत्नप्रभादिभेदेन नवविधा । तथा ओजे नव समे सैकाद्याः दशाद्याः सप्तदशान्ता यत्र भवन्ति सा चतुष्पदी मलयमारुतादिभेदेनाष्टविधा । यावदोजे षोडश समे सप्तदश यत्र भवन्ति सा रत्नमालासंज्ञा चतुष्पदी । एवं पञ्चपञ्चाशच्चतुष्पदीभेदाः । तत्रौजे सप्त समेऽष्टौ चम्पककुसुमम् । यथा "अंगचंगिमजइ गोरंगिहिं । चंपयकुसुम ता कह अग्घहिम्" ४ ओजे सप्त समे नव सामुद्रकम् । यथा "जइ बोल्लइ, घणउक्कंठिअ । सा मुद्दओ मुद्ध कलयंठिअ" ५ ओजे सप्त समे दश मल्हाणकं यथा "कहिं हंसिहिं, तल्लोव्वेल्लणउं । जउ दीसइ, गओ तहिं मल्हणउं" ६ ओजे सप्त समे एकादश सुभगविलासः । यथा "पइं विणु तहिं, सुहयविलासु कवणु । विणु चंदइं मुद्ध, जामिणिहिं कवणु ७ ओजे सप्त समे द्वादश केसरम् । यथा "मेल्लि माणु वल्लहि करि अणुराउओ । उद्दिओ ! केसरकुसुमपराओ" ८ ओजे सप्त समे त्रयोदश रावणहस्तकः । यथा "लेहि वीण करि, धरि रावणहत्थउ । जिणमज्जणि सुरहिं, दिन्नु सव्व हत्थउ" ९ ओजे सप्त समे चतुर्दश सिंहविजृम्भितम् । यथा "छुहखामुवि, जं मयजूहु न तिणु । चरइ तं अज्जविसी सीहविअंभिउ विप्फुरइ" १० ओजे सप्त समे पञ्चदश मकर-

P. P. Ac. Gunratnasuriji M.S.
Jin Gun Aaradhak Trust

न्दिका। यथा "कुसुमंतरि, नवि लग्गइ अलि अवनिद्दियइ। आसत्तओ, मालइहि बहलमयरंदिअहि" ११ ओजे सप्त समे षोडश मधुकरविलसितम्। यथा "जं जाइहिं, कित्ति दिअतरु धवलइ सयलु। तं जाणसु, माणिणि महुअरविलसिउ पवलु" १२ ओजे सप्त समे सप्तदश चम्पककुसुमावर्त्तो यथा "निअइ मुणइ, परिरंभइ चुम्बइ महुसुंडओ। अलि मुज्झइ, चंपयकुसुमावट्टि निवुडुओ" १३ एवं दश। तथा ओजे अष्टौ समे नव मणिरत्नप्रभा। यथा "मणिरयणपहा, पयडिअगिरिगुहु। साहइ भरहु, सयलुवि दिसिमुहु १४ ओजे अष्टौ समे दश कुङ्कुमतिलकम्। यथा "रेहइ चंदो, नवपयडिअकलओ। पुव्वदिसाए, किर कुंकुमतिलओ" १५ ओजे अष्टौ समे एकादश चम्पकशेखरो। यथा "अलिरवगीई, कयचंपयसिहर। महुसमयसिरी, ओअ जणहु मणोहर" १६। ओजे अष्टौ समे द्वादश क्रीडनकम्। यथा "सहि वद्दुलओ, चन्दुल्लओ पडिहाइ। रयणिवहूए, कीलणगेंडुओ ताइ" १७ ओजे अष्टौ समे त्रयोदश बकुलामोदो यथा "मन्नावि प्रिओ, जइवि हु सो कयदुन्नओ। जं महमहइ, दुसहउ बउलामोअउ" १८ ओजे अष्टौ समे चतुर्दश मन्मथतिलकम्। यथा "निम्मलि गयणि, समुग्गओ चंदु विहावइ। रइपरइओ, वम्महतिलओ नवु नावइ" १९ ओजे अष्टौ समे पञ्चदश मालाविलसितम्। यथा "कमलिणिपासि, अलिमाला विसलसिअ संपइ। कलरवमिसिण, किर मित्तसमागमु जंपइ" २० ओजे अष्टौ समे षोडश पुण्यामलकम्। यथा "मइं असरण, तुहुं अइनिद्दयं नडसि कुसुमहि उह। जं किर पुप्फा मलयसमीरिण सयलवि कउह" २१ ओजे अष्टौ समे सप्तदश नवकुसुमितपल्लवो यथा "कंपिअ निअवि, नवकुसुमिअपल्लव सललिअ लय। संभरि दइअ, पंथिअसत्थ तक्खणि गय विलय" २२ एवं नव। तथा ओजे नव समे दश मलयमारुतो यथा "देक्खिवि वेल्लडी, मलयमारुअधुआ। सुमरिवि गोरडी, पंथिअसत्थ मुआ" २३ ओजे नव समे एकादश मदनावासो यथा "जं घण लोअण, झसझयचल दीसहिं। मयणावासउ, तं घणगुहिर सइ" २४ ओजे नव समे द्वादश माङ्गलिका। यथा "प्रियमहुसंगमि, ओअ मंगलिअइं करइं। किंसुअरूविण, वणसिरि घट्टइं धरइ" २५ ओजे नव समे त्रयोदशाभिसारिका। यथा "काली रत्तडी, घणिहिं नहंगणु रुद्धओ। तोवि न वट्टहिं, अहिसारिअजणु खुद्दओ" २६ ओजे नव समे चतुर्दश कुसुमनिरन्तरो यथा "सिद्धत्थपुल्य, कुसुमनिरन्तरु हसिओ सिओ। नवदइआगमि, अगिजि मंगलु धणइ किउ" २७ ओजे नव समे पञ्चदश मदनोदकम्। यथा "घणरवदूसहा, दूहवइ मयणोदओ हिअओ। पिअदूरहिआ, पवसिअरमणिअणु कह जिअओ" २८ ओजे नव समे षोडश चन्द्रोद्योतो यथा "कोइलकलरवु, चंदणु चंदुज्जोअविलासु। वल्लहसङ्गमि, अमयरसु विरहि जलिउ हुआसु" २९ ओजे नव समे सप्तदश



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

रत्नावली। यथा "मालइ मालहिं, अलि सहहिं नवमयरंदसइण्ह । न रयणावलि, नीलमयपाउसदइइण दिण्ण" ३० एवमष्ट। तथा ओजे दश समे एकादश भ्रूचक्रणकम्। यथा "रेहइ तरुणिअणु, भूचंकंण चङ्गओ। आणावइ नाइ, तिहुअण जइ अंगओ" ३१ ओजे दश समे द्वादश मुक्ताफलमाला। यथा "तारावलि भणि मा, भणि मुत्ताहलमाली । रइकलहिण त्रुटी, ससिरयणिहुं सुविसालि" ३२ ओजे दश समे त्रयोदश कोकिलावली। यथा "कोइलावलिकए, संगीअइ नचावओ। नवलयविलयाओ, मलयानिलु नट्टावउ" ३३ ओजे दश समे चतुर्दश मधुकरवृन्दम्। यथा "फुल्लियलय निअवि, महुअरवंद्रिण गीउ तह। बाहोल्लयनयण, पयमवि पहिअ न दिंति जह" ३४ ओजे दश समे पञ्चदश केतकीकुसुमम्। यथा "विंवालिउ भुवणु, नवकेयइकुसुमपराइण । नं अहिवासिअउं, मयरद्धयकम्मणजोइण" ३५ ओजे दश समे पोडश नवविद्युन्माला। यथा "ओ चलचलंतिआ, विप्फुरेइ नवविज्जुमालिआ। महरक्खसस्स जोहिअव्व दीहरकरालिआ" ३६ ओजे दश समे सप्तदश त्रिवलीतरङ्गकम्। यथा॥ "दीहरच्छीआए, पेच्छ सहए तिवलीतरंगयं। कय तिहुअणविजए, लीहतिअं पि व कामिण कड्ढिअं" ३७ एवं सप्त। तथा ओजे एकादश समे द्वादश अरविन्दकम्। यथा "प्रिअहि मुहु अरविन्दु चलनयण इन्दिदिरु । दन्तकन्तिकेसरु, लच्छिविलासमन्दिरु" ३८ ओजे एकादश समे त्रयोदश विभ्रमविलसितवदनम्। यथा "कुइ धन्नु जुआणउ, विअसिअदीहरनयणिए । माणिज्जइ तरुणिए, विब्भमविलसियनयणिए" ३९ ओजे एकादश समे चतुर्दश नवपुष्पन्धयम्। यथा "सहि पंकोप्पन्नुवि, कमलु तं लसहिओ वुहसइहिं। जं रसउद्धुसिअहिं, पिज्जइ नवफुल्लंधुअहिं" ४० ओजे एकादश समे पञ्चदश किन्नरमिथुनविलासो। यथा॥ "अविरहिअहं मुइअहं, हरिणहंजि रइसुहु सलीसए। पर एम्वइ कीम्वइ, जसु किन्नरमिहुणविलासए" ४१ ओजे एकादश समे पोडश विद्याधरलीला। यथा "मुद्धइ गिज्जंतउं, तुहु कन्नरसायणु गीउ सुणि। जिण ओहामिज्जइ, विज्जाहरलीला गीइझुणि" ४२ ओजे एकादश समे सप्तदश सारङ्गो यथा "भीरुवि चंदट्ठिओ वरि परिमुणिअनावु सारंगओ। सीहु न सलहिज्जइ जइविहुं दलिअमत्तमायंगओ" ४३ एवं पट्। तथा ओजे द्वादश समे त्रयोदश कामिनीहासो यथा "मणहरु तुहु मुहसररुह, रयणीअरविब्भमु धरइ । कामिणिहासविलासुवि, जोण्हापसरहु अणुहरइ" ४४ ओजे द्वादश समे चतुर्दशापदोहको यथा "एत्थु करिमि भणि काइं प्रिउ, न गणइ लग्गी पाइ । छदेविणु हउं मुक्की, अवदोहय जिम्व किर गावि" ४६ ओजे द्वादश समे पंचदश प्रेमविलासो यथा "कित्तिओ वण्णउं मयणु, किअउ जिण सोवि नारायणु। तहु गोवाली अणहु, वणपिम्मविलासपरायणु" ४६ ओजे द्वादश समे पोडक्ष काञ्चनमाला। यथा "दीसइ सुरधणुलट्ठी, साम्वल-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

छंदोनु

॥ ४० ॥

गोरवणसोहिल्ली । मरगयकंचणमाली णं घणलच्छिहि कंठि नवल्ली" ४७ ओजे द्वादश समे सप्तदश जलधरविलसिता । यथा "पिक्खिऊण गयणयलि नवजलहरविलसिअ चलविज्जुल । संभरंति निअपिअहं, पहिअदइअ गलिअंसुअकज्जल" ४८ एवं पञ्च । तथा ओजे त्रयोदश समे चतुर्दशाऽसिनवमृगाङ्कलेखा । यथा "नहयलवराहदाढिआ, वारुणिवहूइ णिडालिआ । अहिणवमिअंकलेहिआ, उप्पइ पीइं निहालिआ" ४९ ओजे त्रयोदश समे पञ्चदश सहकारकुसुममञ्जरी । यथा "वणलच्छिकणयरमणिआ, कुसुमाउहविजयपडाइया । सहयारकुसुममंजरी, ओअह महुसमएण पयडिआ" ५० ओजे त्रयोदश समे षोडश कामिनीक्रीडनकम् । यथा "नहलच्छिभालतिलअओ, दिसिकामिणिकीलणगंदुअओ । रेहइ पुप्फमयंकओ, मयणाहिसेअअमयकलसओ" ॥ ओजे त्रयोदश समे सप्तदश कामिनीकङ्कणहस्तको । यथा "कवणु सु धन्नउ जिण विणु कामिणिकंकणहत्थओ विअलहिं । अन्नु कि एम्वइ ससिमुहि, हिंडइ उन्नमिइहिं करकमलिहिं" ५१ एवं चत्वारः । तथा । ओजे चतुर्दश समे पञ्चदश मुखपालनतिलकः । यथा "इह माहवि वम्महनिलय, मलयानिलहल्लिरकिसलय । ओ दीसहिं कुसुमाओलय, कामिणिहुं मुहवालणतिलय" ५३ ओजे चतुर्दश समे षोडश वसन्तलेखा । यथा "कुविदो मयणो महाभडो, वणलच्छी अ वसंतरेहिआ । कह जीवउ मा(सा)मि विरहिणी, मिउमलयानिलफंसमोहिआ" ५४ ओजे चतुर्दश समे सप्तदश मधुरालापिनीहस्तो । यथा "सुन्दरु तं किओ एहू सहि, पिओ जं म(भ)णिउ विणयनिसण्णओ । तसु अवराहहं सव्वहंवि, महुरालाविणिहत्थु विइण्णओ" ५५ एवं त्रयः । तथा । ओजे पञ्चदश समे षोडश मुखपङ्क्तिर्यथा "परनरमुहुपेच्छणविरयए, पथनहमणिपडिबिंबिअ जि परि । दहमुहमुहपंति पलोइआ, सीअए भयविम्हयहासकरि" ५६ ओजे पञ्चदश समे सप्तदश कुसुमलतागृहम् । यथा "जलइ जइवि कुसुमलयाहरु, तवइ चंदु जह गिम्हि दिवायरु । तुवि ईसाभरपरितरलिअ, पिअसहि वयणु न मन्नइ बालिअ" ५७ एवं द्वे । ओजे षोडश समे सप्तदश रत्नमाला । यथा "करवालपहारिण उच्छलिल, करिसिरमुत्ताहलरयणमाला । रेहइ समरंगणि जयसिरिए, उक्खिविअ नाइसयं वरमाला" ५८ अत्रैकः । एवं पञ्चपञ्चाशद्भेदाः । ॐ व्यत्यये सुमनोरमा[1] पङ्कज[2] कुञ्जर[3] मदनातुर[4] भ्रमरावली[5] पङ्कजश्री[6] किङ्किणी[7] कुङ्कुमलता[8] शशिशेखर[9] लीलालया[10] १० चन्द्रहास[11] गोरोचना[12] कुसुमबाण[13] मालतीकुसुम[14] नागकेसर[15] नवचम्पकमाला[16] विद्याधर[17] कुब्जककुसुम[18] कुसुमास्तरणाः[19] ९ मधुकरीसंलाप[20] सुखावास[21] कुङ्कुमलेखा[22] कुवलयदाम[23] कलहंस[24] सन्ध्यावली[25] कुञ्जरललिता[26] कुसुमावल्यः[27] ॥ ८ विद्युल्लता[28] पञ्चाननललिता[29] मरकतमाला[30] अभिनववसन्तश्री[31] मनोहरा[32] क्षितिका[33] किन्नरलीलाः[34] ॥ ७ मकरध्वजहास[35] कुसुमाकुल[36]-

शासन.

॥ ४० ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

मधुकर भ्रमरविलास मदनविलास विद्याधरहास कुसुमायुधशेखराः ६ उपदोहक दोहक चन्द्रलेखिका सुतालिङ्गन कङ्केल्लिलताभवनानि ५ कुसुमितकेतकीहस्त कुञ्जरविलसित राजहंसाऽशोकपल्लवच्छायाः ४ अनङ्गललिता मन्मथविलसितान्दोलनकानि ३ कज्जलरेखा किलिकिञ्चिते शशिबिम्बितं चेति तावद्धा ॥ व्यत्यय इति समे सप्ताद्याः षोडशान्ताः कला ओजे सैकाद्याः सप्तदशान्ताः प्रत्येकं पूर्ववत्सुमनोरमादिसंज्ञाश्चतुष्पद्यो भवन्ति। तत्र समे सप्तकलाः ओजे अष्टौ यत्र भवन्ति सा सुमनोरमा । यथा "केआरावु, करि मोर मा। दूरि स गोरी, सुमणोरमा" ५९ समे सप्त ओजे नव पङ्कजम्। यथा॥ "निअवि वयणु, तहिं विब्भमपओ । नं विहिण खित्तु, द्रहि पंकओ" ६० समे सप्त ओजे दश कुञ्जरो। यथा "गज्जइ घणमाला, घणघडहड। नं मयणनिवइणो, कुंजरघड" ६१ समे सप्त ओजे एकादश मदनातुरो। यथा "खलिअक्खरउं, वयणु मुहु पंडरु। तुह अक्खइ सहि, मणु मयणाउरु" ६२ समे सप्त ओजे द्वादश भ्रमरावली । यथा "ओ रणझणंत, भमइ भमरावलि। मयणधणुह, गुणवल्लि णं सामलि" ६३ समे सप्त ओजे त्रयोदश पङ्कजश्रीर्यथा "तहि भुमयहि पडिछंदुलो, धणु मयणहु। नवपंकयसिरि सोअरी, तसु वयणहु" ६४ समे सप्त ओजे चतुर्दश किङ्कणी। यथा "ससिणा रयणीए रइभरे, उल्लालिअओ। किंकिणिआउ न हु इमा, उडुमालिआ" ६५ समे सप्त ओजे पञ्चदश कुङ्कुमलता। यथा "गोरडिअहिं उवभिअइ न पर, अच्चब्भुअ। जइ किर हवइ फुल्लिअफलिअ, कुङ्कुमलय" ६६ समे सप्त ओजे षोडश शशिशेखरो यथा॥ "लंघइ सायर गिरि, आरुहइ, तुहअहंग। ससिसेहरहसिउज्जल नउक्खी, कित्तिगंग" ६७ समे सप्त ओजे सप्तदश लीलालयो यथा "जं सहि कोइल कलु पुक्कारइ, फुल्लु निलओ। तं पत्तु वसंतु मासु कामहु, लीलालओ" ६८ एवं दश । तथा समेऽष्टावोजे नव चन्द्रहासो। यथा "रेहइ तुह करि, चंदहासओ। नं रिउसिरीए, केसपासओ" ६९ समेऽष्टावोजे दश गोरोचना। यथा "गोरोअणगोरी, तुब्भ कओलु। पडिमाइ चुंबइ, ससहरु लोलु" ७० समेऽष्टावोजे एकादश कुसुमबाणो। यथा "जसु लोहचक्किणवि, न दलिओ झाणु। तहिं वीरि किं करउ, स कुसुमबाणु" ७१ समेऽष्टावोजे द्वादश मालतीकुसुमम्। यथा "मालइकुसुमु न लेइ, चंदणु चयइ । तुह दंसणउम्माही, मग्गु जि निअइ" ७२ समेऽष्टावोजे त्रयोदश नागकेसरो। यथा "दीसइ उववणि, फुल्लिओ नायकेसरो । नं माहविण वणसिरिहि दिण्ण सेहरो" ७२ समेऽष्टावोजे चतुर्दश नवचम्पकमाला । यथा "तणु नवचंपयमाल, जिण करकमकमला । सहि तुहुं माहवलच्छि, तिण परिमलबहल" ७४ समेऽष्टावोजे पञ्चदश विद्याधरो। यथा "मुहि करिवि मयलंलणुणुगुलिअ, गुलिआसिद्धिं।

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

विज्जाहरिण जिम्व, वम्महिग जगु जिउ वुड्डि" ७५ समेऽष्टावोजे षोडश कुब्जककुसुमम् । यथा "पेच्छं नहु नवमालइ, ललिअ परिमलअसम । भमरहु किम्व मणु रंजहि, णवरि कुज्जयकुसुम" ७६ समेऽष्टावोजे सप्तदश कुसुमास्तरणम् । यथा "मलयानिलु मलयजरसु, ससहरु कुसुमत्थरणु । विरहानलजलिअहि, तसु सवुवि तणुसंतवणु" ७७ एवं नव । तथा समे नव ओजे दश मधुकरीसंलापो । यथा "निसुणिअ माइंदइ, महुअरिसंलावु । ओ पवसिअतरुणि तिं, पत्थुअओ पलावु" ७८ समे नव ओजे एकादश सुखावासो यथा "जइ वम्मह गोरडी, भलइं निहालसि । तुह सुहआवासणी ना किं जालसि" ७९ समे नव ओजे द्वादश कुङ्कुमलेखा । यथा "फेडवि कुंकुमलेह, रिउवहुवयणह । पंकलेह निम्मविअ, पइं महिसयणहं" ८० समे नव ओजे त्रयोदश कुवलयदाम । यथा "जहिं घल्लइ उप्फुलिअ, धण चलनयणइं । तहिं नवकुवलयदामइं, तक्खणि निवडइं" ८१ समे नव ओजे चतुर्दश कलहंसो । यथा "कामिणि हिअयसरोवरहं, तुंहुजि कलहंसु । प्रिय रूविण मयणहु, किअउ तइं जि परहंसु" ८२ समे नव ओजे पञ्चदश सन्ध्यावली । यथा "सिंदुरिअ गुरुकुंभत्थल, गयघड तुहु बलि अग्गलि । नराहिव उत्थरिअ, किर संधावलि" ८३ समे नव ओजे षोडश कुञ्जरललिता । यथा "तोडिअगुढमुहवडसंनाहछड्डिअखगया । निंदहिं पहु कुंजरललिअगइ, तुह अरि-भग्गया" ८४ समे नव ओजे सप्तदश कुसुमावली । यथा "निच्छइं पिअसहि, वम्महरायहु आणु जुं भंजइ । कुसुमावलि ट्ठिअ-लप्पय सद्दिहिं, तं महु तज्जइ" ८५ एवमष्ट । तथा । समे दश ओजे एकादश विद्युल्लता । यथा "विज्जुलय मेहमज्झि अंधारइ गोरी । कवण स हत्थभल्लि, कुसुमाउह तोरी" ८६ समे दश ओजे द्वादश पञ्चाननललिता यथा "संतट्ठहं मयगलहं, विक्कारिहिं कलिअ । रणाइंवि वज्जरहिं, पंचाणणललिअ" ८७ समे दश ओजे त्रयोदश मरकतमाला । यथा "फुल्लंधुअधोरणीउ, लयावणगोच्छिहिं । नवमरगयमालियाउ, नाइ मुहुलच्छिहिं" ८८ समे दश ओजे चतुर्दशाभिनववसन्तश्रीर्यथा "कर असोअदल मुहु, कमलु हसिउ नवमल्लिअ । अहिणव वसंतसिरि एह, मोहगठइल्लिअ" ८९ समे दश ओजे पञ्चदश मनोहरा । यथा "तुह गुण अणुदिणु समरंतिहिं, विरहकरालिअहि । मयणमणोहर तणुअंगिहिं, दय करि वालिअहि" ९० समे दश ओजे षोडश क्षिप्तिका । यथा "हिंडइ सा धण जाम्व, गहिल्लि विरहिण आखित्ती । देक्खिवि वल्लहु ता, आणंदी जणु अमइण सित्ती" ९१ समे दश ओजे सप्तदश किन्नर-लीला । यथा "ओ भडकबंधु नच्चंतु समरि, असिपहारतुट्टिग । किन्नरलील कलइ तुरयसिरिण, तक्खणवहुट्टिण" ९२ एवं सप्त । तथा समे एकादश ओजे द्वादश मकरध्वजहासो । यथा "सो जलिअओ मयणग्गी जु, कुसुमिअउ पलासु । जा पप्फुल्लिअ



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

मल्ली , सु मयरद्धयहासु ९३ समे एकादश ओजे त्रयोदश कुसुमाकुलमधुकरो । यथा "पत्तउ एहु वसंतउ, कुसुमाउलमहुअरु । माणिणि माणु मलंतउ, कुसुमाउहसहयरु" ९४ समे एकादश ओजे चतुर्दश भ्रमरविलासो । यथा "अलिमालइपरिमललुद्धु न अन्निहिं रइ करइ । सा भमरविलासविअड, न अन्नहिं मणु धरइ" ९५ समे एकादश ओजे पञ्चदश मदनविलासः । यथा "मयणविलासगिरिव्व, महेइ मुद्धाहं घणमंडलु । तहिं रेहइ तरलहारलय, निज्झरु किर निम्मलु" ९६ समे एकादश ओजे षोडश विद्याधरहासः । यथा "नासंतिहिं समरागमसमइ, परिचत्तगइंदिहिं । दिवि विज्जाहरहासिअ, सयलतुहु वेरिनरिंदिहिं" ९७ समे एकादश ओजे सप्तदश कुसुमायुधशेखरः । यथा "घोलिरनवपल्लवु, परिफुल्लिओ रेहइ असोअतरु । विरइओ रम्मु नाइ, महुमासिण कुसुमाउहसेहरु" ९८ एवं षट् । तथा समे द्वादश ओजे त्रयोदशोपदोहकः । यथा "महु कंतिण रणि मक्कओ एक्कु पहारु अमाहु । उय दोहयहय चूरिओ, संदणु सारहिजोहु" ९९ समे द्वादश ओजे चतुर्दश दोहकः । यथा "पिअहु पहारिण इक्किणवि, सहि दो हया पडंति । संनद्धओ असवारभड़ु अन्नु तुरंगु न भंति" १०० प्रायोग्रहणात्संस्कृतेऽपि यथा "मम तावन्मतमेतदिह, किमपि यदस्ति तदस्तु । रमणीभ्यो रमणीयतरमन्यत्किमपि न वस्तु" १०१ अत्र समपादान्ते गुरुद्वयमित्याम्नायः । समे द्वादश ओजे पञ्चदश चन्द्रलेखिका । यथा "तुह विरहिं सा अइदुब्बली, घणआवंडुरदेह । अहिमयरकिरणिहिं विक्खिविअ, चंदलेह जिम्व एह" १०२ समे द्वादश ओजे षोडश सुतालिङ्गनम् । यथा "तुह चंडिण भुअदंडिग, निधइ धरमाणिण महिवलओ । जलहिसुआलिंगणपहवसुहु, देउ जणद्दणु कलउ" १०३ समे द्वादश ओजे सप्तदश कङ्केल्लिलताभवनम् । यथा "कंकेल्लिलयाभवणब्भन्तरि अलिरिंनो(खो)लि सहन्ति । लावइ महुलच्छीविणिवेसिअ कज्जलतत्थयपंति" १०४ एवं पञ्च । तथा समे त्रयोदश ओजे चतुर्दश कुसुमितकेतकीहस्तः । यथा "जगु नीसेसुवि निज्जिणिउ, निरुगव्विरु विसमत्थउ । उज्झइ सरलदलंगुलिउ, कुसुमिअकेअइहत्थउ" १०६ समे त्रयोदश ओजे पञ्चदश कुञ्जरविलसितम् यथा "सल्लइपल्लवकवलप्पणु, रेवानइजलि मज्जणु । तं कुञ्जरविलसिउ सुमरइ, गयविरहिओ करेणुगणु" १०६ समे त्रयोदश ओजे षोडश राजहंसः । यथा "जइ गङ्गाजलि धवलि, कालइ जउणाजलि जइ खित्तओ । रायहंसि नहु वुहु न तुट्टु सुज्झत्तणु तुवि तेत्तउ" १०७ समे त्रयोदश ओजे सप्तदशाशोकपल्लवच्छाया । यथा "वयणु सरोजु नयण कुवलयदल, हासु नवफुल्लिअमल्लिकरपाय । असोअपल्लवच्छाय सइजि, कुसुमाउह-भल्लि" १०८ एवं चत्वारः । समे चतुर्दश ओजे पञ्चदशानङ्गललिता । यथा "पलिअ केस चल दसणावलि, जर जज्जरइ सरीरबलु । सव्विवि गलिहिं अणंगललिअ, किज्जउ धम्मु महंतफलु" १०९ समे चतुर्दश

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

ओजे पोडश मन्मथविलसितम् । यथा "मयवसतरुणिविलोअणतरलु, कलेवरु संपइ जीविउ । मेल्हहु रमणीअणि सहु संगु, चयहु हयवम्महविलसिउ" ११० समे चतुर्दश ओजे सप्तदश ओहुल्लणकम् । यथा "महुरसु घुंटिउ जेहिं जहिच्छइ, ते अलि दीसंतभमंत । मालइओहुल्लुणउं करंतिण, किं साहिओ पइं हेमंत" १११ वारङ्गडीत्यन्ये । एवं त्रयः । समे पञ्चदश ओजे पोडश कज्जललेखा । यथा "कज्जललेहाविललोअणहं, गलिअंसुजलिण पम्हुट्ठओ । अहरालत्तयरसु सामरिसु, तुह रिउवहुनयणि पइट्ठओ" ११२ समे पञ्चदश ओजे सप्तदश किलिकिञ्चितम् । यथा "तरुणीकिलिकिंचिअइं विसट्टहिं, ससिजोण्हसमुज्जल रत्तडी । मल्लिअ फुल्लइं परिमलसारइं, जउ तउ गय मग्गहु वत्तडी ११३" एवं द्वे । समे पोडश ओजे सप्तदश शशिबिम्बितम् । यथा "तुहु मुहु लायन्नतरंगिणीए, झलकन्तउ कन्तिकरंबिअउ । सोहइ निम्मलवट्टुलमंडलु, जलमज्झि नाइ ससिबिंबिअओ" ११४ अत्रैकः । एवं तावद्वा पञ्चपञ्चाशद्भेदा चतुष्पदी । उभये दशोत्तरं शतमन्तरसमाश्चतुष्पद्यो वस्तुकानि वा । आन्तरसमा एव द्वितीयतृतीयांह्रिव्यत्ययेऽर्द्धसमाः, द्वितीयतृतीयपादयोर्विपर्यये सत्यन्तरसमा एव दशोत्तरशतसंख्या अर्द्धसमासंज्ञाः । एवग्रहणं सर्वसाम्यार्थम् । तेनासामपि तान्येव चम्पककुसुमादीनि नामानि भवन्ति । तत्रौजे सप्त समेऽष्टेत्यन्तरसमाचम्पककुसुमम् । तदेव द्वितीयतृतीयांह्रिविपर्ययेऽर्द्धसमाचम्पककुसुमम् । यथा "गोरीगोट्ठि, दरफुरिओट्ठि । कलहंसीगइ, कलहे लग्गइ" ११५ मुखपङ्क्तिरर्द्धसमा ॥ यथा "कुव(किम्व)कण्णकलिंग परज्जिआ, ठिअ नरवइ साण विवज्जिआ । न हु कोइ अभिट्टइ अणिअवहि, कहिं वइरि जयट्टहु कण्ह कहि" ११६ इत्यादि । ॐ द्वित्रिचतुर्भिर्लक्षणैर्मिश्रा सङ्कीर्णा ॥ द्वाभ्यां ध्रुवाया अंह्रिलक्षणाभ्यां त्रिभिः चतुर्भिर्वा एकत्र मिश्रा संकीर्णा नाम चतुष्पदी । तत्र द्वाभ्यां सङ्कीर्णा । यथा "चूडल्लउ वाहोहजलु, नयणा कंचुवि समवण । इअ मुंजि रइया दूहडा, पंचवि कामहु पंचसर" ११७ त्रिभिर्यथा "वायाला फरुसा विंधणा गुणिहिं विमुक्का प्राणहर । जह दुज्जणसज्जणजणपउरि, तेम्व पसरु न लहंति सर" ११८ यथा वा "चूडुल्लओ चुण्णी होइसइ मुद्धिकओलिनिहित्तउ । निद्दद्धउ सासानिलिण, वाहसलिलसंसित्तओ" ११९ चतुर्भिर्यथा "तं तेत्तिउ बाहोहजलु, सिहिणं नरि विनपत्तु । छिमिछिमिवि गंडत्थलहिं, सिमिसिमिविसिमिवि समत्तु" १२० ॐ समैः पादैः सर्वसमा ॥ तुल्यकलैश्चतुर्भिः पादैः सर्वसमा चतुष्पदी तद्विशेषानाह । ॐ पचौ ध्रुवकम् ॥ पञ्चमात्रचतुर्मात्रौ गणौ यस्य पादे तद्ध्रुवकम् । यथा "जइवि संखु न करि तु ध्रुवु मुणिउ हरि । जं विरहभीअइ, अणुसरिउ सिरिअइ" १२१ ॐ चौ दः शशाङ्कवदना । द्वौ चतुर्मात्रौ द्विमात्रश्चैकः शशाङ्कवदना । यथा "नवकुवलयनयण, ससंकवयण धण । कोमलकमलकर, उअ सरयसिरि किर १२२" ॐ चपदाश्चातौ वा मारकृतिः ॥ चतुर्मात्र-



P. P. Ac. Gunratnasuriji M.S.
Jin Gun Aradhak Trust

पञ्चमात्रद्विमात्राः । चतुर्मात्रद्वयत्रिमात्रौ वा मारकृतिः । यथा "तुह मारमारकिदी, कवि एह नवल्लिअ । दूरि सवाभल्लि, जं हिअडइ सल्लिअ" ॥ २२३ षचदाः चिर्वा महानुभावा । पण्मात्रचतुर्मात्रद्विमात्रा वा चगणत्रयं वा यत्र सा महानुभावा । यथा "जे निअहिं न परदोस, गुणिहिं जि पयडिअ तोस । ते जगि महाणुभावा, विरला सरलसहावा" १२४ ॥ षचताश्चापौ पातौ वाप्सरोविलसितम् । पण्मात्रचतुर्मात्रत्रिमात्रा वा, चतुर्मात्रद्वयपञ्चमात्रौ वा पञ्चमात्रद्वयत्रिमात्रौ वा, यत्र तदप्सरोविलसितं । यथा "पइं ससिवयणिए विब्भमि, असिअ अच्छरविलसिअइं । भुमइहि किउ पाइक्कउ, मयणु मोहिअजणमणइं" १२५ ॥ षचाश्चिदौ वा गन्धोदकधारा । षण्मात्रश्चतुर्मात्रद्वयं, यदिवा चतुर्मात्रत्रयं द्विमात्रश्च सा गन्धोदकधारा । यथा "रमणिकवोलकुरंगमयपत्तलयाविलअंसुभवि । घणगन्धोदयधार भरि, वइरिअ तुह ण्हायंति सवि" १२६ ॥ चितौ षचपा वा पारणकम् । चतुर्मात्रत्रयं त्रिमात्रश्च, यदिवा पण्मात्रचतुर्मात्रपञ्चमात्राः, पारणकम् । यथा "कइअहिं होएसइ तं दिवसु, आणंदसुहारसपावणउ । होही प्रियमुहससिचंदिमइं, जहिं नयणचउरह पारणओ" १२७ ॥ चीः पद्धडिका । चगणचतुष्कं पद्धडिका । यथा "परगुणगहणु सदोसपयासणु, महुमहुरक्खरहि अमिअभासणु । उवयारिण पडिकिओ वेरिअणहं, इअ पद्धडी मणोहर सुअणहं" १२८ अजादिश्चीर्जो लीर्वान्ते प्राक् पद्धताविह स्वविशेष इति विशेषः । ॥ चिपौ षचाता वा रगडाध्रुवकम् । चगणत्रयं पगणश्च, यदिवा पण्मात्रश्चतुर्मात्रद्वयं त्रिमात्रश्च, यस्य पादे तद्रगडाध्रुवकं । यथा "अइ चंग गइं मोरइं वल्लहिं, जइ तुम्ह रूवमडप्फर भग्गय । कांइं त एम्वहिं तहु विरहक्खणि, महु वम्मह रगडु ध्रुवु लग्गय" १२९

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ षट्पदी-चतुष्पदीशासनः षष्ठोऽध्यायः समाप्तः ।

॥ द्विपदी ॥ इतः परं द्विपद्योऽधिक्रियन्ते । ॥ दाचदालदाचदालि कर्पूरो णैः । द्वौ द्विमात्रौ चतुर्मात्रो द्वौ द्विमात्रौ लघुद्वौ द्विमात्रौ चतुर्मात्रो द्वौ द्विमात्रौ लघुत्रयं च कर्पूरः। णैरिति पंचदशभिर्मात्राभिर्यतिः। च इति सिद्धे दगणद्वयनिर्देशो जगणनिरासार्थः। यथा "कप्पूलधवल गुण अजिणिअ आजम्मुवि निवचक्कवइ पइं । कित्ति काइं उल्लालिकरि, धत्तिअ चउसायर परइ" १ ॥ सोऽन्त्यलोनः कुङ्कुमः । स एव कर्प्पूरः अन्त्यलघुना ऊनः कुङ्कुमः यथा "घणसारु मेल्लि कुङ्कुमु चयहि, परइ करहि मयनाहिवि । विणु पिअयमिंइ हुअ सओ निप्फलओ मणु रइ करइ न कत्थवि" २ एतावुल्लालकौ मागधानां । केचिल्लघ्वष्टकादारभ्य लघुद्वयद्वयवृध्या वाहादीन् भेदानाहुः । यथाह "बाहो बोहा वग्गो, बंधू वाणो गओ वरो वेसो । वेणू वणो वरिट्ठो, विबुहो बलिय बलो विहओ ।१। वामो वुहो विसालो, विंदो विहुरो



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

विहू वसू विरहो । विलओ तहा य विसरओ, उल्लाला पंचविंसत्ति । २ । अट्ठलहुविरइआओ, पढमा उल्लालयाउ छंदम्मि । लहुएहिं दोहि दोहि अ हुंति इमे वड्ढमाणेहिं ॥" एते च कोटीसङ्ख्यप्रस्तारान्तर्भूता इति पृथग् नोक्ताः ॥ ॐ चृ लयः । चृ इति लुप्तविभक्तिको निर्देशः । सप्त चगणा लयो नाम द्विपदी । यथा "किउ उरि लच्छिहिं निलउ करिण कलिण चक्कु महिअलु धरिउ । बलिनाम्बु (ताम्बु) सहिउ नहु कह वि हु पहु तुहुं पुरिसोत्तिम चरिउं" ३ ॐ स भ्रमरपदं ञजैः । स लयः ञजैर्दशभिरष्टभिश्च कलाभिर्यतिश्चेत्तदा भ्रमरपदम् । यथा "ललिअविलासोचिअ तविण किलेसहि सहि किं तणु अप्पणु । मालइकुसुमु सहइ भमरपओ न उण खरसउणि झडप्पणु" ४ ॐ षचुदा उपात्। एकः षण्मात्रः पञ्च चतुर्मात्रा द्विमात्रश्चैको यदि तदा उपात्परं भ्रमरपदमुपभ्रमरपदमित्यर्थः । ञजैरिति वर्त्तते । यथा "तहि मुद्धहि नेहंधहिं किम्व किवण य तुह खलिउ पयट्टु । उअ भमरपएणवि भज्जइ मालइनवकुसुमु विसट्टु" ५ २८/५ ॐ चूपौ गरुडपदम् । षट् चगणाः पगणश्चैको गरुडपदम् । यथा "जसु पारु लहंति कयावि नवि सुरगुरुभिउनंदणपमुह । अरिपन्नगगरुड पयंपिअइ सयलुवि गुणगणु सु किम्व तुह" ६ ॐ षचुता उपात्। एकः षण्मात्रः पञ्च चतुर्मात्रा एकस्त्रिमात्रो यदि स्यात्तदोपात्परं गरुडपदम् उपगरुडपदमित्यर्थः। यथा "हणिअ दुजीहप्पसरणु पिअपुरिसोत्तमु विणयाणंदणु । उअ गरुडपयम्मि निबद्धरइ नरवइ हरइ न कासु मणु" ७ २९/२ ॐ चृदौ हरिणीकुलं ठजैः । चतुर्मात्रसप्तकं द्विमात्रश्चैकः ठजैरिति द्वादशभिरष्टाभिश्च यतिश्चेत्तदा हरिणीकुलम् । यथा "तुहुं उज्जाणि म वच्चसु जइविहु विलसइ मयणूसवु पवलु । गइनयणिहिं लज्जीहइ तुहु हंसीउलु सहि तह हरिउलु" ८ ॐ तद्गीतिसमं ञजैः ॥ तद्धरिणीकुलम् ञजैरिति दशभिरष्टाभिश्च यतिश्चेत्तदा गीत्या समत्वाद्गीतिसमम् यथा "नच्चिरु किसलकरिहिं फुडपयडियपुलउग्गसुमउलावलिहिं । उववंणु ताइ मुइओ कयगाईसमंचिअ तरलिअलिलिहिं" ९ ॐ षुर्भ्रमररुतम् । ञजैरिति वर्त्तते पञ्च षण्मात्राश्चेद्भ्रमररुतम् । यथा "वरजाइ सरंतहु भमरु रुअंतहु तुहु चिरु सुहु परिदीसइ । मायंगिमयं धइ तुब्भु रमंतहु कण्णचवेडजि होसइ" १० ॐ षश्चूर्हरिणीपदम्। एकः षण्मात्रश्चतुर्मात्रपङ्क्तं हरिणीपदम् । यथा "एत्तहे गब्भभरालस हरिणीपउ नहु एक्कोवि संचरइ ।एत्तहे कण्णरोविअसरु हयलोद्धओ भण मिओ किं करइ" ११ ३८/४ ॐ षीचताःकमलाकरम्। षण्मात्रचतुष्कं चतुर्मात्रत्रिमात्रौ च कमलाकरम् । यथा "सयलु वि दिणु संनिहिअह खेलंतह चक्कवायमिहुणहं निअवि । विरहदुत्थमित्तत्थवणि नाइदुक्खिअ मउलिहिं कमलायरवि" १२ ॐ चृतौ कुङ्कुमतिलकावली । चतुर्मात्रसप्तकं त्रिमात्रश्च कुङ्कुमतिलकावली । यथा "महु दूसह विरहकरालि अहि मयण मेलसु जणु मणवंछिउ । पइं पडिम ठवेविणु करिसु सामि कुङ्कुमतिलयावलि लंछिउ " १३ ॐ ते रत्नकण्ठिके ठजैः । ते कमलाकरकुङ्कुमतिलकावल्यौ ठजै-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

द्वादशभिरष्टाभिश्च यतिश्चेत्तदा रत्नकण्ठिके। यथा "जइ न हससि नय कुप्पसि न लवसि ता तुहु सहइ रयणकण्ठिआ। अन्नह फुरिआहरदरदीसंत णवर सहइ दसणपंतिआ" १४ "पडिहअवहुविहनरवइकुंजरसइ परसाहिज्जविवज्जिओ । महिअलि निरुवमविक्कमु तुहु रा(र)यणकंठीरवु निच्छिउ" १५ ॐ षच्चुपाः शिखा। ठजैरित्यनुवर्त्तते। एकः पण्मात्रः पञ्च चतुर्मात्राः पञ्चमात्रश्च शिखा। यथा "जसु अतुलिअ गयवलभरि कंपहिं कुलमहिहर सवि ससुन्धर । निअकुलनहयलससहर वीरसिहामणि जयमज्झि तुहं जि पर" १६ ॐ चृतौ छद्दणिका ञजैः। सप्त चतुर्मात्राः त्रिमात्रश्च। ञजैरिति दशभिरष्टाभिश्च यतिश्चेत्तदा छद्दणिका। यथा "जा किन्नरमिहुणिहिं तुह पुहईसर पत्थुअ सुचरिअ पद्धडिअ। ता गिरिगुहसन्धिहिं कायर तक्खणि हुअ रिउघोरणि छद्दणिअ" १७ ३१/६ ॐ चृः स्कन्धकसमम्। ञजैरिति वर्त्तते। अष्ट चतुर्मात्राश्चेत्तदा स्कन्धकसमम् । यथा "नारिहुं वयणुलइं सरि खंधयसमजलहिं नज्झि मज्जंतिअह। ओ गिण्हिहि विब्भसु(मु) मणहरअहिणववियसिअसररुहपंति अहं" १८ॐ तत् मौक्तिकदाम ठजैः। ठजैरिति द्वादशभिरष्टभिश्च यतिश्चेत्तदा तदेव स्कन्धकसमं मौक्तिकदाम यथा "जइ तुहु पवयणु सामिअ हिअइ ववज्जइ थणससहरकरनिम्मलु । ता निच्छउ अहिराम्वहु मुत्तिअदाम्वहु तरलहु संगहु निप्फलु"१९ ॐ नवकदलीपत्रं ढजैः। ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव स्कन्धकसमं नवकदलीपत्रम्। यथा "नवकयलीपत्तहिं वीअणु पत्थुओ कम्बलिहिं विरइउ सत्थरउ। तहविहु दाहु पवट्टइ मज्झ सीउ उवयरणु पिअसहि संवरउ" २० ॐ षच्चूदैः कृतेष्वेषु स्त्रीत्वम्। षण्मात्रश्चतुर्मात्रषट्कं द्विमात्रश्चेत्येभिर्मात्रागणैः कृतेष्वेषु स्कन्धकसमादिषु त्रिषु स्त्रीत्वं स्त्रीलिङ्गशब्दाभिधेयत्वम् । स्कन्धकसमा मौक्तिकदाम्नी नवकदलीपत्रा चेत्यर्थः ॥ यतिः सैव । स्कन्धकसमा यथा "गयपत्त परिग्गह सुमणसविरहिअ फलवज्जिअ तरुखंधसम । कण्टय परिचारिअ गिरिकंदरगय तुह रिउ वसहिं विमुक्कम" २१ एवमितरयोरप्युदाहार्यम् ॥ ३२/६ ॐ चृपावायामकम् । सप्त चतुर्मात्राः पञ्चमात्रश्चैक आयामकम् । यथा "आयामयधवलत्तणगुणकलिए पेच्छिवि केअइदलि अलिविलसिरु । संभरि पिअनयणइं विरहज्जरजज्जरि अगमणु मुज्झइ पहिउ चिरु" २२ ॐ तत्काञ्चीदाम ञजैः । ञजैरिति दशभिरष्टाभिश्च चेद्यतिस्तदा तदायामकं काञ्चीदाम । यथा "अंगय फुडिअ तुडिअ नवकंचुउगुण दलिउ कंचिदामु सनिअंसणु । तहिं तुहगुणसवणिण ऊससिअंगिहिं अप्पडिहयसासणु हू मयणु" २३ ॐ रसनादाम ठजैः। ठजैरिति द्वादशभिरष्टाभिश्च यतिश्चेत्तदा तदायामकं रसनादाम । यथा "तुह दंसणतूरंतिए सुन्दर मुद्धए सुणि जं किउ पच्चल्लिउ। हारु निअंबि निवेसिउ रसणादामुवि थणसिहरोवरि घल्लिउ" २४ ॐ चूडामणिर्ढजैः। ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदायामकं चूडामणिः। यथा "बहुविहसमरंगणि खणिण नवनवजयसिरि जं पइं परिणिज्जइ । निवचूडामणि

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तुह कित्तिहिं मंगलकारणि तं जगु धवलिज्जई" २५ ॐ षच्चूतैः कृतान्यायामकादीन्युपात्। षण्मात्रेण चतुर्मात्रषट्केन त्रिमात्रेण कृतान्यायामकादीनि चत्वार्यपि उपात्पराणि भवन्ति। उपायामकं उपकाञ्चीदाम उपरसनादाम उपचूडामणिरित्यर्थः। यतिरपि सैव। तत्रोपायामकम्। यथा "तणुअंगिहिं लोअणनलिणिहिं उअ आयामिण केअइदलु निजिओ। वयणुल्लइं कंतिकडप्पिण तह मयलंछणमंडलु अवहत्थिओ" ॥ २६ एवमन्यान्यप्युदाहरणीयानि। $\frac{३३}{८}$ ॐ चृद्गौ स्वप्नकम्। अष्टौ चतुर्मात्रा द्विमात्रश्च स्वप्नकम्। यथा "पिउ आइउ नियडिउ पइहिं सपणयवयणिहिं अणुणिवि माणु सुआविअ। इअ सिविणयभरि आलिंगिमि जाम्वहिं ताम्वहिं सहि हय कुक्कडि रडिअ" २७ ॐ तद्भुजङ्गविक्रान्तं ठजैः। ठजैरिति द्वादशभिरष्टभिश्च चेद्यतिस्तदा तदेव स्वप्नकं भुजङ्गविक्रान्तम्। यथा "तुह रणि नट्ठ रसायलि गय अरि कारणि इणि किर भुअंगविक्कंतय। ताहं विलासभवणि पुरि लीलावणि परिअंचहिं निवसहिं चिरु गयभय" २८ ॐ ताराध्रुवकं ढजैः। ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव स्वप्नकं ताराध्रुवकम् "तुह रिउ वणगय दिसि मोहिअ ताराधुव अवलोअहिं जाम्वहिं अवहिअ। वाहजलाविलनयण निअहिं न हु ताम्वहिं हुअ हिअडइ मरणासंकिअ" २९ ॐ नवरङ्गकं तजैः। तजैरिति षोडशभिरष्टाभिश्च यतिश्चेत्तदा तदेव स्वप्नकं नवरङ्गकम्। यथा "दहिअवरवयघणचंदणमालिअनवनवरंगयवावड निअवि पिअ। गाढोक्कंठासरलिअभुअजुओ अवरुडइ रइरसभरकंदलिअ" ३० ॐ षिश्चीः स्थविरासनकम्। तजैरिति वर्त्तते। षण्मात्रत्रयं चतुर्मात्रचतुष्टयं च तजैर्यतिश्चेत्तदा स्थविरासनकम्। यथा "दारविवज्जिअ विसयपरंमुह खलिअगइक्कम अइपसरिअवेविअ। वेरग्गिण तवसित्तु पवज्जिवि ट्ठिअ थेरासणि तुह तरुण विविरिअ" ३१ ॐ चृषौ सुभगम्। तजैरिति वर्तते। सप्त चतुर्मात्राः षण्मात्रश्च सुभगम्। यथा "जलइ सरोवरि नीलुप्पलवणु वणि लय फुल्लिअ नहयलि हिमकिरणु। विरहरहकइं तुह तणुअंगिहिं सुहय विणिम्मिओ जलु थलु नहु जलणु" ३२ ॐ षचीषचदाः पवनध्रुवकं ढजैः। षण्मात्रश्चतुर्मात्रचतुष्टयं षण्मात्रचतुर्मात्रद्विमात्राः पवनध्रुवकं। ढजैरिति चतुर्दशभिरष्टभिश्च यतिः। यथा "बहुहयखरखुरखंडिअमहिउट्ठिअरइं रिउवहुनीसासपवणधुइ। जसु पयाणछणि अच्छिजुअल अणिमिसनयणत्तणु सुरसुंदरि निंदहिं" ३३ ॐ षचाषच्दिाः कुमुदं जजैः। षण्मात्रश्चतुर्मात्रद्वयं षण्मात्रश्चतुर्मात्रत्रयं द्विमात्रश्च कुमुदम्। जजैरिति दशभिरष्टाभिश्च यतिः। यथा "तरुलच्छि विवज्जिउ मुचइ लोइण सव्ववि ईसर कयअणु सरणु। मउलियकमलायर निसि अलि मेल्लिवि सेवहिं विअसंतउं कुमुअवणु" ३४ ॐ तद्भाराक्रान्तं ठजैः। ठजैरिति द्वादशभिरष्टभिश्च चेद्यतिस्तदा तदेव कुमुदं भाराक्रान्तं यथा "कंचणभूसणछड्डिअ खंडिवि वसणुवि लहुइउ तुरिअ पलाइरिहिं। तुवि किच्छिण रमणत्थलभारक्कंतिहिं



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

गम्मइ तुह रिउसुंदरिहिं" ३५ ३४/६ ॐ चृतौ कन्दोट्टम् । अष्टौ चतुर्मात्राः त्रिमात्रश्च कन्दोट्टं । यथा "किं झाइउ तिण अविचलचित्तिण किं निम्मलु तवु किउ समरिउमित्तिण । जं तुह मुहविब्भमहरु कंदोट्टविसट्ट तरुणि चुंबिज्जइ भमरिण" ३६ ॐ षाचुता भ्रमरद्रुतं ञजैः । षण्मात्रद्वयं चतुर्मात्रपञ्चकं त्रिमात्रश्च भ्रमरद्रुतम् । ञजैरिति दशभिरष्टभिश्च यतिः । यथा "कुसुमुग्गमु अज्जुणकेअइकुडयह पेच्छिवि कहवि हु न हु रइ मंडहिं । नवपाउसि संपइ पइसंतइ ओ जाइ निअंत भमर द्रुओ हिंडहिं" ३७ ॐ तत्सुरक्रीडितं ठजैः । ठजैरिति द्वादशभिरष्टभिश्च यतिश्चेत्तदा तद्भ्रमरद्रुतं सुरक्रीडितम् । यथा "सग्गु पहुत्तिहिं तुह परिपंथिहिं किउ अइसंकडु पुहइसर निच्छिउ । सच्छरगणसुरकीलिउं सक्कहिं नो(तो)हिंति नंदणपरिसरि इत्थिउ" ३८ ॐ सिंहविक्रान्तं ढजैः । ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव भ्रमरद्रुतं सिंहविक्रान्तं यथा "अच्छउ ता उब्भडभुअबलु चक्खुक्खेविण विहडयतु रिउभडहिअउ । सुरनरसीहविक्कंतचरिउ लंघेविणु ट्ठिउ रेहइ पुहरइ सरतिलओ" ३९ॐ कुङ्कुमकेसरं तजैः । तजैरिति षोडशभिरष्टभिश्च यतिश्चेत्तदा तदेव भ्रमरद्रुतं कुङ्कुमकेसरम् । यथा "नयणविलासिण निज्जिअ कुवलअ कंतिकण्ड(ड)प्पिण कुङ्कुमकेसरनिअरु । डसणझलक्कइं हीरय विनडिय ससहरु वयणिण कांइ न मुद्धहि पवरु" ४० ३५/५ ॐ च्ल बालभुजङ्गमललितम् । च्ल इति लुप्तविभक्तिको निर्देशः । नव चतुर्मात्रा बालभुजङ्गमललितम् यथा "दुद्दमरिउ महिवाल भुअंगम ललिअझडप्पणि तुहं निच्छइ गरुडोवमु । जं पुण पुरिसोत्तिमसिरचूडामणि वुच्चसि पुहईवल्लह तं निरुवमु" ४१ ॐ षिचीदा उपगन्धर्वं ठजैः । षण्मात्रत्रयं चतुर्मात्रचतुष्टयं द्विमात्रश्चोपगन्धर्वम् । ठजैरिति द्वादशैरष्टभिश्च यतिः । यथा "गयघड तुरयघट्ट रहवूह महाभडनिवह रयणभंडार समिद्धुवि । उवगंधव्व नयरसमु पुहइवइत्तणु तिणु जिम्व चयहिं विवेअवंत किवि" ४२ ॐ तत्सङ्गीतं ढजैः । ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेवोपगन्धर्वं सङ्गीतम् । यथा" वज्जहिं गज्जिरघणमद्दल नच्चहिं नहयलअंगणि नव चंचलविज्जुल । गायहिं सिहि इह संगीअउ पाउसलच्छिहिं करइ जुआणह मण आउल" ४३ ॐ उपगीतं तजैः । तजैरिति षोडशभिरष्टभिश्च यतिश्चेत्तदा तदेवोपगन्धर्वमुपगीतम् । यथा "जसु भुअबलु हेलुद्धरिअधरणि निसुणिवि वणयरगण उवगीउ सुविक्कमु । अज्जवि हरिसिअ नवदब्भंकुरदंभिण पयडहिं कुलमहिहर पुलउग्गमु" ४४ ३६/४ ॐ चृपौ गोन्दलम् । अष्टौ चतुर्मात्राः पञ्चमात्रश्च गोन्दलम् । यथा "सइ विज्जुलअविउत्तउ तुहुं जलहरकरि गुन्दलु निट्ट न जाणसि विरहिअहं । इअ भणि चिंतवि किंपि अमंगलु दइअहुं असुंपवाहु पलुट्टउ पंथिअहं" ४५ ॐ षचृता

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

रथ्यावर्णकं ठजैः । पण्मात्रश्चतुर्मात्रसप्तकं त्रिमात्रश्च रथ्यावर्णकं ठजैरिति द्वादशभिरष्टभिश्च यतिः । यथा "विरह रहक्कइं सुहय न जंपइ न हसइ जीवइ केवलु पिअपच्चासइ । अहवा किन्ति उरत्थावण्णु करिसहुं निच्छइं मरिसहुं तुहु जसु नासइ" ४६ ॥ तच्चच्चरी ढजैः । ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव रथ्यावर्णकं चच्चरी । यथा "चच्चरि चारुचवहिं अच्छर किवि रासउ खेल्लहिं किविकिवि गायहिं वरधवलु । रयहिं रयणसत्थिअ किवि दहिअक्खय गिण्हहिं किवि जंमूसवि तुह जिणधवल" ४७ ॥ अभिनवं तजैः । तजैरिति पोडशभिरष्टभिश्च यतिश्चेत्तदा तदेव रथ्यावर्णकमभिनवम् । यथा "किं अज्जवि माणंसिणि माणसि मणु विसट्टइ माणइ न पयाणउ रमणु । इअ संजाइण कोविण णावइ आरत्तयतणु अहिणवउग्गसि हिमकिरणु" ४८ ॥ चूपचताश्चपलम् । तजैरिति वर्त्तते । चतुर्मात्रपङ्कं पण्मात्रचतुर्मात्रत्रिमात्राश्चपलं । यथा "सुरसरितुङ्गतरङ्गसहोअर किंत्ति चवल तुह वाणट्टिउ जगु धवलइ । पुट्ठि भमंति हु रिउअवकित्तिहु कालत्तणु नहु निवचूलामणि कवलइं" ४९ ३/८ ॥ चूपौ चावमृतम् । तजैरिति वर्त्तते । चतुर्मात्रपट्कं पण्मात्रश्चतुर्मात्रद्वयं चामृतम् । यथा "उण्हयअमय मऊहमऊहविदूसहु चंदणपंकुवि जलइ लयाहरुवि । इय तुह विरहिण तहि तणुंअगिहि सुहय सुहाइ न किंपि वि पसिअहि दय करिवि" ५० ॥ चलदौ सिंहपदम् । तजैरिति वर्त्तते । नव चतुर्मात्रा द्विमात्रश्च सिंहपदम् । यथा "जावयरसरंजिअ वरकामिणिपय पडिबिंबिहिं लंछिइ जइ किर आसि सइ । संपइ हयवणगयरुहिराऽरुणसीहपयंकिअ तुह रिउघरइंति पिच्छिअहि" ५१ ॥ तद्दीर्घकं ढजैः । ढजैरिति चतुर्दशभिरष्टभिश्च यतिश्चेत्तदा तदेव सिंहपदं दीर्घकम् यथा "दीहरभुअदंडविडंबिअसुरसिंधुरकरु उरयडतुलिअविसालसिलायलु । उब्भडकोअंडपयंडिमहसिअधणंजउ पिउ एक्कंगिण जिणइ वेरिवलु" ५२ ॥ षश्चृः कलकण्ठीरुतम् । ढजैरिति वर्त्तते । पण्मात्रश्चतुर्मात्राष्टकं च कलकण्ठीरुतम् । यथा "मिउ मलयसमीरणुअंगिहिं अहिणवपल्लव दिट्ठिहिं कलयंठीरुउ कन्नहिं । विसकंदलिसन्निह मुद्धह दूसह खणि खणि पाणंतिउ मुच्छाभरु अप्पहिं" ५३ ॥ षाच्चूदाः शतपत्रम् । ढजैरिति वर्त्तते । पण्मात्रद्वयं चतुर्मात्रपङ्कं द्विमात्रश्च शतपत्रं । "यथा एक्कु पसारइ जइ दिअवइ कर तुवि मउलइ सयवत्तु निरारिओ आओलउं । पहु तुह पुण करसरसीरुहु दिअवइलक्खिवि दिट्ठइ फुडु विअसइ अग्गलउं" ५४ ३/८ ॥ चलतावतिदीर्घं ढजैः । चतुर्मात्रनवकं त्रिमात्रश्चातिदीर्घं ढजैरिति चतुर्दशभिरष्टभिश्च यतिः । यथा "जइ जाहिं सुरसरिअ जइ गिरिनिज्झर सेवहिं जइ पइसहि काणणतरुसंडय । रिउ निव तुवि नवि छुट्टहिं पहु तुज्झु पयावहु कालहु अइदीहिहरभुअदंडय" ५५ ॥ षाच्चूता मत्तमा-



P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

तङ्गविजृम्भितम् । ढजैरिति वर्त्तते । षण्मात्रद्वयं चतुर्मात्रषट्कं त्रिमात्रश्च मत्तमातङ्गविजृम्भितं । यथा "पयडिअलंछण मयलेहिण उल्लासिअकरदंडिण तारा हरणिणनिसिअरिण । उअ नीसंकिण भउ विरहिणि जणहु जणिज्जइ असमु मत्तमायंगविअंभिइण" ५६ $^{3}_{२}$ ॐ चत्वारिंशत्कला एकद्व्यधिका वा मालाध्रुवकम् ॥ चत्वारिंशन्मात्रा यद्वा एकद्व्यधिका इति एकचत्वारिंशद्विचत्वारिंशद्वा मालाध्रुवकं नाम द्विपदी । यथा "तह पुहईसरसेहर किंत्ति अकिंत्तिम सुरहिअदिसिमुह जाम्वहिं सग्गि पइट्ठिअ । ताम्वहिं तक्खणि सुरसुंदरिलोअहु सुरतरुकुसुममालध्रुवु हुअ मणउच्छिट्ठिअ" ५७ एवमेकद्व्यधिकयोरप्युदाहार्यम् । एवं द्विपदीध्रुवा चतुःषष्टिः ॥ अयं चात्र विवेकः । "सिंहावलोकितार्थेषु विज्ञसौ संविधानके । मङ्गलेव ध्रुवा प्रोक्ता द्विपदान्यत्र कीर्त्यते" इति । प्रकारान्तरेण द्विपदीराह । ॐ चो विजया । एकश्चतुर्मात्रः पादे चेद्विजयानाम द्विपदी । यथा "सजया । विजया"५८ ॐ पो रेवका । पञ्चमात्रो रेवका "वहुवया । रेवया" ५९ ॐ षो गणद्विपदी । षण्मात्रो गणद्विपदी । यथा "नियजुवई । गणदु वई" ६० ॐ चतौ स्वरद्विपदी । चतुर्मात्रत्रिमात्रौ स्वरद्विपदी । यथा "पसरदु वई । अखलिअगई" ६१ ॐ पदावप्सराः । पञ्चमात्रद्विमात्रावप्सराः । यथा "उअ अच्छरा । गयमच्छरा " ६२ ॐ अष्टौ कला वसुद्विपदी । यथा "सु तव सुदु वई । जयइ नरवई" ६३ ॐ चौ करिमकरभुजा । चतुर्मात्रद्वयं करिमकरभुजा । यथा "करिमयरभुओ । उव्वहुयभुओ" ६४ ॐ चलदलाश्चन्द्रलेखा । चतुर्मात्रो लघुर्द्विमात्रो लघुश्च चन्द्रलेखा । यथा "नवचंदलेह । जिम्व सुद्ध एह" ६५ॐ पतौ मदनविलसिता । पञ्चमात्रस्त्रिमात्रश्च मदनविलसिता । यथा "मयणविलसिअं । पाववविसिअं" ६६ चपौ जम्भेदिका । चतुर्मात्रपञ्चमात्रौ जम्भेदिका । यथा "सा तसु बेद्दिआ । सुट्ठु जंभेद्दिआ" ६७ ॐ पचौ लवली । पञ्चमात्रचतुर्मात्रौ लवली । यथा "उअ वणावलिआ । फुल्लिअ लवलिआ" ६८ ॐ सप्त कला दलौ चामरपुरसुन्दरी । आदौ सप्त कलास्ततो द्विमात्रो लघुश्चामरपुरसुन्दरी यथा "अमरपुरसुंदरिहिं । भड वरिअ सयंवरिहिं" ६९ ॐ षचौ काञ्चनलेखा । षण्मात्रचतुर्मात्रौ काञ्चनलेखा । यथा "मणिकंचणरेहिअ । सुरसुंदरि जेहिअ" ७० ॐ पौ चारुः । द्वौ पञ्चमात्रौ चारुः । यथा "चारुचंपयरुई । ओअ सोहइ जुअई" ७१ ॐ तषताः पुष्पमाला । त्रिमात्रषण्मात्रत्रिमात्राः पुष्पमाला । यथा "एह ललिअदेह बाल । नाइ जाइफुल्लमाल" ७२ तोमरमित्यन्ये । एवमन्या अपि त्रिंशन्मात्रापर्यन्ता अभ्यूह्याः । अप्रसिद्धाभिधानत्वात्तु नोक्ताः । यदाह " चतुर्मात्रादिकात्रिंशत्प्रान्तैरंह्रियुगैः पुनः । एकानैकैरन्तवर्णैर्यमके द्विपदीं विदुः" द्विपदीप्रकरणम् । ॐ गाथात्रानुक्तम् ।'अत्र शास्त्रे यन्नोक्तं छन्दस्तद्गाथा-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

संज्ञम् । यथा "दश धर्म्मं न जानन्ति, धृतराष्ट्र निबोधनात् । मत्तः प्रमत्त उन्मत्तः, क्रुद्धः श्रान्तो बुभुक्षितः ॥ त्वरमाणश्च भीरुश्च लुब्धः कामीति ते दश ॥ ७३ ॥ अत्र त्रिभिः पङ्क्तिर्वा पादैः श्लोकः ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ द्विपदीव्यावर्णनो नाम सप्तमोऽध्यायः ।

ॐ **अथ प्रस्तारादयः षट् प्रत्ययाः** । प्रस्तार्यत इति प्रस्तारो, वृत्तानां विस्तरतो विन्यासः, स आदिर्येषां प्रत्ययानां ते प्रस्तारादयः, प्रतीतिजननात्प्रत्ययास्तेऽधिक्रियन्ते । ते च षट् । यदाहुः "प्रस्तारो नष्टमुद्दिष्टं सैवैकादिगलक्रिया । सङ्ख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः" । तत्र प्रस्तारमाह । ॐ **प्राक्लपाद्यगोऽधो लः परमुपरि समं प्राक् पूर्वविधिरिति समयभेदकृद्वर्ज्जं प्रस्तारः** ॥ तत्रायं क्रमः । पादेऽर्द्धे छन्दसि वा यावन्तो वर्णास्तावन्तो गुरवः प्रथमविकल्पे स्थाप्याः । यथा समवृत्तस्य त्र्यक्षरे पादे गुरुत्रयं ऽ ऽ ऽ, ततोऽस्य प्राक्लपस्याद्यो यो गुरुस्तस्याधो लघुः स्थाप्यः, ततः परमुपरि समं स्थाप्यं, यत्रोपरि गुरुस्तत्राधस्तादपि गुरुर्यत्रोपरि लघुस्तत्राधस्तादपि लघुः यथा ऽ ऽ ऽ, । ऽ ऽ पुनः प्राक्लपाद्यगुरोरधो लघुः स्थाप्यः, परमुपरि सममिति वचनात्ततः परं गुरुः स्थाप्यः । ततः स्थापितलघोः प्राक् पृष्ठे पूर्वविधिरिति पूर्वस्य प्रथमविकल्पस्य सर्वगुरोर्विधिर्विधानं, प्रथमविकल्पे यो वर्णः स चेह गुरुरेव । यथा एवं सर्वलघुविकल्पं यावदयं विधिः करणीयः । यथा

| | | |
|---|---|---|
| ऽ | ऽ | ऽ |
| । | ऽ | ऽ |
| ऽ | । | ऽ |
| । | । | ऽ |
| ऽ | ऽ | । |
| । | ऽ | । |
| ऽ | । | । |
| । | । | । |

समयभेदकृद्वर्जमिति समयोऽभ्युपगमस्तद्भेदकारी विकल्पः प्रस्तारक्रमायातोऽपि वर्ज्जनीयः, सङ्ख्यायां न गणनीय इत्यर्थः । अस्य चार्द्धसमादावुपयोगः । **इति समवृत्तप्रस्तारः** । अर्द्धसमप्रस्तारे त्वर्द्धस्य प्रस्तारः कार्यः । यथा द्व्यक्षरपादद्वयस्य सर्वगुरोः ऽ ऽ ऽ ऽ आद्यगुरोरधोलघुस्ततः परमुपरि सममिति परतो गुरुत्रयं स्थाप्यं । ऽ ऽ ऽ पुनः प्राक्लपाद्यगोऽधो ल इति प्रथमपादद्वितीयगुर्वक्षरस्याधोलघुः, परतस्तु परमुपरि सममिति गुरुद्वयं, ततः प्राक् पूर्वविधिरित्यादौ गुरुः स्थाप्यः ऽ । ऽ ऽ अनया रीत्या सर्वलघुं यावत् षोडशभेदाः—



P. P. Ac. Gunratnasuriji M.S. Jun Gun Aaradhak Trust

| | | | |
|---|---|---|---|
| ऽ | ऽ | ऽ | ऽ |
| । | ऽ | ऽ | ऽ |
| ऽ | । | ऽ | ऽ |
| । | । | ऽ | ऽ |
| ऽ | ऽ | । | ऽ |
| । | ऽ | । | ऽ |
| ऽ | । | । | ऽ |
| । | । | । | ऽ |
| ऽ | ऽ | ऽ | । |
| । | ऽ | ऽ | । |
| ऽ | । | ऽ | । |
| । | । | ऽ | । |
| ऽ | ऽ | । | । |
| । | ऽ | । | । |
| ऽ | । | । | । |
| । | । | । | । |

एपु प्रथमपष्ठैकादशपोडशाः समवृत्तभेदत्वेनाभ्युपगतार्द्धसमवृत्तभेदकारित्वाद्वर्जनीयाः ततः शेपा द्वादश शुद्धार्द्धसमभेदाः । विपमप्रस्तारे तु पादचतुष्टयस्य प्रस्तारः कार्यः । यथा द्व्यक्षरपादचतुष्टयस्य सर्वगुरोः ऽऽऽऽऽऽऽऽ प्राक्लपाद्यगोऽधो ल इत्याद्यगुरोरधो लघुः स्थाप्यः ततः परमुपरि सममिति परतो गुरुसप्तकं स्थाप्यं । ऽऽऽऽऽऽऽ, पुनः प्रथमपादद्वितीयगुर्वक्षरस्याधो लघुः परमुपरि सममिति परतो गुरुपट्कं ततः प्राक् पूर्वविधिरित्यादौ गुरुः स्थाप्यः ऽ।ऽऽऽऽऽऽ अनया रीत्या सर्वलघुं यावत् पञ्चाशदधिकं शतद्वयं भेदाः, तेषां मध्यात् समार्द्धसमरूपत्वेन अभ्युपगतविपमप्रस्तारभेदकारित्वात् प्रथमो द्वितीयात् सप्तदशः सप्तदशोऽन्त्यभेदं यावत् वर्जनीयः । ते च समुदिताः षोडश । तद्यथा

| | |
|---|---|
| ऽऽऽऽऽऽऽऽ १ | ऽऽऽ।ऽऽऽ। १२७ |
| ।ऽऽऽ।ऽऽऽ १८ | ।ऽऽ।।ऽऽ। १५४ |
| ऽ।ऽऽऽ।ऽऽ ३५ | ऽ।ऽ।ऽ।ऽ १७१ |
| ।।ऽऽ।।ऽऽ ५२ | ।।ऽ।।।ऽ। १८८ |
| ऽऽ।ऽऽऽ।ऽ ६९ | ऽऽ।।ऽऽ।। २०५ |
| ।ऽ।ऽ।ऽ।ऽ ८६ | ।ऽ।।।ऽ।। २२२ |
| ऽ।।ऽऽ।।ऽ १०३ | ऽ।।।ऽ।।। २३९ |
| ।।।ऽ।।।ऽ १२० | ।।।।।।।। २५५ |

अमीषां मध्ये प्रथमपष्ठैकादशपोडशाः समभेदाः । अन्ये अर्द्धसमभेदाः । अथ जातिप्वार्यायाः प्रस्तारो यथा "प्रथमस्य गणस्य द्विगुरोः ऽ ऽ आद्यस्य गुरोरधो लघुः स्थाप्यस्ततः परमुपरि सममिति परगुरुसहितद्वितीयादिगणानामधो गुरवः स्थाप्याः, प्राक् पूर्वविधिरिति यावत्यः प्रथमगणे मात्रास्तावत्यो गुरुलघुक्रमेण पूरणीयाः, ततश्चतुर्मात्रत्वात्पूर्वगणस्यात्रैका मात्रा प्राक् न्यसनीया, तेन द्वितीयभेदे प्रथमगणो गुर्वन्तः ।। ऽ अन्ये तु गुर्वात्मकाः पुनराद्यगुरोरधो लघुस्ततः परमुपरि सममिति अन्ये गणा गुर्वात्मकाः, प्राक् पूर्वविधिरिति मात्रात्रये प्रथमगणसम्बन्धिन्यवशिष्टे यदि लघुपूर्वो गुरुर्दीयते तदा नौजे ज इति वचनात् समयभेदः स्यात् ततो गुरुपूर्वो लघुर्दीयते इति तृतीयभेदे गुर्वादि ऽ।। प्रथमो गणः । शेपाश्च तथैव । पुनराद्यगुरोरधो लघुस्ततः परमुपरि सममिति द्वौ लघू शेपाश्च गणा गुर्वात्मकाः प्राक् पूर्वविधिरित्येका मात्रा प्रथमगणेऽवशिष्यते, सा प्राक् न्यस्येति चतुर्भेदे सर्वलघुः प्रथमो गणः ।।।। शेपाश्च तथैव । पुनर्द्वितीयगणप्रथमगुरोरधो लघुस्ततः परमुपरि सममिति द्वितीयगणद्वितीयगुरुत आरभ्य सर्वे गुरवः । प्राक् पूर्वविधिरिति यदि लघुपूर्वं गुरुद्वयं दीयते तदा गणनाशात्समयभेदः स्यात्,

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

तदेतन्माभूदिति द्वितीयगणापेक्षयैव द्वितीयगणलघोः पूर्वो लघुर्देयः । प्रथमश्च गणः सर्वगुरुरिति पूर्वविधिना गुर्वात्मक इति द्विगुरुर्गुर्वन्तश्च पञ्चमे भेदे प्रथमद्वितीयौ गणौ, ततः षष्ठसप्तमाष्टमेषु भेदेषु क्रमेण द्वितीयतृतीयचतुर्थभेदतुल्यः प्रथमो गणो, द्वितीयश्च गुर्वन्त एव, ततो नवमे भेदे द्वितीयगणगुरोरधो लघुस्ततः प्राक् पूर्वविधिरिति लघुपूर्वो गुरुः प्राक् देयस्तेन जगणस्तत्र सम्पन्नः । प्रथमश्च गुर्वात्मक उपरि तुल्यत्वं पुनः परेषां स्थितमेव यावद्विंशतितमे भेदे गणद्वयं लघुरूपं संपन्नं । इति द्वितीयो गणो विंशत्या निष्ठितः । तृतीयगणश्चतुर्भेद एकैको विंशतिकृत्वोऽशीत्या निष्ठितः । चतुर्थगणः पञ्चभेद एकैकोऽशीतिकृत्वश्चतुःशत्या निष्ठितः । पञ्चमगणश्चतुर्भेद एकैकश्चतुःशतीकृत्वः षोडशशत्या निष्ठितः । षष्ठगणो द्विभेद एकैकः षोडशशतीकृत्वो द्वात्रिंशच्छत्या निष्ठितः । सप्तमगणश्चतुर्भेद एकैको द्वात्रिंशच्छतीकृत्वो द्वादशभिः सहस्रैरष्टशत्युत्तरैर्निष्ठितः । अन्त्यो गुरुरेक एव एकेन गुणितं तदेवेति तावद्भिरेव निष्ठितः । एवं निश्चितं पूर्वार्द्धम् । परार्द्धमपि गणविकल्पान्निश्चित्य प्रस्तारयेत् । एवमन्येष्वपि मात्राछन्दःसु प्रस्तारो ज्ञेय इति । समवृत्तानां प्रकारान्तरेण प्रस्तारमाह । ॐ **ग्लावधोऽधो द्विर्द्विरतः** । समवृत्तानां प्रस्तारे चिकीर्षिते प्रथमपङ्क्तौ यावत्सङ्ख्यापरिमाणमेकान्तरितावधोऽधो गुरुलघू स्थाप्यौ, अतः परं द्वितीयादिपङ्क्तिषु द्विगुणद्विगुणा गुरवो लघवश्चाधोऽधः स्थाप्याः । यथा त्र्यक्षरे छन्दसि प्रथमपङ्क्तौ एकान्तरिता गुरुलघवोऽष्टसंख्यां यावत् स्थाप्या, द्वितीयपङ्क्तौ द्वौ द्वौ, तृतीयपङ्क्तौ चत्वारश्चत्वारः । इति प्रस्तार उक्तः । समवृत्तानां नष्टमाह । ॐ **नष्टाङ्कस्य दले लः सैकस्य गः** । किंचिद्वृत्तं नष्टं चतुर्थं पञ्चमं वा, तत्समं यदि भवति तदा दलेऽर्धे कृते ल इति लघुर्लभ्यते पुनर्दले लघवो लभ्यन्ते, अथ वैषम्यात्संख्यार्द्धं न ददाति तदा सैकस्य ग इति सैकस्याङ्कस्य दले कृते गुरुर्लभ्यते, पुनस्तद्वत् नष्टवृत्तमुत्पद्यते । यथा अत्रैव त्र्यक्षरे छन्दसि पञ्चमं वृत्तं नष्टं, पञ्चार्द्धं न ददतीति सैका षट् तदर्द्धे गुरुः, पुनस्त्रयार्धं न ददति सैकाश्चत्वारस्तदर्द्धे गुरुः, द्वयोरर्धमेक इति लघुरिति । द्वौ गावेको ल ईदृशं पञ्चमं वृत्तं ऽऽ। इति समवृत्तनष्टविधिरुक्तो । जातीनां नष्टविधिरुच्यते ॐ **नष्टाङ्के गणैर्हृतशेषसंख्यो गणो देयो राशिशेषे लब्धं सैकम्**। नष्टस्य वृत्तस्याङ्के स्थापिते गणैर्गणविकल्पैर्हृते यच्छेषं तत्संख्यो गणो देयः।यत्र तु राशिशेषं भवति, तत्र लब्धं सैकं कार्यम् । ततः पुनस्तस्मिन्नुत्तरगणविकल्पैर्हृते शेषसंख्यो गणो देयः । यथा आर्याप्रस्तारे एका कोटिरेकविंशतिर्लक्षा एकविंशतिः सहस्रा द्वे शते द्वादशोत्तरे इत्येतावत्संख्यं वृत्तं नष्टं कीदृशमिति पृष्टे प्रथमगणश्चतुर्थवि(र्वि)कल्प इति चतुर्भिर्नष्टाङ्कं हरेत्, लब्धं त्रिंशल्लक्षास्त्रिंशत्सहस्रास्त्रीणि शतानि त्र्युत्तराणि, शेषं चत्वारीति तद्विकल्पेषु चतुर्थं सर्वलघुं न्यसेत् ।।।। द्वितीयो गणः पञ्चविकल्प इति पञ्चभिर्हरेत् । लब्धं षट् लक्षाः षट् सहस्राः षष्ट्यधिकाः, राशेश्च हताः शेषं त्रीणीति तद्गणविकल्पेषु तृतीयं मध्यगुरुं न्यसेत्,



P. P. Ac. Gunratnasuriji M.S.    Jin Gun Aradhak Trust

ततो राशिशेषे लब्धं सैकं इति वचनाल्लब्धं सैकं कृत्वा तृतीयगणश्चतुर्विकल्प इति चतुर्भिर्हरेत्, लब्धमेकं लक्षमेकपञ्चाशत्सहस्राः पञ्च शतानि पञ्चदशोत्तराणि । राशिशेषमेक इति तद्विकल्पेषु प्रथमं सर्वगुरुं न्यसेत्, लब्धं सैकं कृत्वा चतुर्थगणस्य पञ्चविकल्पत्वात्पञ्चभिर्हरेत् लब्धं त्रिंशत्सहस्राः त्रीणि शतानि त्र्युत्तराणि । राशिशेषमेक इति प्रथमविकल्पं सर्वगुरुं न्यसेत् , ततो लब्धं सैकं कृत्वा पञ्चमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत् लब्धं पञ्चसप्ततिः शतानि षट् सप्तत्यधिकानि । शेषं चत्वारीति चतुर्थविकल्पं सर्वलघुं न्यसेत् , ततः षष्ठस्य द्विविकल्पत्वात् द्वाभ्यां हरेत् , लब्धं सप्तत्रिंशच्छतान्यष्टाशीत्याधिकानि, शेषं द्वे इति द्वितीयविकल्पं सर्वलघुं न्यसेत् । ततः सप्तमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत् । लब्धं नव शतानि सप्तचत्वारिंशदधिकानि । •शेषं चत्वारीति चतुर्थविकल्पं सर्वलघुं न्यसेत्, अन्ते नित्यविन्यासं गुरुं न्यसेत्, ततः सप्तमगणाल्लब्धं परार्द्धादिगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत् । लब्धं द्वे शते षट्त्रिंशदधिके । राशिशेषं त्रीणीति तृतीयविकल्पमादिगुरुं न्यसेत् । ततो लब्धं सैकं कृत्वा द्वितीयगणस्य पञ्चविकल्पत्वात्पञ्चभिर्हरेत् लब्धं सप्तचत्वारिंशत्, राशिशेषं द्वे इति द्वितीयविकल्पमन्तगुरुं न्यसेत् । ततो लब्धं सैकं कृत्वा तृतीयगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत् । लब्धं द्वादश शेषं चत्वारीति चतुर्थविकल्पं सर्वलघुं न्यसेत् । ततश्चतुर्थगणस्य पञ्चविकल्पत्वात्पञ्चभिर्हरेत् लब्धं द्वे । राशिशेषं द्वे इति द्वितीयविकल्पमन्तगुरुं न्यसेत् । ततो लब्धं सैकं कृत्वा पञ्चमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत् । लब्धं शून्यम् । राशिशेषं त्रीणीति तृतीयविकल्पमादिगुरुं न्यसेत् । षष्ठो नित्यविन्यासो लघुरेव । ततो लब्धं सैकं कृत्वा सप्तमगणस्य चतुर्विकल्पत्वाच्चतुर्भिर्हरेत् । लब्धं शून्यं । शेषमेकमिति प्रथमविकल्पं सर्वगुरुं न्यसेत् अन्ते नित्यविन्यासो गुरुरेव । स्थापना यथा– ।।।।, ।ऽ।, ऽऽ, ऽऽ, ।।।।, ।।।।, ।।।।, ऽ।।, ऽ॥, ॥ऽ, ।।।।, ॥ऽ, ऽ॥, ।, ऽ, ऽऽ, १२ १२ १२ १२ संख्यतमैषार्या । यदाह "नष्टाङ्के प्रथमं भक्ते, गणाङ्केश्चतुरादिकैः । शेषसंख्यो गणो देयो, लब्धं कुर्यात्सरूपकम् ॥१॥ पुनर्भजेत्पुनर्लब्धं सरूपं शेषसंख्यया । गणान् दद्याद्गते शेषे, गाथायाः प्राक् गणक्रमः" एवमन्येष्वपि मात्राच्छन्दस्सु नष्टविधिर्ज्ञेय इति नष्टानयनम् । अथोद्दिष्टस्य संख्यापरिज्ञानार्थमाह । ॐ उद्दिष्टेऽन्त्याल्लाद्द्विर्गेकं त्यजेत् । केनचित् प्रस्तारोक्ते वृत्ते कतिथमित्युद्दिष्टे यथा । ऽऽ एवं लगेषु स्थापितेष्वन्त्याल्लादारभ्यार्थात्पश्चानुपूर्व्याधो द्विरिति द्विगुणोऽङ्कः कार्यः । गश्चेदेकं त्यजेत्, गुरोरधो द्विगुण एकोनः कार्यः । अयमर्थः—अन्त्यस्य लस्याधो योऽङ्कस्तं द्विगुणयेत्, स च निराकाराया आवृत्तेरसंभवात्प्रथमातिक्रमे कारणाभावादेक एव परिशिष्टो द्विगुणीकृतो द्विको जातस्ततस्तस्मादपनीय तत्पूर्वस्य गुरोरधो निधाय द्विगुणीकृतश्चतुष्कः स एकोनः कृतस्त्रिकः, पुनस्तत्पूर्वस्य गुरोरधो निधाय द्विगुणीकृतः षट्कः, स एकोनः पञ्चकस्तदीदृशं पञ्चमं वृत्तमिति ।

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

छंदोनु- शासन-

॥ ४८ ॥

अथ जातीनामुद्दिष्टमाह । ※ आद्यमन्त्येन हतं व्यधस्तनम् । स जयति कुमारपालः, श्रीमानवनिपतिशतविनुतचरणः । निर्मलयशसा धवलितभुवनश्चक्रधरतुल्यौजाः ।१। केनचिदियमार्या कतिथीति पृष्टे, अस्या गणान् संस्थाप्य तदधश्चतुष्पञ्चादिकां विकल्पसंख्यां यथासंभवं लिखेत् । ततो गणितक्रमेण आद्यमन्त्येन हत्वा व्यधस्तनमिति तत्र दृष्टविकल्पादधस्तान् विकल्पान् राशेर्व्यपोह्य संख्यां लब्धानेतावतिथं वृत्तमिति निर्दिशेत् । कथं,अन्ते न्यस्तस्यार्द्धगणस्याविकल्पत्वादेकमङ्कमधो निधाय सप्तमगणस्य चतुर्विकल्पाच्चतुर्भिर्हन्यात्, जातानि चत्वारि, इह दृष्टः सर्वगुरुस्तस्याधस्तनानन्तगुर्वादिगुरुसर्वलघूंस्त्रीन् अस्माद्राशेः पातयेत् , शेषमेकम् । षष्ठश्चाविकल्पः पञ्चमे चतुर्भिर्हते अधस्तने चैकस्मिन् सर्वलघौ त्यक्ते त्रीणि, चतुर्थे पञ्चभिर्हतेषु पञ्चदश, अधस्तनेषु त्रिषु त्यक्तेषु द्वादश, तृतीये चतुर्भिर्हतेषु अष्टचत्वारिंशत् , त्याज्यं नास्ति । द्वितीये पञ्चभिर्हतेषु त्रिषु त्यक्तेषु द्वे शते सप्तत्रिंशदधिके, प्रथमे चतुर्भिर्हतेषु एकस्मिन् त्यक्ते नव शतानि सप्तचत्वारिंशदधिकानि, पूर्वार्द्धान्त्यार्द्धगणश्चाविकल्पः । सप्तमे चतुर्भिर्हतेषु सप्तत्रिंशच्छतान्यष्टाशीत्यधिकानि । त्याज्यं नास्ति । षष्ठे द्वाभ्यां हतेषु पञ्चसप्ततिः शतानि षट्सप्तत्यधिकानि । त्याज्यं नास्ति । पञ्चमे चतुर्भिर्हतेषु त्रिंशत्सहस्राणि त्रीणि शतानि चतुरुत्तराणि । त्याज्यं नास्ति । चतुर्थे पञ्चभिर्हतेषु चतुर्षु त्यक्तेषु लक्षमेकमेकपञ्चाशत्सहस्राः पञ्च शतानि षोडशाधिकानि । तृतीये चतुर्भिर्हतेषु त्रिषु त्यक्तेषु षट् लक्षाः षष्टिशतानि एकषष्ट्यधिकानि । द्वितीये पञ्चभिर्हतेषु द्वयोस्त्यक्तयोस्त्रिंशल्लक्षास्त्रिंशत्सहस्राण्त्रीणि शतानि त्र्युत्तराणि । प्रथमे चतुर्भिर्हतेषु त्याज्याभावादेका कोटिरेकविंशतिर्लक्षा एकविंशतिः सहस्राः द्वे शते द्वादशोत्तरे एतावतिथीति निर्दिशेत् । यदाह "गणानुद्दिष्टगाथायाः, संस्थाप्य तदधो लिखेत् । चतुष्पञ्चादिकां संख्यां, स्थानस्थानोचितां ततः । १ । हत्वा हत्वाद्यमन्त्येन चोपरिस्थगणादधः । पृथग् धृतगणेभ्योऽथ गणसंख्यां विकल्पयेत् ।२। हताद्राशेर्योचिता तावद्यावदाद्याङ्कसंभवः । तत्संख्यामुद्दिशेद्गाथामुद्दिष्टप्रत्यये बुधः" ॥३॥ एवमन्यास्वपि जातिषु यथा स्वविकल्पं ज्ञेयमित्युद्दिष्टसंख्यानयनम्। अथ सर्वैकादिगलक्रियापरिज्ञानार्थमाह । ※वर्णसमानेककान् सैकानुपर्युपरि क्षिपेत् मुक्त्वान्त्यं सर्वैकादिगलक्रिया॥ वर्णसमान् वर्णतुल्यान् यावन्तो वर्णास्तावत एककान् , सैकान् एकेन सहितान्विन्यस्योपर्युपरि क्षिपेदन्त्यं मुक्त्वा, इयं सर्वैकादिगलक्रिया । सर्वगाणां सर्वलानामेकादिगानामेकादिलानां च परिज्ञानाय क्रियाकरणमित्यर्थः । यथा चतुरक्षरे छन्दसि पञ्चैकका उपर्युपरि न्यस्यन्ते १ १ ततोऽधस्तनो द्वितीये क्षिप्यते १ १ द्वितीयोऽपि तृतीये १ १ तृतीयोपि चतुर्थे १ ४ मुक्त्वान्त्यमिति वचनादन्त्यो वर्ज्यते । १ ४ पुनरधस्तनो १ १ द्वितीये क्षिप्यते १ ४ द्वितीयोऽपि १ २ तृतीये १ ४ अन्त्यं १ ३ २ मुक्त्वा पुनरधस्तनो १ ४ ३ २ १ द्वितीये क्षिप्यते । जातम् १ ४ ६ ४ १ अत्र प्रथमकं १ सर्वगुरु ऽ ऽ ऽ ऽ ४ ३ १ चत्वार्ये १ कलघूनि ६ ३ १ त्रिगुरूणि १ । ऽ ऽ ऽ

॥ ४८ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aradhak Trust

ऽ।ऽऽ ऽऽ।ऽ ऽऽऽ। षट् द्विलघूनि द्विगुरूणि ।।ऽऽ चत्वारि त्रिलघून्येकगुरूणि ।।।ऽ एकं एकं सर्वलघु ।।।। इयमेव सर्वैकादिगलक्रिया प्रथमपष्ठैकादशषोडश समवृत्त ।ऽ।ऽ हान्या द्व्यक्षरार्द्धसमस्य ।।ऽ। यथा ४ अत्र चत्वार एक- ऽ।।ऽ लघवश्चत्वारो द्विलघवश्चत्वारस्त्रिलघवः । एवमन्येष्वपि ।ऽऽ। अर्द्धसमेषु ज्ञेयम् । तथा ।ऽ।। अष्टा ४ क्षरजातेः सर्वै- कादिगलक्रिया द्व्यक्षरसमवृत्तहान्या चतुरक्षरार्द्धसमहान्या च ऽ।ऽ। द्व्यक्षरविषमस्य यथा॥ २६ ऽ।।। एव ४ मन्येष्वपि विष- मेषु ज्ञेयम् । अथ जातीनां सर्वैकादिगलक्रियामाह– ऽऽ।। ❀ आद्यभेदानधो- ११२८ ऽधो न्यस्य परैर्हत्वाऽग्रे क्षिपेत् । आर्यायामाद्यगणस्य भेदान् लघु द्विलघु चतुर्लघूनेकं द्वावेकं चेत्यधः स्थापयित्वा परैर्द्वितीयग २६८ णभेदैः अलघु द्विलघु चतुर्लघुभिरे- कत्र्येकसंख्यैः कपाटसन्धिक्रमेण स्थापितैः यथा १२ पृथग् पृथग् गुणयित्वा अग्रे क्षिपेदिति । एकेन गुणितेन जातमग्रतः स्थाप्यं १२ अत्र त्रिभिर्गुणितं ३६ क्षिपेत् जातं १५ पुनरेकेन ११३ गुणितमत्र क्षिपेत् जातं १५ अत्र एको लघुः पञ्च द्विलघवोऽष्टौ चतु- र्लघवः १ पञ्च षट्लववः ३ एकश्च ७३ सर्वलघुरिति१ पुनरस्य राशेरनयैव दिशा ८५ तृतीयगणविकल्पैर्घाते जातस्य परस्मिन् राशौ क्षेपे जातं १७ । पुनरस्य राशेरनयैव दिशा चतुर्थगणविकल्पैर्घाते जातस्य परस्मिन् १ राशौ क्षेपे जातं १०१ अथ संख्यामाह– ❀ ते पिण्डिताः १२६ संख्या । ते सर्वैकादिगलाङ्काः पिण्डिता एकीकृताः संख्या भवन्ति तद्यथा–अस्मिन्नेव ४१० चतुरक्षरे छन्द- स्येकं चत्वारि षट् १६७ चत्वार्येकमिति षोडश वृत्तानि भवन्ति । एवमर्द्धसमेषु विषमेषु मात्राछन्दस्सु च ज्ञेयं । ११६० अथ प्रकारान्त- रेण समवृत्तानां १ संख्यामाह । ❀ वर्णसमद्विकहतिः समस्य । समवृत्तस्य पादे यावन्तो वर्णास्तावतां ४१० द्विकानामन्योऽन्य- घातः समवृत्तानां संख्या । तत्र उक्तायां द्विकस्यान्योऽन्यघातो न संभवतीति द्विभेदैव । अत्युक्ताद्विकद्वयघाते १ चतुर्भेदा । मध्या- द्विकत्रयघाते अष्टभेदा । प्रतिष्ठाद्विकचतुष्टयघाते षोडशभेदा । एवं यावदुत्कृतेः षड्विंशतेः द्विकानामन्योऽन्यघाते षट् कोट्य एक- सप्ततिर्लक्षा अष्टौ सहस्राण्यष्टौ शतानि चतुःषष्ट्यधिकानि । ❀ ते द्विगुणा द्विहीनाः सर्वे । ते विवक्षितजातिभेदा द्विगुण-द्विहीना उक्ता- दयो विवक्षितजातिपर्यन्ताः सर्वे भेदा भवन्ति । यथोत्कृतिभेदा एव द्विगुणा द्विहीनाः सर्वजातिभेदास्त्रयोदश कोटयो द्वाचत्वारिंल्लक्षाः सप्तदश सहस्राः सप्तशतानि षड्विंशत्यधिकानि भवन्ति । यथा वा गायत्र्यां चतुःषष्टिभेदा द्विगुणा द्विहीना गायत्रीपर्यन्ताः षड्विंशत्यधिकं

९ शतमुक्तादिजातिभेदा भवन्ति । एवमन्यास्वपि वाच्यं । अथ प्रकारान्तरेणार्द्धसमसंख्यामाह ❀ समकृती राश्यूना अर्द्धसमस्य । सममिति समवृत्तसंख्योच्यते । तस्य कृतिर्वर्गः । सा राश्यूना समवृत्तसंख्याहीना । अयमर्थः–समवृत्तसंख्या गुणिता समवृत्तसंख्या-

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

राश्यूना अर्द्धसमस्य संख्या भवति । यथा चतुरक्षरसमवृत्तसंख्या षोडश तत्कृतिर्द्वे शते षट्पञ्चाशदधिके समार्द्धसमभेदाः । ते राश्यूनाः शुद्धार्द्धसमस्य संख्या भवति । द्वे शते चत्वारिंशदधिके । अथ प्रकारान्तरेण विषमवृत्तसंख्यामाह– ॐ **तत्कृतिर्विषमस्य** । तस्याः समकृतेः कृती राश्यूना विषमवृत्तस्य संख्या । यथा–अस्मिन्नेव चतुरक्षरे छन्दसि समकृतिर्द्वे शते षट्पञ्चाशदधिके, तस्याः कृतिः पञ्चषष्टिः सहस्राः पञ्च शतानि षट्त्रिंशदधिकानि समार्द्धसमविषमसंख्या, अस्यां समार्द्धसमराश्यूनायां पञ्चषष्टिः सहस्रा द्वे शते अशीत्यधिके । अथ मात्रावृत्तानां प्रकारान्तरेण संख्यामाह– ॐ **विकल्पहतिर्मात्रावृत्तानां** । मात्रावृत्ते या गणविकल्पसंख्या सा अन्योऽन्यहता मात्रावृत्तस्य संख्या भवति । सा च यथास्थानं प्रागेवोदाहृता । अत्र मात्राविकल्पानां संख्यामाह– ॐ **अङ्कान्त्योपान्त्ययोगः परे परे मात्राणाम्** । अङ्कानामेकद्व्यादीनां यावन्त्योपान्त्यौ तयोर्योगः परस्परमीलनं परे परे स्थाने न्यस्तौ मात्राणां संख्या भवति । यथा द्वे(द्व्ये)कयोरन्त्योपान्त्ययोर्योगे त्रयः परस्थाने न्यस्तास्त्रिमात्रस्य विकल्पसंख्या । त्रिकद्विकयोर्योगे पञ्च परे स्थाने न्यस्ताश्चतुर्मात्रस्य विकल्पसंख्या । पञ्चकत्रिकयोर्योगेऽष्टौ परे स्थाने न्यस्ताः पञ्चमात्रस्य विकल्पसंख्या । अष्टकपंचकयोर्योगे त्रयोदश परे स्थाने न्यस्ताः षण्मात्रस्य विकल्पसंख्या । त्रयोदशकाष्टकयोर्योगे एकविंशतिः परे स्थाने न्यस्ताः सप्तमात्रस्य विकल्पसंख्या । एकविंशतित्रयोदशकयोर्योगे चतुस्त्रिंशत्परे स्थाने न्यस्ता अष्टमात्रस्य विकल्पसंख्या । स्थापना । १|२|३|४|५| ६ | ७ | ८ एवमुत्तरत्रापि । अथाध्वयोगमाह– ॐ **द्विघ्नानेकाध्वयोगः** ॥ द्विघ्ना द्विगुणा एकेन रूपेण हीना १|२|३|५|८|१३|२१|३४ संख्या अध्वयोगो भूमिमानं भवति । त्र्यक्षरे छन्दस्यष्टौ प्रस्ताराः । ते द्विगुणिताः षोडश । तत एकस्मिन्पातिते पञ्चदश । पञ्चदशाङ्गुलायां भुवि त्र्यक्षरं छन्दः प्रस्तार्यते । एकमङ्गुलं वर्णेनावष्टभ्यते । एकं चान्तरालं चाध्वमानं । इह च प्रस्तारसंख्ययोरेवोपयोगो नष्टादयस्त्वयश्चित्रमात्रं । अध्वयोगस्तु पुरुषेच्छानुविधायित्वेनानियतो, नच क्षेत्रनियमे फलमस्ति इति निरुपयोगः । पूर्वाचार्यानुसरणात्त्वस्माभिरुक्तः ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोनुशासनवृत्तौ प्रस्तारादिव्यावर्णनो नामाष्टमोऽध्यायः ॥

संपूर्णोऽयं ग्रन्थः ॥

॥ ४९ ॥

P. P. Ac. Gunratnasuriji M.S. Jin Gun Aaradhak Trust

Published by Devakaran Mulchand, Lalbag, Panzarapole, Bombay. Printed by B. R Ghanekar
at the Nirnaya-sagar Press 23 Kolbhat Lane, Bombay.

P. P. Ac. Gunratansuriji M.S.

Jin Gun Aaradhak Trust

॥ श्रीछन्दोऽनुशासनं संपूर्णम् ॥

P. P. Ac. Gunratansuriji M.S.

Jin Gun Aaradhak Trust